॥ श्रीजिनाय नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्री वासुपूज्यचरित्रं ॥ भाग चोथो ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित भाषांतर करनार तथा छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज.

( आ ग्रंथना अन्वय तथा भाषांतरना प्रसिद्ध कर्ताए सर्व हक स्वाधिन राख्या छे)

विक्रम संवत् १९८५ किंमत रु. १-०-० सने १९२८

॥ श्रीजिनाय नमः ॥

( श्रीचारित्रविजयगुरुभ्यो नमः )

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्री वासुपूज्यचरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय तथा गुजराती भाषांतर कर्ता—पंडित श्रावक हीरालाल हंसराज—जामनगरवाळा

( भाग चोथो )

सत्कर्माभ्युदये हेतुं शीलं सेव्यमिदं सताम् । दुःकर्मदारि सत्कर्मकारि सेव्यतमं तपः ॥ ७१ ॥

अन्वयः—सत्कर्म अभ्युदये हेतुं इदं शीलं सतां सेव्यं, दुःकर्म दारि, सत्कर्म कारि तपः सेव्यतमं. ॥ ७१ ॥

अर्थः—उत्तम कर्मोना अभ्युदयमाटे कारणरूप आ शीलने सज्जनोए सेववुं, तथा दुष्कर्मोनो विनाश करनारो, अने सत्कर्मोने करनारो तप विशेष प्रकारे सेववो. ॥ ७१ ॥

अनादिसिद्धदुःकर्मद्वेषिसंघातघातकम् । इदमाद्रियते धीरैः खड्गधारोपमं तपः ॥ ७२ ॥

अन्वयः—अनादि सिद्ध दुःकर्म द्वेषि संघात घातकं, खड्गधारा उपमं इदं तपः धीरैः आद्रियते. ॥ ७२ ॥

अर्थः—अनादिकाळथी प्रगटेलां दुष्कर्मोरूपी शत्रुओना समूहनो नाश करनारो, अने तलवारनी धारासरखो आ तप धैर्यवंतो करी शके छे. ॥ ७२ ॥

ज्ञानचक्षुषि नैर्मल्यं तत्त्वातत्त्वावलोकनम् । तपस्तपनवद्दत्ते तमःशमनतः सताम् ॥ ७३ ॥

अन्वयः-तपः तपनवत् तमः शमनतः सतां ज्ञान चक्षुषि नैर्मल्यं तत्त्व अतत्त्व अवलोकनं दत्ते. ॥ ७३ ॥

अर्थः-तप छे ते सूर्यनीपेठे अज्ञानरूपी अंधकारने दूर करीने सज्जनोने ज्ञानरूपी चक्षुमां निर्मलता ( आपीने ) तत्त्व तथा अतत्त्वने देखाडी आपे छे. ॥ ७३ ॥

कर्मैधांसि दहन्पुष्टस्तपोवह्निरयं नवः । हरते देहिनां दाहं यः संसारसमुद्भवम् ॥ ७४ ॥

अन्वयः—कर्म एधांसि दहन् पुष्टः अयं तपः वह्निः नवः, यः देहिनां संसार समुद्भवं दाहं हरते. ॥ ७४ ॥

अर्थः—कर्मोरूपी काष्टोने बाळीने वृद्धि पामेलो आ तपरूपी अग्नि ( खरेखर ) आश्चर्य उपजावनारो छे, केमके जे प्राणीओने संसारथी उत्पन्न थयेला तापने दूर करे छे ! ॥ ७४ ॥

तत्तपः सेव्यतां दक्षा दुःकर्मक्षालनोदकम् । यत्सेवया रयादेव सेव्योऽभूद् भुवि संवरः ॥ ७५ ॥

अन्वयः—तत् (हे) दक्षाः ! दुःकर्म क्षालन उदकं तपः सेव्यतां ? यत् सेवया संवरः रयात् एव भुवि सेव्यः अभूत्. ॥७५॥

अर्थः—माटे हे चतुर मनुष्यो ! दुष्कर्मोने धोइ नाखवामाटे जलसरखा तपनुं तमो सेवन करो ? के जे तप सेववाथी संवरनामना मुनि पृथ्वीपर सेवाने पात्र थया. ॥ ७५ ॥

तथाहि हृदयग्राहिगुणसागरनागरा । जम्बूद्वीपेऽस्त्ययोध्या पूर्भरतक्षेत्रभूषणम् ॥ ७६ ॥

अन्वयः—तथाहि-जंबूद्वीपे हृदय ग्राहि गुण सागर नागरा, भरत क्षेत्र भूषणं अयोध्या पूः अस्ति. ॥ ७६ ॥

अर्थः-ते संवरमुनिनुं उदाहरण कहे छे-जंबूनामना द्वीपमां हृदयनुं आकर्षण करनारा गुणोना महासागरसरखा नागरिकोवाळी, तथा भरतक्षेत्रना अलंकारसरखी अयोध्यानामनी नगरी छे. ॥ ७६ ॥

इहाजनि महोजानिर्महासेन इति श्रुतः । चिन्तामणिषु यद्दानं श्रियो बिम्बमिवैक्ष्यत ॥ ७७ ॥

अन्वयः—इह महासेनः इति श्रुतः महीजानिः अजनि, यत् दानं श्रियः बिंबं इव चिंतामणिषु अैक्ष्यत. ॥ ७७ ॥

अर्थः-ते नगरमां महासेननामनो प्रख्यात राजा हतो, के जेनुं दान लक्ष्मीना प्रतिबिंबनीपेठे चिंतामणिओमां देखातुं हतुं. ।७७।

अभूद् भूपस्य मान्योऽस्य सार्थेशो धनदाभिधः । मूर्ता वृषा इव वृषा रेजुर्यस्य धनार्जने ॥ ७८ ॥

अन्वयः—अस्य भूपस्य मान्यः धनद अभिधः सार्थ ईशः अभूत्, यस्य वृषाः धन अर्जने मूर्ताः वृषाः इव रेजुः. ॥ ७८ ॥

अर्थः—ते राजानो मानीतो धनदनामे (एक) सार्थपति हतो, के जेनी मालीकीना बळदो द्रव्य उपार्जन करवामां जाणे शरीरधारी धर्मो होय नही! तेम शोभता हता. ॥ ७८ ॥

**धनश्रीरिति तस्यासीत्प्रेयसी श्रेयसी गुणैः । बभौ प्रथमसख्यस्य या तीर्थं रूपशीलयोः ॥ ७९ ॥**

अन्वयः–तस्य गुणैः श्रेयसी धनश्रीः इति प्रेयसी आसीत्, या रूप शीलयोः प्रथम सख्यस्य तीर्थं बभौ. ॥ ७९ ॥

अर्थः—ते सार्थवाहने गुणोथी मनोहर धनश्री नामनी स्त्री हती, के जे रूप अने शीलनी प्रथम मित्राइना तीर्थ (संगम) तरीके शोभती हती. (अर्थात् अनुपम रूप अने शीलवडे ते शोभती हती.) ॥ ७९ ॥

**दुर्गतेर्निर्गतः कोऽपि जीवः पीवरदुःकृतः । कैश्चिद्भाग्यैरभाग्यानां तस्या गर्भमवातरत् ॥ ८० ॥**

अन्वयः—दुर्गतेः निर्गतः, पीवर दुःकृतः कः अपि जीवः अभाग्यानां कैश्चित् भाग्यैः तस्याः गर्भं अवातरत्. ॥ ८० ॥

अर्थः—दुर्गतिमांथी निकळेलो, तथा घणा दुष्कर्मोवाळो कोइक जीव अभाग्योनां केटलांक भाग्योवडे तेणीना गर्भमां उत्पन्न थयो. ॥ ८० ॥

**शये पांशुजुषि क्ष्मायां मुण्डिता खण्डितांशुका । इत्यस्या गर्भनिर्भाग्यैर्दुःखदो दोहदोऽजनि ॥ ८१ ॥**

अन्वयः—मुंडिता खंडित अंशुका पांशुजुषि क्ष्मायां शये, इति अस्याः गर्भ निर्भाग्यैः दुःखदः दोहदः अजनि. ॥ ८१ ॥

अर्थः—(मस्तक) मुंडावीने, फाटां त्रुटां कपडां पेहेरी धुडथी भरेली जमीनपर हुं शयन करुं, एरीतनो तेणीने गर्भना अभाग्योथी

दुःखदाइ दोहलो उत्पन्न थयो. ॥ ८१ ॥

नाविष्करिष्ये निःशेषद्रोहदं दोहदं कचित् । अपत्यमेनमुत्पन्नमेव त्यक्ष्यामि च क्षणात् ॥ ८२ ॥
इति ध्यानवती यावद्दिनानि गमयत्यसौ । तावद्विधिनियोगेन धनदो निधनं ययौ ॥ ८३ ॥ युग्मम् ॥

अन्वयः—निःशेष द्रोहदं दोहदं कचित् न आविष्करिष्ये, च एनं अपत्यं उत्पन्नं एव क्षणात् त्यक्ष्यामि, ॥ ८२ ॥ इति ध्यानवती असौ यावत् दिनानि गमयति, तावत् विधिनियोगेन धनदः निधनं ययौ. ॥ ८३ ॥ युग्मं ॥

अर्थः—सर्वदुःख आपनारो ( आ ) दोहलो क्यारेय ( हुं ) प्रगट करीश नही, तेमज आ बाळकने उत्पन्न थतांज तुरत तजी देइश, ॥ ८२ ॥ एम विचारती एवी ते धनश्री जेवामां दिवसो व्यतीत करे छे, तेवामां कर्मयोगे ते धनद सार्थवाह मरण पाम्यो ॥ ८३ ॥ युग्मं ॥

धनं यद्यस्य हस्तेऽभूत्तत्तेन जगृहेऽखिलम् । दोहदोऽस्याः स्वभावेन पूर्णस्तूर्णतरस्ततः ॥ ८४ ॥

अन्वयः—यद् धनं यस्य हस्ते अभूत् तत् तेन अखिलं जगृहे, ततः अस्याः दोहदः स्वभावेन तूर्णतरः पूर्णः. ॥ ८४ ॥
अर्थः जे धन जेना हाथमां हतुं, ते ते माणसे सघळुं पचावी पाड्युं, अने तेथी तेणीनो दोहलो स्वभावथीज वधारे जल्दी पूर्ण थयो.

पूर्णैर्दुर्दिवसैस्तस्या जातः पातकवान् सुतः । पिङ्गाक्षिकेशः कृष्णाङ्गः कुब्जो न्युब्जः खरस्वरः ॥८५॥

अन्वयः-पूर्णैः दुर्दिवसैः तस्याः पातकवान्, पिंग अक्षि केशः, कृष्ण अंगः, कुब्जः, न्युब्जः, खरस्वरः सुतः जातः. ॥८५॥

अर्थः-दुःखी दिवसो संपूर्ण थयाबाद तेणीने पापी, पीळां नेत्रो तथा केशोवाळो, श्याम शरीरवाळो, कुबडो, कदरूपो तथा गधेडाजेवा स्वरवाळो पुत्र उत्पन्न थयो. ॥ ८५ ॥

**सदुःखा सूतिरोगार्ता मुक्ता परिजनेन सा। ईदृग्गात्रे सुते जातमात्रे तत्र मृता ततः ॥ ८६ ॥**

अन्वयः—सदुःखा, सूति रोग आर्ता सा परिजनेन मुक्ता, ततः ईदृग् गात्रे तत्र सुते जातमात्रे मृता. ॥ ८६ ॥

अर्थः—दुःखणी, तथा प्रसूतिना रोगथी पीडायेली एवी ते धनश्रीनी ( तेणीना ) परिवारे ( कंइ ) सारवार करी नही, अने तेथी आवां कदरूपां शरीरवाळो ते पुत्र जन्मतांज ते मृत्यु पामी. ॥ ८६ ॥

**तस्या दत्तः शिखी तुल्यजातिभिः प्रातिवेश्मकैः। पयांसि कृपया सोऽपि पायितः प्राणितश्च तैः ॥८७॥**

अन्वयः-तुल्य जातिभिः प्रातिवेश्मकैः तस्याः शिखी दत्तः, च सः अपि तैः कृपया पयांसि पायितः प्राणितः. ॥८७॥

अर्थः-नातीला पाडोशीओए तेणीनो अग्निसंस्कार कर्यो, तथा ते बाळकने पण तेओए दया लावी, दूध पाइने उछेर्यो. ॥८७॥

**उत्पन्नेनामुना सर्वं श्रीकुटुम्बादि संवृतम्। ततः संवर इत्यस्य जनैर्नाम विनिर्ममे ॥ ८८ ॥**

अन्वयः-अमुना उत्पन्नेन श्रीकुटुंब आदि सर्वं संवृतं, ततः जनैः " संवर " इति अस्य नाम विनिर्ममे. ॥ ८८ ॥

अर्थः-आना जन्मथीज लक्ष्मी तथा कुटुंब आदिक सर्व संवृत एटले नष्ट थयुं छे, तेथी लोकोए " संवर " एवुं ते बाळकनुं

नाम राख्युं. ॥ ८८ ॥

अज्ञानजनदुर्वाक्यताडनैर्ववृधेऽधिकम् । ग्रीष्मवातरजःपातैर्यवासक इवासकौ ॥ ८९ ॥

अन्वयः-ग्रीष्म वात रजः पातैः यवासकः इव असकौ अज्ञान जन दुर्वाक्य ताडनैः अधिकं ववृधे. ॥ ८९ ॥

अर्थः—ग्रीष्मऋतुना वायुथी उडेली रज पडवाथी जेम जवासो वृद्धि पामे, तेम आ संवर अज्ञानी लोकोनी गाळो, तथा ताडनथी अधिक वृद्धि पामवा लाग्यो. ॥ ८९ ॥

वैरूप्यमेव तस्याभूत्पत्तने वर्तनं शिशोः । विटानां विटविद्यैव जीवनं जायते यतः ॥ ९० ॥

अन्वयः—तस्य शिशोः वैरूप्यं एव पत्तने वर्तनं अभूत्, यतः विटानां विटविद्या एव जीवनं जायते. ॥ ९० ॥

अर्थः-ते बाळकनुं कदरूपापणुंज नगरमां ( तेनी ) आजीविकारूप थइ पड्युं, केमके ठगोनी ठगविद्याज ( तेओनी ) आजीविकारूप थाय छे. ॥ ९० ॥

तारुण्येनापि वैरूप्यं हृतं नास्य मनागपि । लेष्टुं वैकटिको यस्मादुत्तेजयितुमक्षमः ॥ ९१ ॥

अन्वयः—तारुण्येन अपि अस्य मनाक् अपि वैरूप्यं न हृतं, यस्मात् वैकटिकः लेष्टुं उत्तेजयितुं अक्षमः. ॥ ९१ ॥

अर्थः-युवावस्थाए पण तेनुं जरा पण कदरूपापणुं दूर कर्युं नही, केमके मणिआर ( पण कंइ ) ढेफांने चळकतुं करवाने समर्थ थइ शकतो नथी. ॥ ९१ ॥

उलूक इव काकोलैर्लोलैः कोलाहलोल्बणैः । पुरि भ्राम्यन्नसौ डिम्भैः संभूय स्माभिभूयते ॥ ९२ ॥

अन्वयः---लोलैः कोलाहल उल्बणैः काकोलैः उलूकः इव पुरि भ्राम्यन् असौ डिंभैः संभूय अभिभूयतेस्म. ॥ ९२ ॥

अर्थः-दोडता तथा अत्यंत कोलाहल करता कागडाओ जेम घूवडने संतापे छे, तेम नगरमां भमता एवा ते संवरने छोकराओ एकठा थइने संतापवा लाग्या. ॥ ९२ ॥

दुर्बलानां बलं राजकुलमित्येष चिन्तयन् । तत्र चेद्याति तद्राजपुत्रकैः पीड्यतेऽभितः ॥ ९३ ॥

अन्वयः-दुर्बलानां राजकुलं बलं, इति चिंतयन् एषः चेत् तत्र याति, तत् राजपुत्रकैः अभितः पीड्यते. ॥ ९३ ॥

अर्थः-नबळाओमाटे राजकुलनुं बल होय छे, एम विचारीने जो ते त्यां जाय, तो राजपुत्रो (त्यां) तेने चोतरफथी संतापता हता.

खेदात्त्यक्तपुरोऽताडि पथिकैः पथि कैर्न सः । ग्राम्यैर्ग्रामे विशँल्लेष्टुयष्टिमुष्टिभिरप्यथ ॥ ९४ ॥

अन्वयः—खेदात् त्यक्तपुरः सः पथि कैः पथिकैः न अताडि ? अथ ग्रामे विशन् ग्राम्यैः अपि लेष्टु यष्टि मुष्टिभिः (अताडि)

अर्थः—कंटाळीने तजेलुं छे नगर जेणे, एवा ते संवरने मार्गमां कया पंथीओए न मार्यो ? (अर्थात् सर्वेए मार्यो.) वळी (कोइ) गामडामां दाखल थतां गामडीआओ पण (तेने) पत्थर, लाकडी तथा मुष्टिओवडे प्रहार करवा लाग्या. ॥ ९४ ॥

इत्यसौ सर्वतः सर्वैरप्यत्यर्थं कदर्थितः । निचितं चिन्तयामास निःश्वासोच्छ्वसिताननः ॥ ९५ ॥

अन्वयः–इति सर्वतः सर्वैः अपि अत्यर्थं कदर्थितः असौ निःश्वास उच्छ्वसित आननः निर्वितं चिंतयामास. ॥ ९५ ॥

अर्थः—ए रीते सर्व जगोए सर्व लोकोथी अत्यंत संताप पामेलो ते संवर निःश्वासोथी सूजेला (झांखा) मुखवाळो थयोथको कंटाळीने विचारवा लाग्यो के, ॥ ९५ ॥

धन्या वन्या मृगास्तेऽपि पक्षिणस्तेऽपि दक्षिणाः । विशन्त्यपि न ये कर्मदानवे मानवे जने ॥ ९६ ॥

अन्वयः—ते वन्याः मृगाः अपि धन्याः, ते पक्षिणः अपि दक्षिणाः, ये कर्म दानवे मानवे जने विशंति अपि न. ॥ ९६ ॥

अर्थः—ते वनवासी हरिणो पण भाग्यशाली छे, तथा ( वनमां वसनारा ) ते पक्षिओ पण बुद्धिवानो छे, के जेओ राक्षसी कार्य करनारी मनुष्यजातिना समागममांज आवता नथी. ॥ ९६ ॥

अहमप्यहते स्थाने मानवैर्यामि सर्वथा । इति ध्यायन्नयं क्वापि कान्तारे सत्वरं ययौ ॥ ९७ ॥

अन्वय–अहं अपि सर्वथा मानवैः अहते स्थाने यामि, इति ध्यायन् अयं सत्वरं क्व अपि कांतारे ययौ. ॥ ९७ ॥

अर्थः—( माटे ) हुं पण बीलकुल मनुष्योनी हस्तीविनाना स्थानमां जाउं, एम विचारी ते संवर एकदम कोइक उज्जड जंगलमां चाल्यो गयो. ॥ ९७ ॥

त्यक्तजातिविरोधेन जातबोधेन साश्रुणा । मृगवर्गेण संवर्ग्यमाणपर्यन्तभूतलः ॥ ९८ ॥

अमुना शमिनां मध्ये सिद्धसेनो मुनीश्वरः । स्वाध्यायध्वनिमाधुर्यवश्यविश्वो व्यलोक्यत ॥ ९९ ॥

अन्वयः-त्यक्त जाति विरोधेन, जात बोधेन, साश्रुणा मृगवर्गेण सवर्ग्यमाण पर्यंत भूतलः, ॥ ९८ ॥ स्वाध्याय ध्वनि माधुर्य वश्य विश्वः, शमिनां मध्ये सिद्धसेनः मुनीश्वरः अमुना व्यलोक्यत. ॥ ९९ ॥ युग्मं ॥

अर्थः—तजेल छे जातिवैर जेणे, बोध पामेला, तथा ( आंखोमां ) अश्रुओवाळा एवा हरिणोनो समूह जेनी आसपासनी जमीनपर गोठवाइने बेशी गयो छे, एवा, ॥ ९८ ॥ तथा स्वाध्यायनी ध्वनिनी मीठाशथी वश थयेल छे जगत जेने एवा, अने मुनिओनी वच्चे बेठेला, एवा श्रीसिद्धसेन नामना मुनिराजने तेणे जोया. ॥ ९९ ॥ युग्मं ॥

**आगच्छागच्छ वत्स त्वमिति तं यतिनां पतिः । वर्णैः कर्णैकपीयूषगण्डूषैः स्वयमाह्वयत् ॥ १४०० ॥**

अन्वयः-(हे) वत्स ! त्वं आगच्छ ? आगच्छ ? इति यतिनां पतिः स्वयं कर्ण एक पीयूष गंडूषैः वर्णैः तं आह्वयत्. ॥१४००॥

अर्थः-हे वत्स ! तुं आव ? आव ? ए रीते ते मुनिराजे पोते कर्णोमां एक अमृतना कोगळासरखा अक्षरोवडे तेने बोलाव्यो.

**अहो उक्तिरपूर्वास्य ध्यात्वेति पदयोर्यतेः । स निपत्य पराभूतः सुतः पितुरिवारुदत् ॥ १ ॥**

अन्वयः-अहो ! अस्य उक्तिः अपूर्वा, इति ध्यात्वा पराभूतः सुतः पितुः इव यतेः पदयोः निपत्य सः अरुदत्. ॥ १ ॥

अर्थः-अहो ! आ मुनिराजनी वाणी अपूर्व छे ! एम विचारीने पराभव पामेलो पुत्र जेम पितापासे, तेम ते मुनिराजना चरणोमां पडीने ते रडवा लाग्यो. ॥ १ ॥

**संभाष्य मुनिना पृष्टः संनिकृष्टफलोदयः । अथाचष्ट निजं कष्टचरितं परितोऽपि सः ॥ २ ॥**

अन्वयः—अथ मुनिना संभाष्य पृष्टः संनिकृष्ट फल उदयः सः निजं परितः अपि कष्ट चरितं आचष्ट. ॥ २ ॥

अर्थः—पछी ते मुनिराजे मिष्ट वचनोवडे बोलावीने पूछवाथी नजीक छे फलनो उदय जेनो एवा ते संवरे ( पोतानुं ) सर्वथा प्रकारे दुःखदाइ चरित्र कही संभळाव्युं. ॥ २ ॥

**अथादिशदसौ साधुस्तमुद्दिश्य दयाशयः । प्रीणयन्सर्वसत्त्वानि तथ्यैककवचं वचः ॥ ३ ॥**

अन्वयः— अथ दयाशयः असौ साधुः सर्व सत्त्वानि प्रीणयन् तं उद्दिश्य तथ्य एक कवचं वचः आदिशत्. ॥ ३ ॥

अर्थः—पछी दयाना स्थानरूप एवा ते साधुए सर्व जीवोने खुशी करतां थकां ते संवरने उद्देशीने सत्यनाज एक बखतर सरखुं वचन कह्युं के, ॥ ५३ ॥

**कियन्मात्रमिदं दुःखमत्र तेऽस्ति नृजन्मनि । सहन्तेऽमी यथात्मानोऽनन्तं दुःखं तथा शृणु ॥ ४ ॥**

अन्वयः—अत्र नृजन्मनि ते इदं दुःखं कियन्मात्रं अस्ति ? अमी आत्मानः यथा अनंतं दुःखं सहंते, तथा शृणु ? ॥ ४ ॥

अर्थः—आ मनुष्यजन्ममां तारुं आ दुःख शुं हिसाबमां छे ? आ जीवो जे अनंतां दुःखो सहन करे छे, ते तुं सांभळ ? ॥ ४ ॥

**कषायविषयासक्तः सक्तः प्राणिवधादिषु । तदर्जयति दुःकर्म येन जन्तुर्भवान्तरे ॥ ५ ॥**

**भेदनच्छेदनोत्तप्तत्रपुपानासिपत्रजैः । क्षेत्रजैश्च महादुःखैः पीड्यते नरकेष्वसौ ॥ ६ ॥ युग्मम् ॥**

अन्वयः—कषाय विषय आसक्तः, प्राणिवध आदिषु सक्तः जंतुः तत् दुःकर्म अर्जयति, येन भवांतरे ॥ ५ ॥ असौ नरकेषु भेदन, च्छेदन, उत्तप्त त्रपुपान, असिपत्रजैः, च क्षेत्रजैः महादुःखैः पीड्यते. ॥ ६ ॥ युग्मं ॥

अर्थः–कषायो अने विषयोमां आसक्त थयेलो, तथा जीवहिंसा आदिक पापोमां लीन थयेलो प्राणी एवुं तो दुष्कर्म उपार्जन करे छे, के, जेथी भवांतरमां, ॥ ५ ॥ ते प्राणी नरकोनी अंदर, भेदन, छेदन, तपावेलां सीसानुं पान, तथा तलवारना विदारणथी उत्पन्न थयेलां, तेमज क्षेत्रसंबंधि महान दुःखोवडे पीडित थाय छे. ॥ ६ ॥ युग्मं ॥

लब्धतिर्यग्भवोऽप्येष जलस्थलनभोगतिः । व्यथ्यतेऽत्यर्थमात्मायमौष्णशीतानिलानलैः ॥ ७ ॥

अन्वयः–लब्ध तिर्यग्भवः, जल स्थल नभः गतिः अपि एष अयं आत्मा औष्ण शीत अनिल अनलैः अत्यर्थं व्यथ्यते. ॥७॥

अर्थः–तिर्यंचनो भव पामेलो, तथा जल, पृथ्वी अने आकाशमां गमन करनारो, एवो पण ते आ जीव गरमी, ठंडी, वायु तथा अग्निवडे अत्यंत पीडा पामे छे. ॥ ७ ॥

मर्त्यत्वेऽपि महारोगनैःस्व्यदास्यवियोगजैः । दुःखैर्दंदह्यते जन्तुर्नारकप्रतिहस्तकैः ॥ ८ ॥

अन्वयः–मर्त्यत्वे अपि जंतुः नारक प्रतिहस्तकैः महारोग नैःस्व्य दास्य वियोगजैः दुःखैः दंदह्यते. ॥ ८ ॥

अर्थः–मनुष्यभवमां पण प्राणी नारकीजेवांज महोटा रोगो, निर्धनता, नोकरी तथा वियोगथी उत्पन्न थयेलां दुःखोवडे बळतोज रहेछे.

किल्बिषकिंकरालपर्धिभावात्क्रुद्धेन्द्रवज्रतः । युद्धेर्ष्याच्यवनाज्जीवो देवत्वेऽपि न सौख्यभाक् ॥ ९ ॥

अन्वयः—देवत्वे अपि जीवः किल्बिष किंकर अल्प ऋद्धि भावात्, क्रुद्ध इन्द्र वज्रतः, युद्ध ईर्ष्या च्यवनात् सौख्यभाक् न.

अर्थः—देवभवमां पण जीव किल्बिष एटले हलकी जातिना देवपणाथी, नोकरपणाथी, तथा अल्प समृद्धिपणाथी क्रोध पामेला इन्द्रना वज्रथी, युद्धथी, (परस्परनी) अदेखाइथी, तथा च्यवनपणाथी सुखी होइ शकतो नथी. ॥ ९ ॥

**एवं कर्मविपाकोऽस्मिन्भवे जीवान्कदर्थयेत् । लक्ष्यन्तेऽस्य फलान्येव न स्वरूपं जनैर्यतः ॥ १० ॥**

अन्वयः—एवं कर्म विपाकः अस्मिन् भवे जीवान् कदर्थयेत्, यतः जनैः अस्य फलानि एव लक्ष्यंते, स्वरूपं न. ॥ १० ॥

अर्थः—एरीते कर्मोनो विपाक आ भवमां जीवोने दुःख आपे छे, केमके लोको ते कर्मविपाकना फलनेज जाणे छे, परंतु तेनुं स्वरूप जाणता नथी. ॥ १० ॥

**माहात्म्यं ध्यानयोगानां सामर्थ्यं परमात्मनाम् । विपाकं कर्मणां वेत्ति न सर्वज्ञं विनापरः ॥ ११ ॥**

अन्वयः—ध्यान योगानां माहात्म्यं, परमात्मनां सामर्थ्यं, कर्मणां विपाकं सर्वज्ञं विना अपरः न वेत्ति. ॥ ११ ॥

अर्थः-ध्यान अने योगोना माहात्म्यने, परमात्मोना सामर्थ्यने, अने कर्मोना विपाकने केवळीविना बीजो कोइ जाणी शकतो नथी.

**अमुं कर्मविपाकं तु शुभीकर्तुमिहोद्यतः । एक एवास्ति सद्धर्मः शिवशर्मनिबन्धनम् ॥ १२ ॥**

अन्वयः—तु अमुं कर्म विपाकं शुभी कर्तुं इह शिव शर्म निबंधनं एकः सद्धर्मः एव उद्यतः अस्ति. ॥ १२ ॥

अर्थः-वळी कर्मोना आ विपाकने शुभरूप करवा माटे अहीं मोक्षसुखना कारणरूप एवो एक उत्तम धर्मज उद्यमवंत थयेलो छे.

विनामुना तु धर्मेण जन्तुः कर्माख्यवैरिभिः । पात्यते तेषु दुःखेषु येषां त्वद्दुःखमञ्चलः ॥ १३ ॥

अन्वयः—तु अमुना धर्मेण विना कर्म आख्य वैरिभिः जंतुः तेषु दुःखेषु पात्यते येषां त्वत् दुःखं अंचलः. ॥ १३ ॥

अर्थः—वळी आ धर्मविना कर्म नामना शत्रुओ प्राणीने एवां तो (असह्य) दुःखोमां पाडे छे, के जेमां (आ) तारुं दुःख तो एक चींथरा सरखुं छे. ॥ १३ ॥

परं नैवाचरन्त्येते मूढास्तत्किंचन क्वचित् । येन क्षिपन्ति दुःकर्मबीजं तद्दुःखभूरुहाम् ॥ १४ ॥

अन्वयः—परं एते मूढाः क्वचित् तत् किंचन न आचरंति, येन तद् दुःखभूरुहां दुःकर्म बीजं क्षिपंति. ॥ १४ ॥

अर्थः—परंतु आ मूढ प्राणीओ कोइ पण समये ते धर्मनुं लेश मात्र पण आचरण करता नथी, के जे धर्मवडे करीने ते दुःखरूपी वृक्षोनां दुष्कर्मरूपी बीजने (दूर) फेंकी शके. ॥ १४ ॥

अथ प्रभूतदुःकर्माभिभूतः संवरो गुरून् । करौ किरीटतां नीत्वा पप्रच्छातुच्छवाञ्छनः ॥ १५ ॥

अन्वयः—अथ प्रभूत दुःकर्म अभिभूतः, अतुच्छ वांछनः संवरः करौ किरीटतां नीत्वा गुरून् पप्रच्छ. ॥ १५ ॥

अर्थः—हवे घणां दुष्कर्मोथी पराभव पामेलो, तथा म्होटी आशावाळो ते संवर (बन्ने) हाथोने मुकुटरूप करीने (जोडीने) गुरुमहाराजने पूछवा लाग्यो के, ॥ १५ ॥

प्रभो प्रभवति प्रायः कोऽप्युपायः स किं क्वचित् । येन स्याद्विषतामन्तो हन्त दुःकर्मणामपि ॥ १६ ॥

अन्वयः—हे प्रभो ! प्रायः सः कः अपि उपायः किं क्वचित् प्रभवति ? येन हंत दुःकर्मणां द्विषतां अपि अंतः स्यात्. ॥१६॥

अर्थः—हे भगवान् ! प्रायें करीने एवो पण कोइ उपाय शुं क्यांय छे ? के जेथी अरेरे ! ( आवां ) दुष्कर्मोरूपी शत्रुओनो पण नाश थइ शके. ॥ १६ ॥

अथाभ्यधात्सुधापूरसोदरीं स गुरुर्गिरम् । तप एवास्ति दुःकर्ममर्मनिर्मथनिष्ठुरम् ॥ १७ ॥

अन्वयः—अथ गुरुः सुधा पूर सोदरीं गिरं अभ्यधात्, तप एव दुःकर्म मर्म निर्मथ निष्ठुरं अस्ति. ॥ १७ ॥

अर्थः—त्यारे गुरुमहाराज अमृतना प्रवाहसरखी वाणी बोल्या के, फक्त एक तपज (तेवां) दुष्कर्मोना मर्मस्थानोने तोडीपाडवामां समर्थ छे ॥ १७ ॥

धत्ते तदपि तीव्रत्वमङ्ग निःसङ्गताभृताम् । निःसङ्गता तु दीक्षाया दाक्षिण्येन यदि स्थिरा ॥ १८ ॥

अन्वयः—अंग तत् अपि निःसंगता भृतां तीव्रत्वं धत्ते, निःसंगता तु यदि दीक्षायाः दाक्षिण्येन स्थिरा. ॥१८ ॥

अर्थः—वळी ते तप पण ( सांसारिक ) मनुष्योए संगरहित करेलो तीव्रपणुं धारण करी शके छे, अने ते निःसंगपणुं पण दीक्षानी कृपाथीज स्थिर थाय छे. ॥ १८ ॥

सान्वय भाषांतर ॥७१५॥

चेतसो निश्चलत्वेन प्राप्यते सा महाशयैः । कर्मदावानलज्वालाविध्यापनघनाघनः ॥ १९ ॥

अन्वयः—कर्म दावानल ज्वाला विध्यापन घनाघनः सा महाशयैः चेतसः निश्चलत्वेन प्राप्यते. ॥ १९ ॥

अर्थः—कर्मोरूपी दावानलनी ज्वालाओने ठारवामां वरसाद सरखी ते दीक्षाने गंभीर हृदयवाळा मनुष्यो मननी स्थिरताथी मेळवी शके छे. ॥ १९ ॥

इति श्रुत्वाथ तत्वार्थं सत्त्वभाक्संनिधौ गुरोः । साग्रहः सोऽग्रहीद्दीक्षां संमदी क्षान्तितत्परः ॥ २० ॥

अन्वयः—अथ इति तत्त्वार्थं श्रुत्वा सत्त्वभाक्, क्षांतितत्परः संमदी सः साग्रहः गुरोः संनिधौ दीक्षां अग्रहीत्. ॥ २० ॥

अर्थः–पछी ए रीतनो तात्विक भावार्थ सांभळीने पराक्रमी, क्षमा राखवामां तत्पर थयेला, तथा आनंद पामेला एवा ते संवरे आग्रहसहित गुरुमहाराजपासे दीक्षा लीधी. ॥ २० ॥

सिद्धान्ताध्ययनोद्रेकाद्विवेकाञ्चितचेतनः । तपः कपटनिर्मुक्तमारेभे संवरो मुनिः ॥ २१ ॥

अन्वयः—सिद्धांत अध्ययन उद्रेकात् विवेक अंचित चेतनः संवरः मुनिः कपट निर्मुक्तं तपः आरेभे. ॥ २१ ॥

अर्थः–आगमोना अभ्यासना उमळकाथी (उत्पन्न थयेला) विवेकथी शोभितां हृदयवाळा ते संवरमुनि निष्कपटपणे तप करवा लाग्या.

असौ सद्धर्मचातुर्यस्तुर्यषष्ठाष्टमैर्व्यधात् । तपोभारैः शरासारैर्जर्जरं कर्मपञ्जरम् ॥ २२ ॥

अन्वयः—सद्धर्म चातुर्यः असौ तुर्य षष्ट अष्टमैः तपोभरैः शर आसारैः कर्म पंजरं जर्जरं व्यधात्. ॥ २२ ॥

अर्थः—उत्तम धर्मनी चतुराइवाळा ते संवरमुनि उपवास, छठ तथा अठ्ठमना तपसमूहरूपी बाणोना वरसादथी कर्मोरूपी पांजरांने खोखरुं करवा लाग्या. ॥ २२ ॥

**पुरिमाधमेकभक्तं नैर्विकृत्यं च कृत्यवित् । आचाम्लमुपवासं च सेवमानः प्रतीन्द्रियम् ॥ २३ ॥**

**दिवसैः पञ्चविंशत्या जितेन्द्रियशिरोमणिः । स इन्द्रियजयं नाम तपश्चक्रे यथाविधि ॥ २४ ॥युग्मम्॥**

अन्वयः—च प्रति इंद्रियं पुरिमाधं, एकभक्तं, नैर्विकृत्यं, आचाम्लं, च उपवासं सेवमानः कृत्यवित्, ॥ २३ ॥ जित इंद्रिय शिरोमणिः सः पंचविंशत्या दिवसैः इंद्रियजयं नाम तपः यथाविधि चक्रे. ॥ २४ ॥ युग्मं ॥

अर्थः—वळी दरेक इंद्रियने अपेक्षीने, पुरिमढ, एकटाणुं, नीवी, आंबेल तथा उपवास करता, तथा कार्यने जाणनारा, ॥ २३ ॥ अने जितेंद्रियोमां शिरोमणि एवा ते संवरमुनिए पचीस दिवसोए "इंद्रियजय" नामनो तप विधिपूर्वक (संपूर्ण) कर्यो. ॥ २४ ॥

**एकभक्तं नैर्विकृत्यमाचाम्लं भक्तवर्जनम् । एवं षोडशभिर्घस्रैः च कषायजयं व्यधात् ॥ २५ ॥**

अन्वयः–एकभक्तं, नैर्विकृत्यं, आचाम्लं, भक्तवर्जनं, एवं षोडशभिः घस्रैः सः कषायजयं व्यधात्. ॥ २५ ॥

अर्थः—एकटाणुं, नीवीइ, आंबेल, तथा उपवास, एम शोळ दिवसोसुधी करीने तेणे "कषाय जय" नामनो तप कर्यो. ॥२५॥

**निर्विकृतिकमाचाम्लमभक्तं विदधन्मुनिः । योगानां शुद्धये योगशुद्धिं नवदिनैर्व्यधात् ॥ २६ ॥**

अन्वयः—योगानां शुद्धये निर्विकृतिकं आचाम्लं, अभक्तं नव दिनैः विदधन् मुनिः योगशुद्धिं व्यधात्. ॥ २६ ॥

अर्थः—(मनवचन कायाना) योगोनी शुद्धिमाटे नीवी, आंबेल, तथा उपवास एम नव दिवसोसुधी करीने ते संवरमुनिए "योगशुद्धि" नामनो तप कर्यो. ॥ २६ ॥

**अभक्तमेकाशनकमेकसिक्थकमप्यथ । एकस्थानमेकदत्तिं विकृत्या रहितं ततः ॥ २७ ॥**

**आचाम्लमष्टकवलमित्येकैकस्य कर्मणः । हतौ तपो व्यधादष्टकर्मसूदनमेव सः ॥ २८ ॥ युग्मम् ॥**

अन्वयः-अथ अभक्तं, एकाशनकं, एकसिक्थकं अपि एक स्थानं, ततः विकृत्या रहितं एकदत्तिं, ॥ २७ ॥ आचाम्लं, अष्टकवलं, इति एकैकस्य कर्मणः हतौ सः अष्टकर्मसूदनं एव तपः व्यधात्. ॥ २८ ॥ युग्मं ॥

अर्थः—वळी उपवास, एकासणुं, एकसिक्थ, तथा एकलठाणुं, पछी विगइ रहित नीवीइ, एकदत्ति, ॥ २७ ॥ आंबेल, अने आठ कोळीया, एम एक एक कर्मना विनाशमाटे ते संवरमुनिए " अष्ट कर्म सूदन " (आठे कर्मोनो नाश करनारो) तप कर्यो. ॥२८॥

**ज्ञानस्य दर्शनस्यापि चारित्रस्य च सेवनम् । चक्रे निरन्तरं साधुरुपवासैस्त्रिभिस्त्रिभिः ॥ २९ ॥**

अन्वयः-च साधुः निरंतरं त्रिभिः त्रिभिः उपवासैः ज्ञानस्य, दर्शनस्य, च चारित्रस्य अपि सेवनं चक्रे. ॥ २९ ॥

अर्थः-वळी ते संवर साधुए अंतररहित त्रण त्रण उपवासोवडे, ज्ञाननुं, दर्शननुं अने चारित्रनुं पण आराधन कर्युं. ॥ २९ ॥

**शुक्लास्वेकादशीष्वेकादशसंख्यासु सोऽकरोत् । मौनोपवासकरणैः श्रुतदेवीतपः शुभम् ॥ ३० ॥**

अन्वयः—एकादश संख्यासु शुक्लासु एकादशीसु मौन उपवास करणैः सः शुभं श्रुतदेवी तपः अकरोत्. ॥ ३० ॥

अर्थः—( वळी ) शुक्ल पक्षनी अग्यार अग्यारसोने दिवसे मौन धारण करवा पूर्वक उपवासो करीने ते संवर मुनिए श्रुतदेवीना आराधननो शुभ तप कर्यो. ॥ ३० ॥

**शुक्लपक्षेऽष्टभिरुपवासैराचाम्लपारणैः । दिनैः षोडशभिः सोऽधात्तपः सर्वाङ्गसुन्दरम् ॥ ३१ ॥**

अन्वयः-शुक्लपक्षे अष्टभिः उपवासैः, आचाम्ल पारणैः, षोडशभिः दिनैः सः " सर्वांग सुंदरं तपः " अधात्. ॥ ३१ ॥

अर्थः-वळी शुक्ल पक्षमां आठ उपवास, तथा ते दरेक उपवासने पारणे आंबेल, एम शोळ दिवसो सुधीमां तेमणे " सर्वांग सुन्दर " नामनो तप कर्यो. ॥ ३१ ॥

**इत्येतत्कृष्णपक्षे तु ग्लानपालनलालसः । सोऽकार्षीद्विषयद्वेषी नीरुक्सिंहाभिधं तपः ॥ ३२ ॥**

अन्वयः-तु कृष्णपक्षे इति एतत्, ग्लान पालन लालसः, विषयद्वेषी सः " नीरुक् सिंहाभिधं " तपः अकार्षीत् ॥ ३२ ॥

अर्थः-वळी कृष्ण पक्षमां उपर कह्या मुजबज, ग्लान साधुनी वैयावच्छ करवानी इच्छा पूर्वक, विषयोना द्वेषी एवा ते संवरमुनिए " नीरुक् सिंह " नामनो तप कर्यो. ॥ ३२ ॥

मुनिर्द्वात्रिंशदाचाम्लैरेकान्तरितपारणैः । विदधे शुद्धबोधोऽयं तपः परमभूषणम् ॥ ३३ ॥

अन्वयः—एकांतरित पारणैः द्वात्रिंशत् आचाम्लैः शुद्ध बोधः अयं मुनिः "परम भूषणं" तपः विदधे ॥ ३३ ॥

अर्थः–वळी एकांतरे पारणुं करवापूर्वक बत्रीस आंबेलो करीने निर्मल बोधवाळा आ संवरमुनिए "परम भूषण" नामनो तप कर्यो.

अङ्गान्येकादशाप्येष पूर्वाणि च चतुर्दश । द्विधा चन्द्रायणं न्यूनोदरतादितपो व्यधात् ॥ ३४ ॥

अन्वयः–एकादश अपि अंगानि, च चतुर्दश पूर्वाणि, द्विधा चंद्रायणं, न्यून उदरता आदि तपः व्यधात्. ॥ ३४ ॥

अर्थः–वळी ते मुनिए अग्यार अंगोनो, चौदपूर्वोनो बे प्रकारनो चंद्रायण तप तथा ऊनोदरीआदिक तपो कर्या. ॥ ३४ ॥

अथैका प्रतिपद् द्वे च द्वितीये तिथयोऽखिलाः । यावत्पञ्चदश ज्ञेयाः पूर्णमास्यो निरन्तरम् ॥ ३५ ॥
उपवासैर्विशुद्धाः स्युर्यत्र तत्तप उज्ज्वलम् । व्यातेने मुनिना सर्वसौख्यसंपत्तिनामतः ॥ ३६ ॥युग्मम्॥

अन्वयः–अथ एका प्रतिपद् च द्वे द्वितीये, यावत् पंचदश पूर्णमास्यः अखिलाः तिथयः निरंतरं ज्ञेयाः, ॥ ३५ ॥ यत्र उपवासैः विशुद्धाः स्युः, तत् "सर्व सौख्य संपत्ति" नामतः उज्ज्वल तपः मुनिना व्यातेने. ॥ ३६ ॥ युग्मं ॥

अर्थः–पछी एक एकम, तथा बे बीज, (त्रण त्रीज, चार चोथ) एम छेक पंदर पुनमसुधीनी सघळी तिथिओ निरंतर जाणवी, ॥ ३५ ॥ ए रीतनी सर्व तिथिओए उपवासो करीने तेओने जे तपमां निर्मल करवामां आवे छे, एवो "सर्व सौख्य संपत्ति" नामनो उज्ज्वल तप ते संवरमुनिए कर्यो. ॥ ३६ ॥ युग्मं ॥

जिनानां नव पद्मानि प्रतिपद्मं निरन्तरैः । उपवासैस्तु सोऽष्टाभिश्चक्रे पद्मोत्तरं तपः ॥ ३७ ॥

अन्वयः—जिनानां नव पद्मानि, प्रतिपद्मं निरंतरैः अष्टाभिः उपवासैः सः तु "पद्मोत्तरं" तपः चक्रे. ॥ ३७ ॥

अर्थः—जिनेश्वरप्रभुनां ( देवनिर्मित ) नव कमलो होय छे, तेमाना दरेक कमलने उद्देशीने अंतररहित आठआठ उपवासोवडे करीने ते संवरमुनिए "पद्मोत्तर" नामे तप कर्यो. ॥ ३७ ॥

पञ्चसप्तत्युपवासैः पञ्चविंशतिपारणैः । भद्रनाम तपश्चक्रे स वक्रेतरचेतसा ॥ ३८ ॥

अन्वयः-वक्र इतर चेतसा सः पंचसप्तति उपवासैः, पंचविंशति पारणैः "भद्र" नाम तपः चक्रे ॥ ३८ ॥

अर्थः-वळी सरलचित्तथी ते संवरमुनिए पींचोतेर उपवास, तथा पचीस पारणाओवडे "भद्र" नामनो तप कर्यो. ॥ ३८ ॥

षण्णवत्या शतेनोपवासैः सद्धर्मवासनः । स महाभद्रमेकोनपञ्चाशत्पारणैर्व्यधात् ॥ ३९ ॥

अन्वयः-सद्धर्म वासनः सः शतेन षण्णवत्या उपवासैः एकोन पंचाशत् पारणैः "महाभद्रं" व्यधात् ॥३९॥

अर्थः—उत्तम धर्मनी वासनावाळा ते संवरमुनिए एकसो छन्नु उपवास तथा ओगणपचास पारणाओवडे "महाभद्र" नामनो तप कर्यो. ॥ ३९. ॥

उपवासैरसौ पञ्चसप्तत्या च शतेन च । पारणैः पञ्चविंशत्याभजद्भद्रोत्तरं तपः ॥ ४० ॥

अन्वयः—च अष्टौ शतेन च पंच सप्तत्या उपवासैः, पंचविंशत्या पारणैः " भद्रोत्तरं " तपः अभजत्. ॥ ४० ॥

अर्थः-वळी ते संवरमुनिए एकसो पींचोतेर उपवासोवडे, तथा पचीस पारणाओवडे " भद्रोत्तर " नामनो तप कर्यो. ॥ ४० ॥

**द्विनवत्यधिकेनोपवासानां त्रिशतेन सः । सर्वतोभद्रमेकोनपञ्चाशत्पारणैर्व्यधात् ॥ ४१ ॥**

अन्वयः—सः द्विनवत्यधिकेन उपवासानां त्रिशतेन, एकोन पंचाशत्पारणैः " सर्वतोभद्रं " व्यधात्. ॥ ४१ ॥

अर्थः-( वळी ) ते संवरमुनिए त्रणसो बाणु उपवास, तथा ओगणपचास पारणाओवडे " सर्वतो भद्र " नामनो तप कर्यो. ४१

**षष्ठेनादौ ततः षष्ट्या ह्युपवासैरनारतम् । एकान्तरैर्मुनिर्धर्मचक्रवालं तपोऽतनोत् ॥ ४२ ॥**

अन्वयः—आदौ षष्ठेन, ततः अनारतं एकांतरैः षष्टया उपवासैः मुनिः " धर्म चक्रवालं " तपः अतोनत् ॥ २४ ॥

अर्थः—प्रथम छठ, अने पछी एकीहारे एकांतरीया साठ उपवासोवडे करीने ते मुनिए " धर्मचक्रवाल " नामनो तप कर्यो. ४२

**आचाम्लैरुपवासान्तैरेकाद्येकैकवर्धितैः । शतसंख्यैः स आचाम्लवर्धमानं व्यधात्तपः ॥ ४३ ॥**

अन्वयः-एक आदि एक वर्धितैः उपवास अंतैः शतसंख्यैः आचाम्लैः सः " आचाम्ल वर्धमानं " तपः व्यधात्. ॥ ४३ ॥

अर्थः—एकथी मांडीने एक एकनी वृद्धिवाळां, अने छेल्ले छेल्ले उपवासवाळां, एवां एकसो आंबेलोवडे करीने ते मुनिए " आचाम्ल वर्धमान " नामनो तप कर्यो. ॥ ४३ ॥

**तच्चतुर्दश वर्षाणि त्रिमासीं दिनविंशतिम् । तपः तन्वन्नसौ चक्रे कृशमङ्गं च कर्म च ॥ ४४ ॥**

अन्वयः—चतुर्दश वर्षाणि, त्रिमासीं दिन विंशतिं तत् तपः तन्वन् असौ अंगं च कर्म च कृशं चक्रे. ॥ ४४ ॥

अर्थः-चौद वर्षो, त्रण मास अने वीस दिवसोसुधी ते "आचाम्लवर्धमान" नामनो तप करीने ते मुनिए पोताना शरीरने तथा कर्मोने पण क्षीण करी नाख्यां. ॥ ४४ ॥

**एकदासौ नमस्कृत्य शुभकृत्यप्रकाशकम् । द्वादशभिक्षुप्रतिमावहने पृष्टवान्गुरुम् ॥ ४५ ॥**

अन्वयः-एकदा असौ शुभकृत्य प्रकाशकं गुरुं नमस्कृत्य द्वादश भिक्षु प्रतिमा वहने पृष्टवान्. ॥ ४५ ॥

अर्थः-एक दिवसे ते संवरमुनिए शुभ कार्यो बतावनारा गुरुमहाराजने वांदीने मुनिनी बार प्रतिमाओ वहन करवामाटे पूछयुं.

**दशपूर्वधरो धीरः सारसंहननः शमी । तदसौ योग्य एवास्य दुःकरस्यापि कर्मणः ॥ ४६ ॥**

अन्वयः—असौ दश पूर्वधरः, धीरः, सार संहननः, तत् दुःकरस्य अपि अस्य कर्मणः योग्यः एव. ॥ ४६ ॥

अर्थः-आ संवरमुनि दशपूर्वधारी, धैर्यवान, तथा मजबूत शरीरवाळा छे, तेथी अति मुश्केल एवां पण आ कार्यमाटे ते योग्यजछे,

**इति ध्यात्वा चिरं सिद्धसेनाचार्यस्तमादिशत् । वत्सायमुचितोऽर्थस्ते तद्विधेहि समीहितम् ॥ ४७ ॥**

अन्वयः-इति चिरं ध्यात्वा सिद्धसेन आचार्यः तं आदिशत्, हे वत्स ! अयं अर्थः ते उचितः, तत् समीहितं विधेहि ? ॥४७॥

अर्थः—एम घणा वखत सुधी विचारीने सिद्धसेन आचार्यजीए तेमने कह्युं के, हे वत्स ! ते कार्य तमारेमाटे लायक छे, माटे इच्छामुजब करो ? ॥ ४७ ॥

तदा मुदा गुरून्नत्वानुज्ञाप्य च गणं क्षणात् । गच्छान्निष्क्रम्य तेनाथ प्रारेभे प्रतिमादिमा ॥ ४८ ॥

अन्वयः–अथ तदा गुरून् नत्वा, च गणं अनुज्ञाप्य, गच्छात् निष्क्रम्य तेन मुदा आदिमा प्रतिमा प्रारेभे. ॥ ४८ ॥

अर्थः—पछी तेज वखते गुरुमहाराजने वांदीने, तथा मुनि गणनी रजा लेइने, अने गच्छमांथी निकळीने ते मुनिए हर्षथी पेहेली प्रतिमानो प्रारंभ कर्यो. ॥ ४८ ॥

एकैकां भोजने पाने दत्तिं गृह्णात्यसौ मुनिः । यावन्मासं ततः पूर्णे मासे गच्छेऽविशत्पुनः ॥ ४९ ॥

अन्वयः—असौ मुनिः यावत् मासं भोजने पाने एकैकां दत्तिं गृह्णाति, मासे पूर्णे पुनः गच्छे अविशत्. ॥ ४९ ॥

अर्थः–ते संवरमुनि एक माससुधी आहारनी तथा पाणीनी एकेकी दत्ति ग्रहण करता हता, तथा (एरीते) एक मास संपूर्ण थया-बाद ते पाछा गच्छमां दाखल थया. ॥ ४९ ॥

एवं स दत्तेर्मासस्य वृद्धिमेकैकशोऽकरोत् । तावद्यावदियं सप्तमासैरजनि सप्तमी ॥ ५० ॥

अन्वयः–एवं सः एकैकशः दत्तेः मासस्य तावत् वृद्धिं अकरोत्, यावत् सप्त मासैः इयं सप्तमी अजनि. ॥ ५० ॥

अर्थः—एवी रीते ते मुनिए एकेक दत्तिनी, तथा एकेक मासनी त्यांसुधी वृद्धि करी, के ज्यांसुधीमां सात मासोवडे आ सातमी प्रतिमा पूर्ण थइ. ॥ ५० ॥

एकान्तरोपवासैश्च विहिताचाम्लपारणैः । पानाहारोज्झितैर्ग्रामाद्बहिरुत्तानशायिना ॥ ५१ ॥

निःप्रकम्पेन सर्वोपसर्गवर्गसहिष्णुना । अष्टमी प्रतिमा सप्ताहोरात्रैर्विदधेऽमुना ॥ ५२ ॥ युग्मम् ॥

अन्वयः—-च विहित आचाम्ल पारणैः, पान आहार उज्झितैः, एकांतर उपवासैः, ग्रामाद् बहिः उत्तान शायिना, ॥ ५१ ॥ निःप्रकंपेन, सर्व उपसर्ग सहिष्णुना अमुना सप्त अहोरात्रैः अष्टमी प्रतिमा विदधे. ॥ ५२ ॥ युग्मं ॥

अर्थः—वळी आंबेलना पारणावाळा, पाणी पीवा विनाना, एवा एकांतरीया उपवासोवडे करीने, गामनी बहार चत्ता सूइने, ॥ ५१ ॥ कंप्याविना सर्व उपसर्गो सहन करीने, ते संवरमुनिराजे सात रात्रिदिवसोवडे आठमी प्रतिमा संपूर्ण करी. ॥ ५२ ॥

इत्थं निष्ठागरिष्ठेन प्रतिमा सप्तभिर्दिनैः । उत्कटिकासनस्थेन तेन तेने नवम्यपि ॥ ५३ ॥

अन्वयः—निष्ठा गरिष्ठेन तेन इत्थं उत्कटिक आसन स्थेन सप्तभिः दिनैः नवमी अपि प्रतिमा तेने. ॥ ५३ ॥

अर्थः—नियम पाळवामां उत्कृष्ट एवा ते मुनिराजे उपर कहेली विधिमुजबज गोदोहिका आसने रहीने सात दिवसोवडे नवमी प्रतिमा पण वहन करी. ॥ ५३ ॥

एवं सप्तदिनैरेव दशमी प्रतिमामुना । चक्रे वीरासनस्थेन सध्ध्यानस्थिरचेतसा ॥ ५४ ॥

अन्वयः—एवं सध्ध्यान स्थिर चेतसा अमुना वीर आसनस्थेन सप्त दिनैः एव दशमी प्रतिमा चक्रे. ॥ ५४ ॥

अर्थः—उपर कहेली विधिमुजबज उत्तम ध्यानमां निश्चल मनवाळा ते मुनिराजे वीर आसने रहीने सात दिवसोवडेज दशमी प्रतिमा वहन करी. ॥ ५४ ॥

कृत्वा षष्ठमहोरात्रं स्थित्वा वीरासने ध्रुवे । प्रतिमैकादशी चक्रे तेन लम्बितपाणिना ॥ ५५ ॥

अन्वयः—षष्ठं कृत्वा, अहोरात्रं ध्रुवे वीरासने स्थित्वा लंबित पाणिना तेन एकादशी प्रतिमा चक्रे. ॥ ५५ ॥

अर्थः—( वळी ) छठ्ठ करीने, तथा रातदहाडो निश्चल वीरआसने रहीने, अने बन्ने हाथो लांबा राखीने ते मुनिराजे अग्यारमी प्रतिमा वहन करी. ॥ ५५ ॥

कृताष्टमः स संकोच्य पादौ लम्बकरः स्थिरः । चक्रे मुक्तिशिलादृष्टिर्द्वादशीमेकरात्रिकीम् ॥ ५६ ॥

अन्वयः—कृत अष्टमः, पादौ संकोच्य लंबकरः, स्थिरः, मुक्ति शिला दृष्टिः सः एक रात्रिकीं द्वादशीं चक्रे. ॥ ५६ ॥

अर्थः-( पछी ) अट्ठम करीने, बन्ने पग संकोचीने, हाथ लांबा राखीने, निष्कंप रहीने, तथा सिद्धशिलातरफ दृष्टि राखीने ते मुनिए एकरात्रिना परिमाणवाळी बारमी प्रतिमा वहन करी. ॥ ५६ ॥

इत्थं यथोक्तविधिना तप्यमानोऽद्भुतं तपः । विजहार महीपीठे सोऽनल्पैः कल्पकल्पनैः ॥ ५७ ॥

अन्वयः-इत्थं यथोक्त विधिना अद्भुतं तपः तप्यमानः सः अनल्पैः कल्प कल्पनैः महीपीठे विजहार. ॥ ५७ ॥

अर्थः—ए रीते आगमोमां कह्यामुजब विधिपूर्वक आश्चर्यकारी तप तपता एवा ते संवरमुनिराज अनेकप्रकारना साधुआचारोने पाळताथका पृथ्वी तलपर विहार करवा लाग्या. ॥ ५७ ॥

अथैकदा पदाम्भोजद्वयं सूरेरयं मुनिः । प्रणम्य शिरसि न्यस्य पाणी वाणीमिमां जगौ ॥ ५८ ॥

अन्वयः-अथ एकदा अयं मुनिः सूरेः पद अंभोज द्वयं प्रणम्य शिरसि पाणी न्यस्य इमां वाणीं जगौ. ॥ ५८ ॥

अर्थः-पछी एक दिवसे ते संवरमुनिराज आचार्यमहाराजना बन्ने चरणकमलोने नमीने, तथा मस्तकपर हाथ जोडीने आवी वाणी बोल्या. ॥ ५८ ॥

**अनन्यदेयसद्धर्मबोधदायक नायक । जिनकल्पकृतेऽनुज्ञां यच्छ योग्योऽस्मि यद्यहम् ॥ ५९ ॥**

अन्वयः—हे अनन्य देय सद्धर्म बोध दायक! हे नायक! यदि अहं योग्यः अस्मि, जिनकल्प कृते अनुज्ञां यच्छ? ॥५९॥

अर्थः—हे अनुपम देवालायक उत्तम धर्मनो बोध देनारा! तथा हे स्वामी! जो हुं लायक होउं, तो (मने) जिनकल्पी विहारमाटे आज्ञा आपो? ॥ ५९ ॥

**श्रुतज्ञानाम्बुधिर्जानन्नाराधकममुं गुरुः । आदिशज्जिनकल्पाय मुक्तिश्रीकल्पभूरुहे ॥ ६० ॥**

अन्वयः—श्रुत ज्ञान अंबुधिः गुरुः अमुं आराधकं जानन् मुक्ति श्री कल्प भूरुहे जिनकल्पाय आदिशत्. ॥ ६० ॥

अर्थः—श्रुत ज्ञानना महासागरसरखा गुरु महाराजे ते संवर मुनिराजने आराधक जाणीने, मोक्षलक्ष्मी (मेळववामाटे) कल्पवृक्षसरखा, एवा जिनकल्पी विहारमाटे (तेमने) आज्ञा आपी. ॥ ६० ॥

**अथैष नवतत्त्वज्ञः सत्त्वभाजां शिरोमणिः । लब्धत्रिजगतीराज्यमिवात्मानममन्यत ॥ ६१ ॥**

अन्वयः—अथ नव तत्त्वज्ञः, सत्त्वभाजां शिरोमणिः एषः लब्ध त्रिजगती राज्यं इव आत्मानं अमन्यत. ॥ ६१ ॥

अर्थः—पछी नव तत्त्वोना जाणकार, तथा पराक्रमीओमां अग्रेसर एवा ते मुनिराज, जाणे त्रण जगतनुं राज्य मळयुं होय नही! तेम पोताने मानवा लाग्या. ॥ ६१ ॥

**अथ निर्मलचारित्रो वस्त्रपात्रादिकं मुदा । गुरोः पुरोऽखिलं मुक्त्वा परिपृच्छय परिच्छदम् ॥ ६२ ॥**
**निःससार महासारः सैष सूरेः समीपतः । हन्तुं कर्मततीः कुम्भिपङ्क्तीरिव हरिर्गिरेः ॥६३॥युग्मम्॥**

अन्वयः—अथ निर्मल चारित्रः मुदा वस्त्र पात्र आदिकं अखिलं गुरोः पुरः मुक्त्वा, परिच्छदं परिपृच्छय, ॥ ६२ ॥ महासारः सः एषः, कुंभि पंक्तीः हंतुं गिरेः हरिः इव, कर्मततीः (हंतुं) सूरेः समीपतः निःससार. ॥ ६३ ॥ युग्मं ॥

अर्थः—पछी निर्मल चारित्रवाळा ते हर्षथी वस्त्र, पात्र आदिक सघळां उपकरणो गुरुमहाराज पासे मूकीने, तथा परिवारनी आज्ञा लइने, ॥ ६२ ॥ महापराक्रमी, एवा ते संवरमुनि, हाथीओनी श्रेणिने मारवामाटे पर्वतमांथी जेम सिंह निकळे, तेम कर्मोनी श्रेणिने (हणवामाटे) आचार्यपासेथी निकळ्या! ॥ ६३ ॥ युग्मं ॥

**चरन्मार्गेऽपवर्गस्य वल्गद्विषयतस्करे । तपोधनोऽयमस्तेऽर्के न पदात्पदमप्यदात् ॥ ६४ ॥**

अन्वयः—वल्गत् विषय तस्करे अपवर्गस्य मार्गे चरन् अयं तपोधनः अर्के अस्ते पदात् पदं अपि न अदात्. ॥ ६४ ॥

अर्थः—ज्यां विषयोरूपी चोरो भमी रह्या छे, एवा मोक्षमार्गमां विचरता आ तपोधन संवरमुनि, सूर्य अस्त थयाबाद (पोताना) स्थानेथी एक पगलुं पण ( आगळ ) चालता नही. ॥ ६४ ॥

कृतार्द्रवैरः क्रूरेण सह मोहमहीभुजा । तस्थौ नैकत्र कुत्रापि सोऽयमुद्यच्छवौ रवौ ॥ ६५ ॥

अन्वयः–क्रूरेण मोह महीभुजा सह कृतार्द्र वैरः सः अयं उद्यत् छवौ रवौ कुत्र अपि एकत्र न तस्थौ. ॥ ६५ ॥

अर्थः—क्रूर एवा मोहराजासाथे करेल छे दृढ वैर जेणे, एवा ते मुनिराज सूर्य उग्याबाद क्यांयें पण एक स्थानके रहेता नही.

स जाग्रत्कर्मसंग्रामव्यग्रीभूतमना इव । उद्दध्रे पदयोर्भग्नान्नोत्कटानपि कण्टकान् ॥ ६६ ॥

अन्वयः–जाग्रत् कर्म संग्राम व्यग्रीभूत मनाः इव सः पदयोः भग्नान् उत्कटान् कंटकान् अपि न उद्दध्रे. ॥ ६६ ॥

अर्थः—कर्मोरूपी शत्रुओसाथे आदरेली लडाइमांज जाणे (पोतानुं) मन परोवायुं होय नही! तेम ते मुनिराजे (पोताना) पगोमां भांगेला तीक्ष्ण कांटाओ पण कहाड्या नही. ॥ ६६ ॥

उदासीन इवास्थानकृतरागापराधयोः । चकर्ष चक्षुपोरेष न तृणं न रजःकणम् ॥ ६७ ॥

अन्वयः–अस्थान कृत राग अपराधयोः चक्षुषोः उदासीनः इव एषः तृणं रजः कणं न चकर्ष. ॥ ६७ ॥

अर्थः–अयोग्य स्थाने करेला रागरूपी अपराधवाळा बन्ने चक्षुओप्रते जाणे बेदरकार थया होय नहीं! एवा ते मुनिराजे तेमांथी तणखलुं के रजनो कण (पण) कहाड्यां नही. ॥ ६७ ॥

आसन्नविलसन्मुक्तिवधूलीनमना इव । चरन्मार्गं न तत्याज तीव्रकर्करमप्यसौ ॥ ६८ ॥

अन्वयः—आसन्न विलसत् मुक्ति वधू लीन मनाः इव, असौ मार्गं चरन् तीव्र कर्करं अपि न तत्याज. ॥ ६८ ॥

अर्थः-नजीक आवती एवी मुक्तिरूपी स्त्रीमां जाणे आसक्त मनवाळा थया होय नही! तेम ते मुनिराजे मार्गे चालतां तीक्ष्ण कांकराने पण तज्यो नही. ॥ ६८ ॥

स्वदेहेऽपि निरीहोऽयमिति शुद्धमतिर्यतिः । पुरः स्फुरति सिंहेऽपि सहजां नात्यजद्गतिम् ॥ ६९ ॥

अन्वयः-इति स्व देहे अपि निरीहः अयं शुद्धमतिः यतिः पुरः सिंहे स्फुरति अपि सहजां गतिं न अत्यजत्. ॥ ६९ ॥

अर्थः—एरीते पोताना शरीरनी पण ममताविनाना आ निर्मल बुद्धिवाळा मुनिए आगळ सिंह आवीने उभो रहेतां पण (पोतानी) स्वाभाविक गतिनो त्याग कर्यो नही. ॥ ६९ ॥

कदाचित्क्वचिदौचित्यचतुरैर्ढौकितं नरैः । स धीरस्तुषसौवीरतक्राद्यं त्याज्यमग्रहीत् ॥ ७० ॥

अन्वयः—सः धीरः कदाचित् क्वचित् औचित्य चतुरैः नरैः ढौकितं, त्याज्यं तुष सौवीर तक्राद्यं अग्रहीत्. ॥ ७० ॥

अर्थः—ते धैर्यवान संवरमुनि कोइक समये, क्यांक योग्यतामां निपुण, एवा पुरुषोए आपेलां, अने फेंकी देवालायक, एवां (धान्यनां) फोतरांनी कांजी अथवा छाशआदिक (आहारमाटे) ग्रहण करता. ॥ ७० ॥

एवमप्रतिबद्धेन स्वविहारक्रमेण सः । प्रतिकर्मविमुक्ताङ्गो निन्ये धात्रीं पवित्रताम् ॥ ७१ ॥

अन्वयः—एवं अप्रतिबद्धेन स्वविहार क्रमेण प्रतिकर्म विमुक्त अंगः सः धात्रीं पवित्रतां निन्ये. ॥ ७१ ॥

अर्थः—एरीते पोताना अस्खलित विहारना क्रमथी, शरीरमाटे कोइ पण जातनी दरकार राख्याविना, ते मुनिराज पृथ्वीने पा-

वन करवा लाग्या. ॥ ७१ ॥

एवं विहरतस्तस्य गते काले कियत्यपि । अभूल्लाभान्तरायस्योदयः कश्चन कर्मणः ॥ ७२ ॥

अन्वयः-एवं विहरतः तस्य कियति अपि काले गते लाभ अंतरायस्य कर्मणः कश्चन उदयः अभूत्. ॥ ७२ ॥

अर्थः-एरीते विहार करतांथकां ते मुनिराजने केटलोक समय वीत्याबाद लाभांतराय कर्मनो कोइक उदय प्रगट थयो. ॥७२॥

क्वचिन्न लभते भिक्षामकल्प्यां क्वापि नेच्छति । कल्प्यमानामपि क्वापि नादत्तेऽन्यैरपेक्षिताम् ॥७३॥

अन्वयः-क्वचित् भिक्षां न लभते, क्व अपि अकल्प्यां न इच्छति, क्व अपि कल्प्यमानां अपि अन्यैः अपेक्षितां न आदत्ते.

अर्थः—तेमने क्यांक भिक्षा मलतीज नथी, वळी क्यांक न कल्पे एवी होवाथी ते माटे ते इच्छा करता नथी, वळी क्यांक कल्पे एवी होवा छतां पण, ने बीजा भिक्षुओमाटेनी होवाथी, तेवी भिक्षा पण ते लेता नथी. ॥ ७३ ॥

इत्थं यथा यथा क्लिष्टो हृष्टः सोऽभूत्तथा तथा । क्षयो हि कर्मणां मङ्क्षु मुनीनामुत्सवो महान् ॥७४॥

अन्वयः-इत्थं सः यथा यथा क्लिष्टः तथा तथा हृष्टः अभूत्. हि कर्मणां क्षयः मंक्षु मुनीनां महान् उत्सवः. ॥ ७४ ॥

अर्थः—एरीते ते मुनिराजने जेम जेम परीषह थतो गयो, तेम तेम ते खुशी थवा लाग्या, केमके कर्मोनो क्षय, ए खरेखर मुनिओने महान् उत्सवरूप थइ पडे छे. ॥ ७४ ॥

अस्योद्यतविहारस्य निराहारस्य सर्वथा । सत्तामात्रशरीरस्य षण्मासा व्यतिचक्रमुः ॥ ७५ ॥

अन्वयः—उद्यत विहारस्य, सर्वथा निराहारस्य, सत्ता मात्र शरीरस्य अस्य षण्मासाः व्यतिचक्रमुः. ॥ ७५ ॥

अर्थः—उग्र विहारवाळा, तथा बिलकुल आहारविनाना, अने फक्त हयातिरूपज शरीरवाळा, एवा ते मुनिराजना (एरीते) छ मासो व्यतित थया. ॥ ७५ ॥

**कदापि क्वापि कान्तारे दिनान्ते शान्तचेतनः । तस्थौ धर्मद्विपालानस्तम्भायिततनुर्मुनिः ॥ ७६ ॥**

अन्वयः—कदापि क अपि कांतारे दिनांते शांत चेतनः, धर्म द्विप आलान स्तंभायित तनुः मुनिः तस्थौ. ॥ ७६ ॥

अर्थः—एक दिवसे क्यांक वनमां सूर्यास्त समये शांत मनवाळा, तथा धर्मरूपी हाथीने बांधवाना स्तंभसरखा (निश्चल) शरीरवाळा ते मुनि उभा रह्या. ॥ ७६ ॥

**संसारतापनिर्वापसज्जपीयूषमज्जनम् । अथ प्रापदयं कायोत्सर्गध्यानलयं मुनिः ॥ ७७ ॥**

अन्वयः—अथ अयं मुनिः संसार ताप निर्वाप सज्ज पीयूष मज्जनं कायोत्सर्ग ध्यान लयं प्रापत्. ॥ ७७ ॥

अर्थः—पछी ते संवरमुनि संसारना तापने मटाडवामाटे तैयार थयेल छे अमृतनुं स्नान जेमां, एवा कायोत्सर्गना ध्याननी लीनताने प्राप्त थया. ॥ ७७ ॥

**ततो नखंपचीभूतभूतलक्षोदमण्डलः । तं कोऽप्यतापयत्तापो निशीथसमये महान् ॥ ७८ ॥**

अन्वयः–ततः निशीथ समये नखंपचीभूत भूतल क्षोद मंडलः कः अपि महान् तापः तं अतापयत्. ॥ ७८ ॥

अर्थः—पछी मध्यरात्रिसमये नखोने पण बाळी नाखे एवो थयेल छे पृथ्वीपरनो धूलिनो समूह जेनाथी, एवो कोइक विचित्र प्रकारनो अत्यंत ताप ते मुनिराजने तपाववा लाग्यो. ॥ ७८ ॥

**किमेतदित्ययं यावद्विभावयति फुल्लदृक् । ललाटंतपतेजस्कं तपनं तावदैक्षत ॥ ७९ ॥**

अन्वयः—एतत् किं ? इति यावत् अयं फुल्लदृक् विभावयति, तावत् ललाटंतप तेजस्कं तपनं ऐक्षत. ॥ ७९ ॥

अर्थः—आ ते शुं ? एम विचारी जेवामां ते आंखो उघाडीने जुए छे, तेवामां ललाटने तपावी मूके एवा ( तीव्र ) तेजवाळा सूर्यने ( तेमणे ) जोयो. ॥ ७९ ॥

**पुरस्तुङ्गतरुस्तोमच्छायालीनामलोकत । भुञ्जानजनसंतानामसौ शकटमण्डलीम् ॥ ८० ॥**

अन्वयः—पुरः तुंग तरु स्तोम च्छाया लीनां, भुंजान जन संतानां शकट मंडलीं असौ अलोकत. ॥ ८० ॥

अर्थः—वळी आगळना भागमां उंचां वृक्षोना समूहोनी छायामां छुपायेली, तथा भोजन करती छे लोकोनी पंक्ति ज्यां, एवी गाडीओनी श्रेणिने ते मुनिराजे दीठी. ॥ ८० ॥

**विहातुमुध्धृतं दग्धमन्नं तन्मध्यगो नरः । तदैवात्युत्सुको निर्यन्नरेणान्येन भाषितः ॥ ८१ ॥**

अन्वयः—तन्मध्यगः नरः तदा एव उध्धृतं दग्धं अन्नं विहातुं अति उत्सुकः निर्यन् अन्येन नरेण भाषितः. ॥ ८१ ॥

अर्थः—लोकोना ते समूहमानो (कोइ एक ) पुरुष तेज वखते, वधेलुं, अने बळी गयेलुं अन्न फेंकी देवाने अति उतावळथी

बहार निकळयो, (त्यारे) बीजा (कोइ एक) पुरुषे (तेने) कह्युं के, ॥ ८१ ॥

**अस्मिन्महामुनौ मुक्तविकल्पे जिनकल्पिनि । कल्प्यमन्नमिदं देहि भिक्षाकालो हि संप्रति ॥ ८२ ॥**

अन्वयः—मुक्त विकल्पे जिनकल्पिनि अस्मिन् महामुनौ इदं कल्प्यं अन्नं देहि? हि संप्रति भिक्षाकालः. ॥ ८२ ॥

अर्थः—(कोइ पण जातना) विकल्पविनाना, तथा जिनकल्पीनी क्रिया करनारा एवा आ महामुनिराजने कल्पे एवुं आ अन्न आप? केमके आ वखते भिक्षा आपवानो समय छे. ॥ ८२ ॥

**दग्धेनान्नेन दत्तेन क्रीणासि सुकृतं न किम् । कृष्णाङ्गारेण किं लभ्यमानो नादीयते मणिः ॥ ८३ ॥**

अन्वयः-दग्धेन अन्नेन दत्तेन सुकृतं किं न क्रीणासि? कृष्ण अंगारेण लभ्यमानः मणिः किं न आदीयते? ॥ ८३ ॥

अर्थः—( आ ) बळेलुं अन्न आपीने ( तेना बदलामां तुं ) पुण्यने शामाटे खरीदतो नथी? ( केमके ) कोलसाने बदले मळतुं मणि शामाटे न लेइयें? ॥ ८३ ॥

**इत्यस्य वाक्यमाकर्ण्य प्रहृष्यन्पुलकाञ्चितः । इदं प्रभो गृहाणेति सोऽन्नहस्तोऽभ्यधान्मुनिम् ॥ ८४ ॥**

अन्वयः-इति अस्य वाक्यं आकर्ण्य प्रहृष्यन् पुलक अंचितः सः ( हे ) प्रभो! इदं गृहाण? इति अन्नहस्तः मुनिं अभ्यधात्.

अर्थः-एवीरीतनुं तेनुं वचन सांभळीने खुशी थतो, तथा रोमांचित थयेलो ते पुरुष, हे भगवन्! आ ग्रहण करो? एम हाथमां अन्न लेइने ते संवर मुनिने कहेवा लाग्यो. ॥ ८४ ॥

**अथ साधुः सुधीर्दध्यौ किमियं मे प्रमत्तता । न ज्ञाता यामिनो यान्ती न व्योमान्तर्व्रजन्रविः ॥८५॥**

अन्वयः-अथ सुधीः साधुः दध्यौ, इयं किं मे प्रमत्तता? यांती यामीनी न ज्ञाता, व्योमांतः व्रजन् रविः न! ॥ ८५ ॥

अर्थः-त्यारे उत्तम बुद्धिवान् ते संवरमुनि विचारवा लाग्या के, आ ते शुं मने प्रमाद थयो! के, चाली जती रात्रिने हुं जाणी शक्यो नही! तेमज आकाशमां विचरता सूर्यने पण हुं जाणी शक्यो नहि! ॥ ८५ ॥

**स्वप्नोऽयमिन्द्रजालं वा किं वा कोऽपि मतिभ्रमः । चक्रे देवेन केनापि माया मायाविनाथवा ॥ ८६ ॥**

अन्वयः-किं अयं स्वप्नः वा इन्द्रजालं? वा कः अपि मतिभ्रमः! अथवा केन अपि मायाविना देवेन माया चक्रे! ॥ ८६ ॥

अर्थः-( माटे ) शुं आ स्वप्न छे? अथवा इन्द्रजाल छे? अथवा कोइ जातनो बुद्धिभ्रम छे! अथवा कोइक कपटी देवे ( शुं ) आ माया विकुर्वि छे! ॥ ८६ ॥

**किमनल्पैर्विकल्पैर्वा ममैभिर्निर्ममात्मनः । संदेहे सति देहार्थं न गृह्णेऽन्नमिदं ध्रुवम् ॥ ८७ ॥**

अन्वयः— वा निर्मम आत्मनः मम एभिः अनल्पैः विकल्पैः किं? संदेहे सति देहार्थं ध्रुवं इदं अन्नं न गृह्णे. ॥ ८७ ॥

अर्थः-अथवा ममतारहित आत्मावाळा एवा मने आवा अनेक विकल्पो (करवानी) शुं जरुरछे? संशय पडवाथी शरीरमाटे खरेखर आ आहार हुं ग्रहण करीश नही. ॥ ८८ ॥

**इति निश्चित्य शुद्धात्मा स पटुः प्राह तौ प्रति । शमामृतसमुद्रोर्मिच्छटाभिर्वर्णराजिभिः ॥ ८८ ॥**

अन्वयः-इति निश्चित्य शुद्ध आत्मा सः पटुः तौ प्रति शम अमृत समुद्र ऊर्मि च्छटाभिः वर्ण राजिभिः प्राह. ॥ ८८ ॥

अर्थः—एम निश्चय करीने निर्मल आत्मावाळा ते चतुर मुनिराज ते बन्ने पुरुषो प्रते शांतिरूपी अमृतसागरना मोजांओसरखी अक्षरोनी पंक्तिवडे कहेवा लाग्या के, ॥ ८८ ॥

**मया ध्यानं निशारम्भे समारेभेऽधुनैव च । अधुनैव च तिग्मांशुश्चरत्यम्बरशेखरः ॥ ८९ ॥**

अन्वयः-मया च अधुना एव निशा आरंभे ध्यानं समारेभे, च अधुना एव अंबर शेखरः तिग्मांशुः चरति. ॥ ८९ ॥

अर्थः—में तो हमणाज रात्रिना प्रारंभसमये ध्याननो प्रारंभ कर्यो छे, अने ( एटलामां ) हमणाज आकाशना मुकुट जेवो ( आ ) सूर्य (केम) विचरी रह्यो हशे ! ॥ ८९ ॥

**तत्सत्योऽयमसत्यो वाभ्युदयः कर्मसाक्षिणः । इति संदेहदोलार्तमना नैवान्नमादंदे ॥ ९० ॥ युग्मम् ॥**

अन्वयः-तत् कर्मसाक्षिणः अयं अभ्युदयः सत्यः वा असत्यः ? इति संदेह दोला आर्त मनाः अन्नं नैव आददे. ॥९०॥ युग्मं ॥

अर्थः-माटे सूर्यनो आ उदय साचो छे ? के खोटो छे ? एरीते संशयथी हींचोळातां मनवाळो (हुं आ) अन्न बिलकुल लेइश नही.

**गिरेरधिकमाहारं पयोधेरधिकं पयः । जीवोऽग्रहीदहोरात्रमज्ञातेषु भवेष्वपि ॥ ९१ ॥**

अन्वयः—जीवः अज्ञातेषु भवेषु अहोरात्रं गिरेः अधिकं आहारं, पयोधेः अधिकं पयः अपि अग्रहीत्. ॥ ९१ ॥

अर्थः—( आ ) जीवे अज्ञानी भवोमां रातदहाडो पर्वतथी अधिक आहार, तथा महासागरथी अधिक जल पण ग्रहण करेलां छे.

तत्तैर्यदि न तृप्तोऽस्मि तदन्नेनामुनाद्य किम् । यास्यामि तृप्तिमात्तेन दिवसस्यापि संशये ॥ ९२ ॥

अन्वयः–तत् तैः यदि न तृप्तः अस्मि, तत् अद्य दिवसस्य अपि संशये अमुना अन्नेन आत्तेन किं तृप्तिं यास्यामि ? ॥९२ ॥

अर्थः–माटे तेथी ज्यारे हुं तृप्त थयो नथी, तो आजे दिवसनो पण संदेह होवाथी आ आहार लेइने हुं केम तृप्ति पामी शकीश ?

इत्युदीर्य तपोवीर्यवर्यो धैर्यधुरन्धरः । स यावल्लीयते ध्याने शुद्धश्रद्धानमानसः ॥ ९३ ॥

न तावदनसां राजी न च राजीवबान्धवः । किंतु व्यलोकि मुनिना यथावस्था निशीथिनी ॥९४॥युग्मं.

अन्वयः–इति उदीर्य तपः वीर्य वर्यः, धैर्य धुरंधरः, शुद्ध श्रद्धान मानसः सः यावत् ध्याने लीयते, ॥ ९३ ॥ तावत् अनसां राजी न, च राजीव बांधवः न, किंतु मुनिना यथावस्था निशीथिनी व्यलोकि. ॥ ९४ ॥ युग्मं ॥

अर्थः—एम कहीने तपना वीर्यथी उत्तम, तथा धैर्यवडे अग्रेसर, अने निर्मल श्रद्धायुक्त हृदयवाळा ते संवरमुनि जेवामां ध्यानमां लीन थाय छे, ॥ ९३ ॥ तेवामां (त्यां) ते गाडीओनी श्रेणि नहोती, अने सूर्य पण अदृश्य थइ गयो, परंतु ते मुनिए यथास्थितपणे मध्यरात्रि जोइ. ॥ ९४ ॥

तदैव दैवते मार्गे दूरं दुन्दुभयोऽनदन् । शुद्धगन्धोदकैर्मिश्राः प्रसस्रुः पुष्पवृष्टयः ॥ ९५ ॥

अन्वयः—तदा एव दैवते मार्गे दूरं दुंदुभयः अनदन्, शुद्ध गंध उदकैः मिश्राः पुष्पवृष्टयः प्रसस्रुः. ॥ ९५ ॥

अर्थः—(वळी) तेज वखते आकाशमां दूरथी दिव्य वाजित्रो वागवा लाग्यां, तथा निर्मल सुगंधि जलथी मिश्र थयेली पुष्पोनी

वृष्टिओ पडवा लागी. ॥ ९५ ॥

**लीलाचलज्झलत्कारतारमाणिक्यकुण्डलः । आस्येन्दुस्यन्दिपीयूषबिन्दुसुन्दरहारभृत् ॥ ९६ ॥**

**मौलिन्यस्तकरद्वन्द्वद्विगुणीकृतशेखरः । एनमेनश्छिदं कश्चिदमरो मुनिमानमत् ॥ ९७ ॥ युग्मम् ॥**

अन्वयः—लीला चलत् झलत्कार तार माणिक्य कुंडलः, आस्य इंदु स्यंदि पीयूष बिंदु सुंदर हारभृत्, ॥ ९६ ॥ मौलि न्यस्त कर द्वंद्व द्विगुणीकृत शेखरः कश्चित् अमरः एनं एनः छिदं मुनिं आनमत्. ॥ ९७ ॥ युग्मं ॥

अर्थः—स्वभावथी चपल अने चळकाटवाळा मनोहर माणिक्यना कुंडलोवाळो, तथा मुखरूपी चंद्रमांथी झरता अमृतना बिंदुओथी मनोहर थयेला हारने धारण करनारो, ॥९६॥ अने मस्तकपर धारण करेला बन्ने हाथोवडे बेवडा करेला मुकुटवाळो, एवो कोइक देव आ पापोने विनाश करनारा मुनिराजने (आवी) नम्यो. ॥ ९७ ॥ युग्मं ॥

**प्रभो जय जय प्रौढज्ञानशुद्धतपोनिधे । यस्त्वं मयापि दुष्टेन सत्त्वं न त्याजितः क्वचित् ॥ ९८ ॥**

अन्वयः—दुष्टेन अपि मया यः क्वचित् सत्त्वं न त्याजितः, (हे) प्रभो! (हे) प्रौढ ज्ञान शुद्ध तपः निधे! त्वं जय जय?

अर्थः-(तथा कहेवा लाग्यो के) दुष्ट एवो पण हुं जेमनुं क्यांयें पण सत्त्व तजावी शक्यो नही, एवा हे भगवन्! तथा हे विशाल ज्ञानयुक्त निर्मल तपना भंडारसरखा! एवा तमो जय पामो? जय पामो? ॥ ९८ ॥

सुधर्मायां सुधर्मात्मा निविष्टो हृष्टमानसः । कदाप्यकस्मात्पुलकी न्यधान्मूर्ध्नि हरिः करौ ॥ ९९ ॥

अन्वयः-कदापि सुधर्मायां निविष्टः, सुधर्मात्मा, हृष्ट मानसः हरिः अकस्मात् पुलकी करौ मूर्ध्नि न्यधात्. ॥ ९९ ॥

अर्थः—एक दिवसे सुधर्मासभामां बेठेला, उत्तम धर्ममय आत्मावाळा, तथा आनंदित हृदयवाळा, एवा इंद्रे अचानक रोमांचित थइने ( पोताना ) बन्ने हाथ मस्तकपर धारण कर्या. ॥ ९९ ॥

तव कौतस्कुतः स्वामिन्नद्य हर्षोऽयमीदृशः । इति पृष्टोऽम्बराख्येन सुरेण द्युपतिर्जगौ ॥ १५०० ॥

अन्वयः—(हे) स्वामिन्! अद्य तव अयं ईदृशः हर्षः कौतस्कुतः? इति अंबर आख्येन सुरेण पृष्टः द्युपतिः जगौ. ॥१५००॥

अर्थः-हे स्वामी! आजे आपने आ आवडोबधो हर्ष शानो थयो छे? एम अंबरनामना देवे पूछवाथी इन्द्रे कह्युं के, ॥ १५००॥

किं कोऽप्यस्ति तपःपात्रं धरित्रीपीठपावनः । इत्यद्य भरतक्षेत्रे हृन्नेत्रेण गतं मया ॥ १ ॥

अन्ववः—किं धरित्री पीठ पावनः कः अपि तपःपात्रं अस्ति? इति अद्य हृद् नेत्रेण मया भरतक्षेत्रे गतं ॥ १ ॥

अर्थः—शुं पृथ्वीतलने पवित्र करनारा एवा कोइ पण महातपस्वी मुनि विद्यमान छे? एम विचारी हुं हृदयरूपी नेत्रवडे भरतक्षेत्रमां गयो, (अर्थात् ज्ञानचक्षुवडे में भरतक्षेत्रमां निरीक्षण कर्युं.) ॥ १ ॥

मुनीन्दुः संवरो नाम तत्र भूखण्डभूषणम् । अदर्शि तपसां राशिस्तिग्मांशुरिव तेजसाम् ॥ २ ॥

अन्वयः—तत्र तेजसां राशिः, भूखंड भूषणं तिग्मांशुः इव तपसां राशिः संवरो नाम मुनींदुः अदर्शि. ॥ २ ॥
अर्थः—त्यां तेजना समूहरूप, अने भूमंडलना अलंकाररूप सूर्य सरखा, तपना समूहवाळा संवरनामना मुनिचंद्रने में जोया.

तस्य विश्वैकवन्द्यस्य दाढर्यं तपसि दुष्करे । पश्यतो मे मुदावेशः सर्वक्लेशहरोऽभवत् ॥ ३ ॥

अन्वयः–विश्व एक वंद्यस्य तस्य दुष्करे तपसि दाढर्यं पश्यतः मे सर्व क्लेश हरः मुद् आवेशः अभवत्. ॥ ३ ॥
अर्थः—जगतने एक पूजवा लायक एवा ते मुनिराजनुं दुष्कर तपमां पण निश्चलपणुं जोता एवा मने सर्व क्लेशोने हरनारो हर्षनो उभरो आव्यो. ॥ ३ ॥

केनापि चाल्यते नायं सत्त्वात्तत्त्वविदां वरः । इत्युत्कर्षेण हर्षस्य मयास्य प्रणतिः कृता ॥ ४ ॥

अन्वयः—तत्त्वविदां वरः अयं केन अपि न चाल्यते, इति हर्षस्य उत्कर्षेण मया अस्य प्रणतिः कृता. ॥ ४ ॥
अर्थः—तत्वज्ञानीओमां श्रेष्ठ एवा आ मुनि कोइथी पण चलायमान थइ शके तेम नथी, एम विचारतां हर्षना उभराथी में तेमने नमस्कार कर्यो. ॥ ४ ॥

सोऽथ क्रुधाभ्यधादिन्द्रमिन्द्रसामानिकः सुरः । मर्त्यो न चाल्यते सत्त्वादेषा भाषा मृषा तव ॥ ५ ॥

अन्वयः–अथ इंद्रसामानिकः सः सुरः क्रुधा अभ्यधात्, मर्त्यः सत्त्वात् न चाल्यते, एषा तव भाषा मृषा. ॥ ५ ॥
अर्थः—पछी इंद्रसामानिक एवो ते अंबरदेव क्रोधथी बोल्यो के, मनुष्यने (तेना) सत्त्वथी चलायमान न करी शकाय, ए

तमारुं वचन जूठुं छे. ॥ ५ ॥

स्वेच्छया स्वाम्यतः स्वामी वदन्केनेह वार्यते । तं षण्मासान्तरे सत्त्वभ्रष्टं स्पष्टं करोम्यहम् ॥ ६ ॥

अन्वयः—स्वाम्यतः स्वेच्छया वदन् स्वामी इह केन वार्यते ? अहं तं षण्मासांतरे स्पष्टं सत्त्वभ्रष्टं करोमि. ॥ ६ ॥

अर्थः-(पोताना) उपरीपणाथी पोतानी मरजीमुजब बोलता एवा मालीकने अहीं कोण अटकावी शके ? (परंतु) हुं ते मुनिने छ मासनी अंदर प्रगटपणे प्रतिज्ञाभंग करनारो छुं. ॥ ६ ॥

असाविति प्रतिज्ञाय सत्त्वभङ्गाय तेऽचलत् । मुहुर्मुहुर्महेन्द्रेण वार्यमाणोऽपि मूढधीः ॥ ७ ॥

अन्वयः-इति प्रतिज्ञाय मूढधीः असौ महेंद्रेण मुहुः मुहुः वार्यमाणः अपि ते सत्त्व भंगाय अचलत्. ॥ ७ ॥

अर्थः—एरीतनी प्रतिज्ञा करीने मूर्खबुद्धिवाळो ते अंबरदेव इन्द्रे वारंवार निवार्यो छतां पण तमारो नियमभंग करवामाटे चाल्यो,

स्वपुण्यनिवहस्येव स भिक्षाग्रहणेषु ते । प्रत्यूहव्यूहमत्युग्रं धिक् षण्मासावधिं व्यधात् ॥ ८ ॥

अन्वयः—धिक्, सः स्व पुण्य निहवस्य इव ते भिक्षा ग्रहणेषु षण्मासावधिं अत्युग्रं प्रत्यूहव्यूहं व्यधात्. ॥ ८ ॥

अर्थः-धिक्कार छे ! के तेणे पोताना पुण्योना समूहनीपेठे, तमोने भिक्षा लेवामां छ माससुधी अति प्रचंड विघ्नोनो समूह कर्यो.

निशि पापेन तेनेह तेने मायामयो रविः । सभोज्यजनसंघट्टा शकटानां घटा पुनः ॥ ९ ॥

अन्वयः—तेन पापेन इह निशि मायामयः रविः, पुनः सभोज्य जन संघट्टा शकटानां घटा तेने. ॥ ९ ॥

अर्थः—(वळी) ते पापी देवे अहीं रात्रिए कपटमय सूर्य, तथा भोजन करता मनुष्योना समूहवाळी गाडीओनी श्रेणि विस्तारी हती. ॥ ९ ॥

**महाकपटनाटयेन नानेनाप्यसि चालितः । यद्वा संसारनाटयेनाचालितः केन चाल्यते ॥ १० ॥**

अन्वयः—अनेन महाकपट नाटयेन अपि चालितः न असि, यद्वा संसार नाटयेन अचालितः केन चाल्यते. ॥ १० ॥

अर्थः—(ए रीतना) ते कपट नाटकथी पण तमो चलायमान थया नही, अथवा संसारना नाटकथी (पण) अचल रहेलाने कोण चलावी शके? ॥ १० ॥

**तन्मुने पापिना येन विरुद्धमिति ते कृतम् । स एवास्मि प्रभो विश्वमपराधं क्षमस्व मे ॥ ११ ॥**

अन्वयः—(हे) मुने! येन पापिना ते इति विरुद्धं कृतं, सः एव असि, तत् (हे) प्रभो! मे विश्वं अपराधं क्षमस्व? ॥ ११॥

अर्थः—हे मुनिराज! जे पापीए आपप्रते आरीते विरुद्ध आचरण कर्युं छे, तेज आ हुं छुं. माटे हे भगवन्! मारा सघळा अपराधनी आप क्षमा करो? ॥ ११ ॥

**इत्युक्त्वा दुःखहर्षाश्रुमिश्रदृष्टिरयं सुरः । बहुस्तुतिमहानादः पादयोरपतन्मुनेः ॥ १२ ॥**

अन्वयः—इति उक्त्वा दुःख हर्ष अश्रु मिश्र दृष्टिः, बहु स्तुति महानादः अयं सुरः मुनेः पादयोः अपतत्. ॥ १२ ॥

अर्थः—एम कहीने दुःख तथा हर्षना आंसुओथी भरेली आंखोवाळो, तथा घणी स्तुतिओना महान स्वरवाळो ते देव ते मुनिना

चरणोमां पड्यो. ॥ १२ ॥

अथात्तधर्मलाभोक्तिर्यतिर्नतिपरं सुरम् । तमुवाच विचाराब्धिचञ्चच्चन्द्रिकया गिरा ॥ १३ ॥

अन्वयः-अथ आत्त धर्म लाभ उक्तिः यतिः विचार अब्धि चंचत् चंद्रिकया गिरा नतिपरं तं सुरं उवाच. ॥ १३ ॥

अर्थः-पछी कहेल छे धर्मलाभनुं वचन जेणे एवा ते संवरमुनिराज विचाररूप समुद्रप्रते चळकती चांदनीसरखी वाणीवडे नमता एवा ते देवने कहेवा लाग्या के, ॥ १३ ॥

नापराद्धं त्वया किं तु कृतिन्नुपकृतिः कृता । तव साहाय्यमाहात्म्याद्दुःकर्म क्षितं मया ॥ १४ ॥

अन्वयः—(हे) कृतिन् ! त्वया न अपराद्धं, किंतु उपकृतिः कृता, तव साहाय्य माहात्म्यात् मया दुःकर्म क्षितं. ॥ १४ ॥

अर्थः-हे चतुर देव! तें अपराध कर्यो नथी, परंतु उपकारज कर्यो छे, तारी मददना प्रभावथी में (मारां) दुष्कर्मोनो नाश कर्यो छे.

अपराधस्त्वया हन्त क्षन्तव्यः किं तु मामकः । यत्त्वैवं बभूवाहं दुःकर्मार्जनकारणम् ॥ १५ ॥

अन्वयः—किंतु हंत! त्वया मामकः अपराधः क्षंतव्यः, यत् अहं एवं तव दुःकर्म अर्जन कारणं बभूव. ॥ १५ ॥

अर्थः-परंतु अरेरे! तारे मारा अपराधनी क्षमा करवी, केमके हुं आवी रीते तने दुष्कर्मो उपार्जन करवाना कारणरूप थइ पड्यो

एवं निश्छद्मनोर्धर्मसंलापं तन्वतोस्तयोः उदयाचलचूलायां चण्डरोचिररोचत ॥ १६ ॥

अन्वयः-एवं निश्छद्मनोः तयोः धर्म संलापं तन्वतोः उदय अचल चूलायां चंडरोचिः अरोचत. ॥ १६ ॥

अर्थः-एरीते कपटरहित तेओ बन्ने धर्मसंबंधि वातो करता हता, एवामां उदयाचलना शिखरपर सूर्य चळकवा लाग्यो. ॥१६॥

एनं मुनिं विनम्याथ विबुधोऽयं तिरोदधे । ईर्यासमितिसंचारचारुर्मुनिरथाचलत् ॥ १७ ॥

अन्वयः—अथ एनं मुनिं विनम्य अयं विबुधः तिरोदधे, अथ ईर्यासमिति संचार चारुः मुनिः अचलत्. ॥ १७ ॥

अर्थः—पछी ते मुनिराजने नमीने ते देव अदृश्य थयो, तथा ईर्यासमितिपूर्वक विहार करवामां कुशल एवा ते मुनिराज पण विहार करवा लाग्या. ॥ १७ ॥

स्वापराधानुतापेन तं मुनीन्द्रमनिद्रधीः । असेवत धृतान्तर्धिः स्वर्धामा शुद्धभावनः ॥ १८ ॥

अन्वयः-अनिद्रधीः, शुद्ध भावनः स्वर्धामा स्व अपराध अनुतापेन धृत अंतर्धिः तं मुनींद्रं असेवत. ॥ १८ ॥

अर्थः—महान बुद्धिवाळो, तथा निर्मल भावनावाळो ते देव पोताना अपराधना पश्चात्तापपूर्वक अदृश्य रहीने ते मुनिराजनी सेवा करवा लाग्यो. ॥ १८ ॥

स मुनिर्भुवि शुद्धायां यत्र यत्र ददौ पदम् । तां तां स चक्रे प्रागेव देवोऽकण्टककर्कराम् ॥ १९ ॥

अन्वयः-सः मुनिः यत्र यत्र शुद्धायां भुवि पदं ददौ, तां तां प्राग् एव सः देवः अकंटक कर्करां चक्रे.

अर्थः—ते मुनिराज जे जे शुद्ध भूमिपर पग देता हता, ते ते भूमिने प्रथमथीज ते देव कांटाओ तथा कांकराओथी रहित करवा लाग्यो. ॥ १९ ॥

अमायिनः समायान्तं मुनिमुख्यस्य संमुखम् । हिंस्रं प्राणभृतां वारं स दूरेण न्यवारयत् ॥ २० ॥

अन्वयः—अमायिनः मुनिमुख्यस्य संमुखं समायांतं हिंस्रं प्राणभृतां वारं सः दूरेण न्यवारयत्. ॥ २० ॥

अर्थः—(ते) निष्कपटी मुनिराजनी सन्मुख आवता हिंसक प्राणीओना समूहने ते देव दूरथीज अटकावी राखवा लाग्यो.

घर्मे समीरणीभूय छत्रीभूयोष्णदीधितौ । शिशिरीभूय तप्तोर्व्यां सांनिध्यं स व्यधान्मुनेः ॥ २१ ॥

अन्वयः-सः घर्मे समीरीभूय, उष्ण दीधितौ छत्रीभूय, तप्त ऊर्व्यां शिशिरीभूय, मुनेः सांनिध्यं व्यधात्. ॥ २१ ॥

अर्थः—(वळी) ते देव गरमीवखते पवनरूपे थइने, सूर्यना तापवखते छत्ररूप थइने, तथा तपेली जमीनपर शीतल थइने ते मुनिराजनी सेवा करवा लाग्यो. ॥ २१ ॥

एवं स विहरन्नाप ग्रामं रामपुराभिधम् । यावत्तावदलंचक्रे नभोगर्भं नभोमणिः ॥ २२ ॥

अन्वयः-एवं विहरन् यावत् सः रामपुर अभिधं ग्रामं आप, तावत् नभोगर्भं नभोमणिः अलंचक्रे. ॥ २२ ॥

अर्थः—एरीते विहार करता जेवामां ते मुनिराज रामपुरनामना गाममां आव्या, तेवामां आकाशमंडलने सूर्य शोभाववा लाग्यो.

कुटुम्बिनो धनाख्यस्य धन्या नाम कुटुम्बिनी । त्याज्येनान्नेन दग्धेन तं मुनिं प्रत्यलाभयत् ॥ २३ ॥

अन्वयः—धनाख्यस्य कुटुंबिनः धन्या नाम कुटुंबिनी त्याज्येन दग्धेन अन्नेन तं मुनिं प्रत्यलाभयत्. ॥ २३ ॥

अर्थः-(त्यां) धननामना कुटुंबिनी धन्या नामनी कुटुंबिनीए फेंकी देवाना बळेला आहारवडे ते मुनिराजने प्रतिलाभ्या. ॥२३॥

अहो दानमहो दानमिति जल्पन्नसौ तदा । चकार सुमनोवृष्टीरम्बराद्म्बरः सुरः ॥ २४ ॥

अन्वयः—तदा अहो ! दानं ! अहो ! दानं ! इति जल्पन् असौ अंबरः सुरः अंबरात् सुमनः वृष्टीः चकार. ॥ २४ ॥

अर्थः—ते वखते अहो ! दान ! अहो ! दान ! एम बोलता ते अंबरदेवे आकाशमांथी पुष्पवृष्टि करी. ॥ २४ ॥

एवं पदे पदे तन्यमानधर्मप्रभावनः । तपोऽस्त्रधारया कर्म प्रहरन्व्यहरन्मुनिः ॥ २५ ॥

अन्वयः–एवं पदे पदे तन्यमान धर्म प्रभावनः मुनिः तपः अस्त्र धारया कर्म प्रहरन् व्यहरत्. ॥ २५ ॥

अर्थः—एवीरीते पगले पगले धर्मनी प्रभावना करता एवा ते मुनिराज तपरूपी शस्त्रनी धाराथी कर्मोने विदारताथका विचरवा लाग्या. ॥ २५ ॥

अथायमायुषः शेषे विहितानशनः कृती । सशुचा तेन देवेन सेव्यमानपदाम्बुजः ॥ २६ ॥

स्मृत्वा पञ्चनमस्कारान्पादपोपगमस्थितिः । शुद्धध्यानरसोल्लासलयसंलीनमानसः ॥ २७ ॥

आसन्नमुक्तिसौख्यौघनिष्यन्दैरिव पूरितम् । सर्वार्थसिद्धनामानं विमानं मुनिरासदत् ॥ २८ ॥

अन्वयः—अथ आयुषः शेषे विहित अनशनः, कृती, सशुचा तेन देवेन सेव्यमान पद अंबुजः, ॥ २६ ॥ पंच नमस्कारान् स्मृत्वा पादपोपगम स्थितिः, शुद्ध ध्यान रस उल्लास लय संलीन मानसः, ॥ २७ ॥ मुनिः आसन्न मुक्ति सौख्य ओघ निष्यंदैः

पूरितं इव सर्वार्थ सिद्धि नामानं विमानं आसदत्. ॥ २८ ॥ त्रिभिर्विशेषकं ॥

अर्थः-पछी आयुने छेडे करेल छे अनशन जेमणे एवा, कृतार्थ थयेला, अने दिलगिर थता एवा ते अंबरदेववडे सेवाता चरणकमलोवाळा, ॥ २६ ॥ तथा पंचपरमेष्टिना नमस्कारोनुं स्मरण करीने (वृक्षनीपेठे) पादपोपगमन आसने स्थिर रहेला, तथा निर्मल ध्यानरसना आनंदमां लयलीन थयेला हृदयवाळा, ॥ २७ ॥ ते संवरमुनिराज, नजदीक रहेली मुक्तिना सुखोना समूहना झरणाओथी जाणे भरेलुं होय नही! एवा सर्वार्थसिद्धि नामना विमानमां पहोंच्या. ॥ २८ ॥ त्रिभिर्विशेषकं ॥

**तथ्यां तदित्थमाकर्ण्य संवरस्य मुनेः कथाम् । कर्ममर्मभिदेऽमुष्मै यतध्वं तपसे जनाः ॥ २९ ॥**

अन्वयः-तत् (हे) जनाः! इत्थं संवरस्य मुनेः तथ्यां कथां आकर्ण्य कर्म मर्म भिदे अमुष्मै तपसे यतध्वं ? ॥ २९ ॥

अर्थः—माटे हे लोको! ए रीतनी ते संवरमुनिराजनी सत्य कथा सांभळीने कर्मोना मर्मोने भेदनारो एवो आ तप करवामाटे (तमो) यत्न करो ? ॥ २९ ॥

## ॥ इति तपश्चरणे संवरमुनीश्वरकथा ॥

**प्रभावनाद्यलंकाराकृष्टविष्टपचेतसः । दानशीलतपोऽङ्गस्य जीवो धर्मस्य भावना ॥ ३० ॥**

अन्वयः—प्रभावना आदि अलंकार आकृष्ट विष्टप चेतसः, दान शील तपः अंगस्य धर्मस्य जीवः भावना. ॥ ३० ॥

अर्थः—उन्नति करवा आदिकरूप आभूषणोवडे आकर्षेल छे जगतनुं चित्त जेणे एवा, तथा दान, शील अने तपरूपी शरीरवाळा

एवा धर्मनुं जीवन भावना छे. ॥ ३० ॥

अज्ञानध्वान्तसंधाने ध्याने सिद्धिपुराध्वनि । अध्वगस्यात्मनो भाति भावना रत्नदीपिका ॥ ३१ ॥

अन्वयः—अज्ञान ध्वांत संधाने, ध्याने मोक्षपुर अध्वनि अध्वगस्य आत्मनः भावना रत्न दीपिका भाति. ॥ ३१ ॥

अर्थः—अज्ञानरूपी अंधकारना मेळापवाळा ध्यानरूपी मोक्षमार्गमां चालनारा जीवने भावना ( ते अंधकारनो नाश करवा माटे) रत्नना दीपक सरखी छे. ॥ ३१ ॥

सद्दानशीलतपसां भवयुद्धाय धावताम् । अग्रेसरी भवत्येका भावनैव महाभटी ॥ ३२ ॥

अन्वयः—भव युद्धाय धावतां सद्दान शील तपसां अग्रेसरी एका भावना एव महाभटी भवति. ॥ ३२ ॥

अर्थः—संसार साथेनां युद्धमाटे दोडता एवा सुपात्रदान, शील तथा तपनी अगाडी मोखरे चालती, एवी एक भावनाज शूरवीर सुभटीनुं काम बजावे छे. ॥ ३२ ॥

सतां दमक्षमामुख्यधर्ममुक्तावली हृदि । अन्तर्भावनया धत्ते कान्तिं नायककान्तया ॥ ३३ ॥

अन्वयः—सतां हृदि दम क्षमा मुख्य धर्म मुक्तावली नायक कांतया अंतर्भावनया कांतिं धत्ते. ॥ ३३ ॥

अर्थः—संत पुरुषोना हृदयमां रहेली, इन्द्रियदमन तथा क्षमा आदिक धर्मरूपी मोतीनी माळा, (तेनी अंदर रहेला) पदक सरखा तेजवाळी हृदयनी निर्मळ भावनाथी तेजस्वीपणाने धारण करे छे. ॥ ३३ ॥

**दानशीलतपोभाजामप्याश्चर्यकरं फलम् । दत्ते चन्द्रोदरस्येव विधर्मस्यापि भावना ॥ ३४ ॥**

अन्वयः—दान शील तपः भाजां अपि भावना विधर्मस्य अपि चंद्रोदरस्य इव आश्चर्यकरं फलं दत्ते. ॥ ३४ ॥

अर्थः—दान, शील, तथा तपने भजनारा माणसोने पण भावना, विधर्मी एवा पण चंद्रोदरनीपेठे आश्चर्यजनक फल आपे छे.

**तथाहि संपदुद्वाहकरैः स्फीता वैरैर्नरैः । चतुर्धर्मचतुर्वेदिरस्ति हस्तिपुरी पुरी ॥ ३५ ॥**

अन्वयः—तथाहि संपद् उद्वाहकरैः वरैः नरैः स्फीता, चतुर्धर्म चतुर्वेदिः हस्तिपुरी पुरी अस्ति. ॥ ३५ ॥

अर्थः—ते चंद्रोदरनुं उदाहरण कहे छे—लक्ष्मीसाथे विवाह करनारा एवा उत्तम पुरुषोथी भरेली, तथा दानआदिक चार धर्मोरूपी चतुरिका (चोरी) वाळी हस्तिपुरी नामनी नगरी छे. ॥ ३५ ॥

**तत्रामित्रकलत्राश्रुधाराततयशोलतः । श्रीरामो नाम सद्वृत्तकृतार्थः पार्थिवोऽभवत् ॥ ३६ ॥**

अन्वयः—तत्र अमित्र कलत्र अश्रुधारा आतत यशोलतः, सद्वृत्त कृतार्थः श्रीरामः नाम पार्थिवः अभूत्. ॥ ३६ ॥

अर्थः—ते नगरीमां शत्रुओनी स्त्रीओना आंसुओनी धाराओथी फलद्रूप थयेली छे यशरूपी वेलडी जेनी, तथा उत्तम आचारथी कृतार्थ थयेलो श्रीराम नामे राजा हतो. ॥ ३६ ॥

**सतीशतशिरोरत्नं स्त्रीरत्नं तस्य वल्लभा । धाम्ना कलितनाकश्रीजयाजनि जयावली ॥ ३७ ॥**

अन्वयः—तस्य सती शत शिरोरत्नं, स्त्रीरत्नं, धाम्ना कलित नाक श्री जया जयावली वल्लभा अजनि. ॥ ३७ ॥

अर्थः—ते राजाने सेंकडोगमे सती स्त्रीओमां मुकुट सरखी, स्त्रीओमां रत्नसरखी, अने तेजवडे करेल छे देवलोकनी शोभानो (पण) विजय जेणीए, एवी जयावली नामनी राणी हती. ॥ ३७ ॥

**जितस्वर्णं तनूवर्णं निन्दितेन्द्रपदं पदम् । सकलं सफलं मेने तयैव प्रियया नृपः ॥ ३८ ॥**

अन्वयः-नृपः जित स्वर्ण तनू वर्णं, निंदित इन्द्रपदं पदं, सकलं तया प्रियया एव सफलं मेने. ॥ ३८ ॥

अर्थः—ते राजा जितेल छे स्वर्णने जेणे, एवा ( पोताना ) शरीरना वर्णने, तथा तिरस्कारेल छे इन्द्रनी पदवी जेणे, एवां पोतानां पदने, (एम ) सर्व कंइ ते स्त्रीवडेज सफल मानतो हतो. ॥ ३८ ॥

**प्रियेण प्रीतिभिर्लाल्यमाना लोकेषु विश्रुतम् । देहार्धदाननिर्भोगं शिवयोः प्रेम साहसत् ॥ ३९ ॥**

अन्वयः—प्रियेण प्रीतिभिः लाल्यमाना सा लोकेषु विश्रुतं शिवयोः देह अर्ध दान निर्भोगं प्रेम अहसत्. ॥ ३९ ॥

अर्थः-स्वामीवडे प्रेमथी लालन करातो एवी ते जयावली राणी, लोकोमां प्रख्यात थयेला शिव अने पार्वती वच्चेना अर्ध शरीरना अर्पणरूप भोगोवाळा प्रेमनी ( पण ) हांसी करती हती. ॥ ३९ ॥

**अद्वितीयेन तौ प्रेमगुणेन विनियन्त्रितौ । मिथो विघटितुं दूरे नैव शेकतुरेकतः ॥ ४० ॥**

अन्वयः—अद्वितीयेन प्रेम गुणेन मिथः विनियंत्रितौ तौ एक एकतः दूरे विघटितुं न एव शेकतुः. ॥ ४० ॥

अर्थः—अपूर्व प्रेमरूपी गुणथी (दोरीथी) परस्पर जोडायेला एवा तेओ बन्ने एकबीजाथी दूर खसी शकता न होता. ॥ ४० ॥

सा भूभुजि सभाभाजि श्राजितात्पपरिच्छदा । कदाचिन्नन्तुमुद्यानसदनं मदनं ययौ ॥ ४१ ॥

अन्वयः—कदाचित् भूभुजि सभाभाजि आजित अल्प परिच्छदा सा उद्यानमदनं मदनं नंतुं ययौ. ॥ ४१ ॥

अर्थः—एक दिवसे (ज्यारे) राजा राजसभामां गयो हतो, त्यारे शोभिता स्वल्प परिवारवाळी ते राणी, बगीचामां छे मंदिर जेनुं एवा कामदेवने नमस्कार करवामाटे गइ. ॥ ४१ ॥

पूजया श्रीतनूजस्य धन्यंमन्या व्यलोकत । सा रामरमणी काममारामरमणीयताम् ॥ ४२ ॥

अन्वयः-श्रीतनूजस्य पूजया धन्यंमन्या सा राम रमणी कामं आराम रमणीयतां व्यलोकत. ॥ ४२ ॥

अर्थः—कामदेवनी पूजाथी (पोताने) धन्य मानती एवी ते रामराजानी राणी आनंदपूर्वक बगीचानी शोभा जोवा लागी. ॥

दर्शयन्ती वयस्याभ्यो वयस्याभिश्च दर्शितम् । सा हृद्यं हृद्यमासाद्य मुमुदे कुमुदेक्षणा ॥ ४३ ॥

अन्वयः-कुमुद ईक्षणा सा वयस्याभ्यः हृद्यं दर्शयंती, च वयस्याभिः दर्शितं हृद्यं आसाद्य मुमुदे ॥ ४३ ॥

अर्थः—कमलसरखां नयनोवाळी ते राणी (पोतानी) सखीओने (बगीचानी) मनोहरता देखाडतीथकी, तथा ते सखीओए देखाडेली मनोहरताने जोइने आनंद पामवा लागी. ॥ ४३ ॥

पश्यन्ती प्रीतिमोहेन मुहुर्वलितया दृशा । हेलया खेलयन्ती स्वान्पृष्ठतः पार्श्वयोः शिशून् ॥ ४४ ॥

धरणीं चरणाग्रेण विलिख्योल्लासितैर्मुहुः । आनन्दकुष्कुनादेन भोजयन्तो च तान्कणैः ॥ ४५ ॥
संचरन्ती वनेऽदर्शि कापि भूकान्तकान्तया । पुत्रिणीष्वात्तचूडेव ताम्रचूडस्य वर्णिनी ॥ ४६ ॥

अन्वयः-प्रीति मोहेन मुहुः वलितया दृशा पृष्टतः पार्श्वयोः स्वान् शिशून् पश्यंती, हेलया खेलयंती, ॥४४ ॥ च चरण अग्रेण धरणीं विलिख्य मुहुः उल्लासितैः कणैः आनंद कुष्कुनादेन तान् भोजयंती, ॥ ४५ ॥ पुत्रिणीषु आत्त चूडा इव का अपि ताम्रचूडस्य वर्णिनी वने संचरंती भूकांत कांतया अदर्शि ॥ ४६ ॥ त्रिभिर्विशेषकं ॥

अर्थः-प्रेमना मोहथी वारंवार पाछुं वाळीने पाछळना भागमां, तथा बन्ने पडखे पोताना बाळकोने जोती, तथा आनंदथी रमाडती, ॥ ४४ ॥ तथा (पोताना) नखवडे जमीन खोतरीने वारंवार उंचे करेला (धान्यना) कणोवडे, आनंदथी कुकूकुकूशब्दपूर्वक तेओने खवरावती, ॥ ४५ ॥ तथा पुत्रवाळीओमां शिरोमणिजेवी कोइक कुकडीने वनमां विचरती ते राजानी स्त्री जयावलीए दीठी.

तां विलोक्य वने लीलाशालिनीं सुतमालिनीम् । अदृष्टनन्दनास्येन्दुर्दध्यौ सेन्दुमुखी शुचा ॥ ४७ ॥

अन्वयः-लीला शालिनीं, सुत मालिनीं, तां वने विलोक्य अदृष्ट नंदन आस्य इन्दुः इन्दुमुखी सा शुचा दध्यौ. ॥ ४७ ॥

अर्थः—क्रीडाथी मनोहर, तथा पुत्रोथी शोभती एवी ते कुकडीने वनमां जोइने, नथी जोयेल पुत्रना मुखरूपी चंद्र जेणे, एवी चंद्रसरखा मुखवाळी ते राणी खेद पामी विचारवा लागी के, ॥ ४७ ॥

धिग्जन्म जीवितं भोगान्सुप्रियप्रापणं च मे । न यन्नयनसत्तायाः फलमालोकये सुतम् ॥ ४८ ॥

अन्वयः-मे जन्म, जीवितं, भोगान्, च सुप्रिय प्रापणं धिक्, यत् नयन सत्तायाः फलं सुतं न आलोकये. ॥ ४८ ॥

अर्थः-मारा जन्मने, जीवनने, भोगोने, तथा उत्तम भर्तारनी प्राप्तिने पण धिक्कार छे, के मारी आंखोनी हयातिना फलरूप पुत्रने हुं जोइ शकती नथी. ॥ ४८ ॥

**किं धनैः सैव धन्या स्त्री डिम्भस्यात्मभुवो मुखम् । या चुम्बति चिरं धूलिधूम्रमङ्गणरङ्गणैः ॥ ४९ ॥**

अन्वयः-धनैः किं? सा स्त्री एव धन्या, या अंगण रंगणैः धूलि धूम्रं आत्मभुवः डिंभस्य मुखं चिरं चुंबति. ॥ ४९ ॥

अर्थः—धन शा कामनुं छे? ते स्त्रीनेज धन्य छे, के जे आंगणामां रखडवाथी धूलिवडे खरडायेला पोताना पुत्रना मुखनुं घणा काळसुधी चुंबन करे छे. ॥ ४९ ॥

**अपि रङ्कप्रियामङ्कशयानतनयां स्तुवे । हारभारभृदुत्सङ्गां न पुनर्भूभृदङ्गनाम् ॥ ५० ॥**

अन्वयः-अंक शयान तनयां रंक प्रियां अपि स्तुवे, पुनः हार भार भृत् उत्संगां भूभृत् अंगनां न. ॥ ५० ॥

अर्थः-खोळामां पुत्रने सुवाडती एवी एक रांक भिखारीनी स्त्रीनी पण हुं स्तुति करुं छुं, परंतु (झवेरातथी जडेला) हारोथी भरेला खोळावाळी (पुत्रविनानी) राजानी राणीनी (पण) हुं प्रशंसा करती नथी. ॥ ५० ॥

**उत्पतन्निपतन्रिङ्खन्हसँल्लालावलीर्वमन् । कस्याश्चिदेव धन्यायाः क्रोडमायाति नन्दनः ॥ ५१ ॥**

अन्वयः-उत्पतन्, निपतन्, रिंखन्, हसन्, लालावलीः वमन् नंदनः कस्याश्चित् धन्यायाः एव क्रोडं आयाति. ॥ ५१ ॥

अर्थः—कूदतो, पडतो, चालतो, हसतो, तथा (मुखमांथी) लाळ पाडतो, एवो पुत्र कोइक भाग्यवती स्त्रीनाज खोळामां आवे छे.

**स्फारभूषणभारापि न भाति स्त्री सुतं विना । उदारतरतारापि निशेव शशिवर्जिता ॥ ५२ ॥**

अन्वयः-उदारतर तारा अपि शशिवर्जिता निशा इव, स्फार भूषणभारा अपि सुतं विना स्त्री न भाति. ॥ ५२ ॥

अर्थः—घणा ताराओवाळी छतां पण चंद्ररहित रात्रिनीपेठे, घणा आभूषणोना भारवाळी छतां पण पुत्रविना स्त्री शोभती नथी.

**तद्धातस्तात किं भूरिभूषापाषाणवाहिकाम् । मां व्यधाः सुतरत्नेन नैकेनापि व्यभूषयः ॥ ५३ ॥**

अन्वयः-तत् (हे) धातः! हे तात! भूरि भूषा पाषाण वाहिकां मां किं व्यधाः? एकेन अपि सुत रत्नेन (किं) न व्यभूषयः?

अर्थः—माटे हे विधाता! हे पिताजी! घणां आभूषणोरूपी पाषाणोने उपाडनारी मने (तमोए) केम बनावी! तथा एक पण पुत्ररूपी रत्नवडे (मने) केम विभूषित करी नही? ॥ ५३ ॥

**तिर्यग्नार्योऽपि पर्यन्तलीलालोलसुता वरम् । उत्सङ्गसंगतसुता वरं ग्रावस्त्रियोऽपि ताः ॥ ५४ ॥**

अन्वयः-पर्यंत लीला लोल सुताः तिर्यग्नार्यः अपि वरं, उत्संग संगत सुताः ताः ग्रावस्त्रियः अपि वरं. ॥ ५४ ॥

अर्थः-पासे रमता कूदता पुत्रोवाळी पशुओनी स्त्रीओ पण प्रशंसाने पात्र छे, तथा खोळामां बेसाडेल छे पुत्र जेओए एवी ते पत्थरनी पुतळीओ पण प्रशंसाने पात्र छे. ॥ ५४ ॥

धिग्ममोत्सङ्गमक्षीणि पाणी कण्ठं च यैर्मुदा । नाध्यासितो न दृष्टो नाश्लिष्टो नालम्बितः सुतः ॥५५॥

अन्वयः–मम उत्संगं, अक्षिणी, पाणी, च कंठं धिक्, यैः मुदा सुतः न अध्यासितः, न दृष्टः, न आश्लिष्टः, न आलंबितः.

अर्थः–( वळी ) मारा खोळाने, आंखोने, हाथने, तथा कंठने पण धिक्कार छे, के जेओए हर्षथी पुत्रने बेसाड्यो नथी, दीठो नथी, दबाव्यो नथी, के वळगाड्यो नथी. ॥ ५५ ॥

किं करोमि क्व गच्छामि निर्भाग्याहं हहा मम । सर्वेषामपि सौख्यानां स्थाने नैकोऽप्यभूत्सुतः ॥ ५६ ॥

अन्वयः—हहा ! निर्भाग्या अहं किं करोमि ? क्व गच्छामि ? मम सर्वेषां सौख्यानां स्थाने अपि एकः अपि सुतः न अभूत्.

अर्थः—अरेरे ! अभागणी एवी हुं शुं करूं ? क्यां जाउं ? मने (मारां) सर्व सुखोना बदलामां पण एक पण पुत्र थयो नही.॥५६॥

इति दुःखौघसंघट्टस्फुटद्वक्षःस्थलेव सा । तले रसालसालस्य भुवि न्यविशतालसा ॥ ५७ ॥

अन्वयः—इति दुःख ओघ संघट्ट स्फुटद् वक्षःस्थला इव सा अलसा रसाल सालस्य तले भुवि न्यविशत. ॥ ५७ ॥

अर्थः–एरीते दुःखोना समूहना दबाणथी जाणे फाटीजती छातीवाळी थइ होय नहि ! एवी ते राणी निराश थइने आम्रवृक्षनी नीचे जमीनपर बेसी गइ. ॥५७॥

शोषयन्तीव निःश्वासैर्वासो बाष्पपरिप्लुतम् । स्थगयन्तीव निःश्वासोध्धूतं बाष्पैर्महीरजः ॥ ५८ ॥

करयुग्मेन जानुस्थकूर्परेण धृतं शिरः। हृत्पद्मदुःखशल्येयं घूर्णन्तीव व्यकम्पयत् ॥ ५९ ॥

अन्वयः—बाष्प परिप्लुतं वासः निःश्वासैः शोषयंती इव, निःश्वास उद्धतं महीरजः बाष्पैः स्थगयंती इव, ॥ ५८ ॥ हृत्पद्म दुःख शल्या घूर्णती इव इयं जानुकूर्परेण करयुग्मेन धृतं शिरः व्यकंपयत्. ॥ ५९ ॥ युग्मं ॥

अर्थः—आंसुओथी भींजायेलां वस्त्रने निःश्वासोवडे जाणे सूकावती होय नही! एवी, तथा निःश्वासोथी उडेली पृथ्वीनी धूळने आंसुओवडे जाणे दबावती होय नही! एवी, ॥ ५८ ॥ हृदयकमलमां थतां दुःखना शल्यथी जाणे घोराती होय नही! एवी, ते राणी घुंटणोपर कोणी राखीने बे हाथे पकडेलां (पोताना) मस्तकने कंपाववा लागी. ॥ ५९ ॥ युग्मं ॥

दुःखं प्रष्टुमशक्ताभिर्बद्धपालिभिरालिभिः। साश्रुदृग्भिः सनिःश्वासमुखीभिर्वीक्षितैव सा ॥ ६० ॥

अन्वयः-दुःखं प्रष्टुं अशक्ताभिः, बद्ध पालिभिः, साश्रु दृग्भिः, सनिःश्वास मुखीभिः आलिभिः सा वीक्षिता एव. ॥ ६० ॥

अर्थः—दुःखनुं कारण पूछवाने असमर्थ, आसपास घेरीने बेठेली, आंसुयुक्त आंखोवाळी, अने मुखथी निसासा मूकती एवी सखीओ (पण) तेणीने जोइज रही. ॥ ६० ॥

तदा विसृज्य भूजानिर्विरहव्यथितः सभाम्। ययावन्तःपुरं कान्तापरिरम्भोत्सवोत्सुकः ॥ ६१ ॥

अन्वयः—तदा विरह व्यथितः, कांता परिरंभ उत्सव उत्सुकः भूजानिः सभां विसृज्य अंतःपुरं ययौ. ॥ ६१ ॥

अर्थः-ते वखते (राणीना) विरहथी दुःख पामेलो, तथा तेणीना आलिंगननो आनंद मेळववामाटे उत्सुक थयेलो राजा (पण)

सभाने विसर्जन करीने अंतःपुरमां गयो. ॥ ६१ ॥

**जयावलीमनालोक्य तत्र तस्थौ न पार्थिवः । निशावियुक्तो राकेन्दुः कियद्वियति दीव्यति ॥ ६२ ॥**

अन्वयः—तत्र जयावलीं अनालोक्य पार्थिवः न तस्थौ, निशा वियुक्तः राका इन्दुः वियति कियत् दीव्यति? ॥ ६२ ॥

अर्थः—त्यां जयावलीने नही जोवाथी राजा उभो नही, (केमके) रात्रिविनानो पुनमनो चंद्र आकाशमां क्यांसुधी रहे? ॥ ६२ ॥

**एत्य लीलावनोत्सङ्गमुत्सुको निःपरिच्छदः । पुरः स्थितोऽपि भूपालो नालोकि कान्तया तया ॥ ६३ ॥**

अन्वयः—उत्सुकः, निःपरिच्छदः लीला वन उत्संगं एत्य पुरः स्थितः अपि भूपालः तया कांतया न आलोकि, ॥ ६३ ॥

अर्थः—पछी उत्सुक थयेला, तथा परिवारविनाज ते क्रीडा वननी अंदर आवीने (पोतानी) आगळ उभेला, एवा पण ते राजाने ते राणीए जोया नही. ॥ ६३ ॥

**तादृग्रूपां निरूप्यालं भूपालोऽप्यश्लथव्यथः । उपसृत्य शनैरेनामूचे दुःखार्द्रया गिरा ॥ ६४ ॥**

अन्वयः—तादृग् रूपां एनां अलं निरूप्य अश्लथ व्यथः भूपालः अपि शनैः उपसृत्य दुःख आर्द्रया गिरा ऊचे. ॥ ६४ ॥

अर्थः—तेवी अवस्थावाळी ते राणीने सारीरीते निरखीने अति पीडित थयेलो ते राजा पण धीमेथी पासे आवीने खेदयुक्त वाणीथी कहेवा लाग्यो के, ॥ ६४ ॥

किं देवि हृदि ते दुःखमिति वाक्श्रवणादियम् । सुप्तोत्थितेव वीक्ष्याग्रे भूपं संभ्रमभागभूत् ॥ ६५ ॥

अन्वयः–(हे) देवि ! ते हृदि किं दुःखं ? इति वाक् श्रवणात् सुप्त उत्थिता इव इयं अग्रे भूपं वीक्ष्य संभ्रमभाग् अभूत्. ॥६५॥

अर्थः—हे देवि ! तारा हृदयमां शुं दुःख छे ? एवुं वचन सांभळीने जाणे सुती उठी होय नही ! तेम ते राणी आगळ (उभेला) राजाने जोइने संभ्रमवाळी थइ गइ. ॥ ६५ ॥

आगते जीवितेशेऽपि नोचितं रचितं मया । इति दुःखेऽतिदुःखं सा दग्धे पिटकवद्दधौ ॥ ६६ ॥

अन्वयः–जीवित ईशे आगते अपि मया उचितं न रचितं, इति सा दग्धे पिटकवत् दुःखे अति दुःखं दधौ. ॥ ६६ ॥

अर्थः–(मारा) प्रियतम आव्या छतां मण हुं उचित सत्कार न करी शकी, एम (विचारती) ते राणी दाझ्यापर फोडलानीपेठे दुःखपर विशेष दुःख मानवा लागी. ॥ ६६ ॥

अथ चाटुचमत्कारचाटूक्तिः पृथिवीपतिः । ऊचे तां जनचेतांसि कर्णातिथ्ये नयन्नयम् ॥ ६७ ॥

अन्वयः—अथ चाटु चमत्कार चाटु उक्तिः अयं पृथिवीपतिः जन चेतांसि कर्णातिथ्ये नयन् तां ऊचे. ॥ ६७ ॥

अर्थः—पछी प्रेमयुक्त आश्चर्यकारक मिष्ट वचनोवाळो ते राजा माणसना मनोने श्रवणगोचर करतोथको तेणीने कहेवा लाग्यो के,

मदागमनसंरम्भमम्भोरुहमुखि त्यज । भज वाचं दिवाचन्द्रसख्यं त्वन्मुखमाप किम् ॥ ६८ ॥

अन्वयः—(हे) अंभोरुह मुखि! मद् आगमन संरंभं त्यज? वाचं भज? त्वन्मुखं दिवा चंद्र सख्यं किं आप? ॥ ६८ ॥

अर्थः—हे चन्द्रमुखी! मारां (अचानक अहीं) आववाथी थयेला गभराटने तुं छोडी दे? अने बोल के, तारुं मुख (आजे) दिवसे (उगेला) चंद्रसरखुं (झांखुं) केम थयुं छे? ॥ ६८ ॥

**नापराद्धं मया किंचित्कोऽन्यस्त्वय्यपराध्यति। जानामि चरचारेण कुशलं त्वत्पितुः कुले॥ ६९ ॥**

अन्वयः—मया त्वयि किंचित् न अपराद्धं, तु अन्यः कः अपराध्यति? चर चारेण त्वत्पितुः कुले कुशलं जानामि. ॥ ६९ ॥

अर्थः—में तारामते कंइ पण अपराध कर्यो नथी, त्यारे बीजो तो (तारो) कोण अपराध करी शके तेम छे? वळी (मारा) गुप्त नोकरोनी हीलचालथी तारां पीयरना कुटुंबमां क्षेमकुशल छे, ए हुं जाणुं छुं. ॥ ६९ ॥

**कौतस्कुतेन तद्भग्ना विलासतरवस्तव। साञ्जनाश्रुमदौघेन माद्यता दुःखदन्तिना॥ ७० ॥**

अन्वयः—तत् स अंजन अश्रु मद ओघेन माद्यता दुःख दंतिना कौतस्कुतेन तव विलास तरवः भग्नाः? ॥ ७० ॥

अर्थः—तो पछी अंजनयुक्त आंसुओरूपी मदना समूहथी उन्मत्त थयेला (आ) दुःखरूपी हाथीए क्यांथी आवीने तारा विलासोरूपी वृक्षोने तोडी पाड्यां? ॥ ७१ ॥

**इत्थं यथा यथापृच्छत्पृथ्वीनाथस्तथा तथा। उद्बाष्पबिन्दुरेवाभूदियं नोवाच किंचन॥ ७१ ॥**

अन्वयः—इत्थं यथा यथा पृथ्वीनाथः अपृच्छत्, तथा तथा इयं उद्बाष्प बिंदुः एव अभूत्, किंचन न उवाच. ॥ ७१ ॥

अर्थः—एरीते जेम जेम ते राजा पूछतो गयो, तेम तेम ते राणी वधारे वधारे आंसुओना बिंदुओ खेरववा लागी, अने कंइ पण बोली शकी नही. ॥ ७१ ॥

**सा भूस्तदा तदालीभिः पञ्चालीभिरिवाभितः । धारालैर्दृग्जलैर्दुःखकेलिधारागृहं कृता ॥ ७२ ॥**

अन्वयः—तदा अभितः पंचालीभिः इव तत् आलीभिः धारालैः दृग्जलैः सा भूः दुःख केलि धारागृहं कृता. ॥ ७२ ॥

अर्थः—ते वखते चोतरफ पुतळीओनीपेठे उभी गयेली, एवी ते राणीनी साहेलीओए धाराबंध निकळता आंसुओवडे ते जमीनने, दुःखने मोज माणवाना फुवारासरखी करी मेली. ॥ ७२ ॥

**मुञ्चद्बाष्पाणि पाणिभ्यां प्रमृज्य नयनद्वयम् । अत्याग्रही महीकान्तस्तामपृच्छन्मुहुर्मुहुः ॥ ७३ ॥**

अन्वयः—बाष्पाणि मुंचत् नयन द्वयं पाणिभ्यां प्रमृज्य अतिआग्रही महीकांतः तां मुहुः मुहुः अपृच्छत्. ॥ ७३ ॥

अर्थः—आंसुओने खरतां, एवां (पोतानां) बन्ने चक्षुओने हाथवडे लोहीने अति आग्रहथी राजाए तेणीने वारंवार पूछवा मांडयुं.

**अथो कथंचिदालम्ब्य सा धैर्यमिदमभ्यधात् । हा निःपुत्राहमित्युक्तमात्रे तारं रुरोद सा ॥ ७४ ॥**

अन्वयः—अथो कथंचित् धैर्य आलंब्य सा इदं अभ्यधात्, “हा ! अहं निःपुत्रा !” इति उक्तमात्रे सा तारं रुरोद. ॥ ७४ ॥

अर्थः—पछी केटलेक प्रयासे धैर्य धरीने ते एम बोली के, “अरेरे !! हुं पुत्ररहित छुं !” एटलुंज कहेतानीसाथे ते म्होटेथी रडवा लागी. ॥ ७४ ॥

**इत्युक्तिश्रवणादेव नृदेवस्यापि चक्षुषी । पूरयामासतुः प्रावृण्मासाविव जलैरिलाम् ॥ ७५ ॥**

अन्वयः–इति उक्ति श्रवणात् एव नृदेवस्य अपि चक्षुषी प्रावृट् मासौ इव जलैः इलां पूरयामासतुः. ॥ ७५ ॥

अर्थः–ते वचन सांभळतांज राजानी आंखो पण श्रावण भादरवानीपेठे जलवडे (आंसुओवडे) पृथ्वीने भरी देवा लागी. ॥७५॥

**चिरादथ धरानाथो धैर्यं संधाय कष्टतः । दुःखमग्नां प्रियामाह गलितागलिताश्रुदृक् ॥ ७६ ॥**

अन्वयः–अथ चिरात् धरानाथः कष्टतः धैर्यं संधाय गलित अगलित अश्रुदृक् दुःख मग्नां प्रियां आह. ॥ ७६ ॥

अर्थः–पछी घणे काळे राजा मुश्केलीए धैर्य धारण करीने थोडांघणां आंसुओने आंखोमांथी खेरवतोथको दुःखमां पडेली ते प्राणप्रियाने कहेवा लाग्यो के, ॥ ७६ ॥

**आहिताग्निरहं देवि नित्यं दुःखाग्निनामुना । त्वया सद्धर्मचारिण्या स युक्तं प्रकटीकृतः ॥ ७७ ॥**

अन्वयः—हे देवि! अहं नित्यं आहित अग्निः अमुना दुःख अग्निना त्वया सद्धर्म चारिण्या सः युक्तं प्रकटीकृतः. ॥ ७७ ॥

अर्थः—हे देवि ! हुं हमेशां (पुत्र संबंधी) गुप्त संतापवाळो हतो, परंतु आ दुःखरूपी अग्निवडे तें सहचारिणीए ते संतापने ठीक प्रगट कर्यो. ॥ ७७ ॥

**तद्भाग्यं क्वास्ति मे येन त्वयि पुत्रं लभे शुभे । को जीवः पुण्यवांस्तादृगस्ति यस्ते सुतोभवेत् ॥ ७८ ॥**

अन्वयः–(हे) शुभे! मे तद् भाग्यं क अस्ति? येन त्वयि पुत्रं लभे, तादृग् कः पुण्यवान् जीवः अस्ति? यः ते सुतीभवेत्.

अर्थः—हे देवी! मारुं तेवुं भाग्य क्यां छे? के जेथी हुं तारी पासेथी पुत्र मेळवी शकुं? (वळी) एवो कयो पुण्यशाली जीव छे? के जे तारा पुत्ररूपे अवतरे? ॥ ७८ ॥

**तत्खेदमरविन्दाक्षि मन्दीकुरु करिष्यते। तत्किंचन तपो येन भविष्यति सुतस्तव ॥ ७९ ॥**

अन्वयः—तत् (हे) अरविंदाक्षि! खेदं मंदीकुरु? तत् किंचन तपः करिष्यते, येन तव सुतः भविष्यति. ॥ ७९ ॥

अर्थः—माटे हे कमलमुखी! ( तुं तारो ) संताप ओछो कर? तेवो कंइक तप करशुं, के जेथी तने पुत्र थशे. ॥ ७९ ॥

**तद्वाक्यस्यानुसारेण भविष्यति सुतस्तव। इत्याददे गिरं कीरोऽप्याम्रद्रुमशिरश्चरः ॥ ८० ॥**

अन्वयः—तद्वाक्यस्य अनुसारेण " तव सुतः भविष्यति " इति आम्र द्रुम शिरः चरः कीरः गिरं आददे. ॥ ८० ॥

अर्थः—(राजाना) ते वाक्यने अनुसारे " तने पुत्र थशे " एम (ते) आम्रवृक्षनी टोचपर रहेलो शुक (पण) वाणी बोल्यो. ॥

**मुदानुमोदमानौ तौ तद्वचःसदुपश्रुतिम्। दम्पती यावदुत्पश्यौ जातौ तावदपश्यताम् ॥ ८१ ॥**

**पूरिते जलभृज्जालैर्जम्बालैरिव वर्त्मनि। भीतमप्कायसंघट्टाच्चरन्तं गगनाङ्गणे ॥ ८२ ॥**

**स्वच्छन्दं गच्छतामिच्छाविच्छेदो भूदमीषु मा। इति दूरात्पुरो मार्गं मुञ्चन्तं दिवि पत्रिणाम् ॥ ८३ ॥**

विकाशयन्तं लोकानां लोचनानि सरोजवत् । रविगर्भादिवोत्कीर्णं कीर्णं कान्तिकदम्बकैः ॥ ८४ ॥
खेलंतोनां चिरं पञ्चमहाव्रतमयश्रियाम् । विलाससद्मपद्मायमानक्रमकराननम् ॥ ८५ ॥
रङ्गदङ्गनखज्योतिर्लीलया लज्जितैरिव । अचित्तैरपि तैः स्वर्णरत्नभारैरभूषितम् ॥ ८६ ॥
सहामुनैव यास्यामि मोक्षेऽपीति मनोरथात् । लाघवार्थमिव क्षामीभवताङ्गेन भासुरम् ॥ ८७ ॥
क्रियमाणतपस्तारं मूर्तीभूतैश्च सेवितम् । कृतैः करिष्यमाणैश्च तपोभिरिव साधुभिः ॥ ८८ ॥
विनयंधरनामानं विद्याधरमुनीश्वरम् । उत्तरन्तं पुरोभागे स्वस्य भाग्यमिवाद्भुतम् ॥ ८९ ॥

अन्वयः–तद्वचः सत् उपश्रुतिं मुदा अनुमोदमानौ तौ दंपती यावत् उत्पश्यौ जातौ, तावत् , ॥ ८१ ॥ जंबालैः पूरिते वर्त्मनि इव, जलभृत् जालैः (पूरिते) गगन अंगणे अप्काय संघट्टात् भीतं चरंतं, ॥ ८२ ॥ अमीषु इच्छा विच्छेदः माभूत् , इति दिवि स्वच्छंदं गच्छतां पत्रिणां पुरः मार्गं दूरात् मुंचंतं, ॥ ८३ ॥ रवि गर्भात् उत्कीर्णं इव कांति कदंबकैः कीर्णं, लोकानां लोचनानि सरोजवत् विकाशयंतं, ॥ ८४ ॥ चिरं खेलंतीनां पंचमहाव्रतमय श्रियां विलास सद्म पद्मायमान क्रम कर आननं, ॥ ८५ ॥ रंगत् अंग नख ज्योतिः लीलया लज्जितैः इव, अचित्तैः अपि तैः स्वर्ण रत्न भारैः अभूषितं, ॥ ८६ ॥ अमुना सह एव मोक्षे अपि यास्यामि, इति मनोरथात् , लाघवार्थं इव क्षामीभवता अंगेन भासुरं, ॥ ८७ ॥ क्रियमाण तपः तारं, च कृतैः च करिष्यमाणैः मूर्तिभूतैः तपो-

भिः इव साधुभिः सेवितं, ॥ ८८ ॥ स्वस्य अद्भुतं भाग्यं इव पुरोभागे उत्तरंतं, विनयंधर नामानं विद्याधर मुनीश्वरं अपश्यतां. ॥

अर्थः—ते शुकना वचनना उत्तम श्रवणने हर्षथी अनुमोदता, एवा तेओ बन्ने स्त्रीभर्तार जेवामां उंचुं जुए छे, तेवामां ॥ ॥ ८१ ॥ कादवथी भरेला मार्गमां जेम, तेम वादळांओना समूहथी भरेला आकाशमां अप्कायना मर्दनथी डरीने चालता, ॥ ८२ ॥ आ पक्षीओनी इच्छामां भंग न पडो, एवा विचारथी आकाशमां स्वेच्छाए उडता पक्षिओना अगाडीना मार्गने दूरथीज छोडी देता, ॥ ८३ ॥ सूर्यना मध्यभागमांथी जाणे कोतरी कहाड्या होय नही! तेम कांतिना समूहथी व्याप्त थयेला, तथा लोकोनां चक्षुओने कमलनीपेठे विकस्वर करता, ॥ ८४ ॥ घणा समयथी क्रीडा करती, एवी पांच महाव्रतोनी लक्ष्मीओने विलास करवानां स्थानरूप कमलनी पेठे आचरण करता छे, पग, हाथ तथा मुख जेमनां, ॥ ८५ ॥ विस्तारपामती एवी शरीर तथा नखनी कांतिनी क्रीडाथी जाणे लज्जा पाम्यां होय नही! एवां ते अचेतन स्वर्ण तथा रत्नोना भारथी पण नही शणगारेला, ॥ ८६ ॥ आमनी साथेज (हुं) मोक्षमां पण जइश, एवा मनोरथथी जाणे हलकुं थवा माटे होय नहिं! तेम क्षीण थतां शरीरवडे शोभता, ॥८७॥ कराता तपवडे करीने दीपता, तथा करेला अने करवाना, एवा देहधारी जाणे तपवडे होय नही! तेम साधुओवडे सेवायेला, ॥ ॥ ८८ ॥ अने पोतानुं जाणे आश्चर्यकारक भाग्य उतरतुं होय नही! तेम अगाडीना भागमां (आकाशमांथी) उतरता, एवा विनयंधर नामना विद्याधर मुनिराजने ते ( दंपतीए ) जोया. ॥ ८९ ॥ नवभिः कुलकं ॥

**पदं ददौ च स क्ष्मायां ननाम च जनाधिपः । तं त्रिः प्रदक्षिणीकृत्य सानन्दः सपरिच्छदः ॥ ९० ॥**

अन्वयः—च सः क्ष्मायां पदं ददौ, च सानंदः सपरिच्छदः सः जनाधिपः तं त्रिः प्रदक्षिणीकृत्य ननाम.

अर्थः—पछी ते मुनिराजे पृथ्वीपर पग दीधो, तथा हर्ष पामेला परिवार सहित ते राजाए तेमने त्रण प्रदक्षिणा करीने वांद्या. ९०

**अथाधाय करौ मूर्ध्नि पृथिवीपालपुङ्गवः । मुनिं व्यजिज्ञपद्दत्ताशिषं कृत्ताशुभद्विषम् ॥ ९१ ॥**

अन्वयः—अथ पृथ्वीपाल पुंगवः मूर्ध्नि करौ विधाय दत्त आशिषं कृत्त अशुभ द्विषं मुनिं व्यजिज्ञपत् ॥ ९१ ॥

अर्थः—पछी ते राजाए मस्तकपर हाथ जोडीने, आपेल छे आशिष जेमणे, तथा नष्ट करेल छे पापरूपी शत्रुओ जेमणे एवा ते मुनिराजने विनंति करी के ॥ ९१ ॥

**प्रभो नभोङ्गणस्यास्य किमभाग्यं विजृम्भितम् । किं भाग्यं मद्भुवो वा यत्तन्मुक्त्वा त्वमिमां श्रितः९२**

अन्वयः—(हे) प्रभो ! अस्य नभोंगणस्य किं अभाग्यं विजृंभितं ? वा मद्भुवः किं भाग्यं ? यत् तत् मुक्त्वा त्वं इमां श्रितः !

अर्थः—हे भगवन् ! आ गगनांगणनुं शुं (कंई) अभाग्य प्रगट थयुं ? अथवा (आ) मारी भूमिनुं शुं ( कंई ) भाग्य ( प्रगट थयुं ? ) के जेथी ते गगनांगणने तजीने आप आ भूमिपर पधार्या ! ॥ ९२ ॥

**अद्य नाथ कृतार्थोऽहमद्य मे सफलं जनुः । अद्य मे जीवितं श्लाघ्यमद्य राज्यं च मेऽनघम् ॥ ९३ ॥**

अन्वयः—(हे) नाथ ! अद्य अहं कृतार्थः, अद्य मे जनुः सफलं, अद्य मे जीवितं श्लाघ्यं, च अद्य मे राज्यं अनघं. ॥ ९३ ॥

अर्थः—हे स्वामी ! आजे हुं कृतार्थ थयो, आजे मारो जन्म सफल थयो, आजे मारुं जीवन प्रशंसनीय थयुं, तथा आजे मारुं रा-

ज्य निर्मल थयुं. ॥ ९३ ॥

**तव स्तवामृते वाचि दर्शने श्वाससौरभे । पदस्पर्शे मिथोहूत्या ममाक्षैः क्रियते कलिः ॥ ९४ ॥**

**तद्ध्वानिनीं सितां शीतां सुरभिं मधुरां गिरम् । यच्छादेशप्रसादेन पञ्चाक्षप्रीतये प्रभो ॥ ९५ ॥**

अन्वयः–तव स्तव अमृते, वाचि, दर्शने, श्वास सौरभे, पदस्पर्शे, मम अक्षैः मिथः हूत्या कलिः क्रियते. ॥ ९४ ॥ तद् ( हे ) प्रभो ! पंच अक्ष प्रीतये ध्वानिनीं, सितां, शीतां, सुरभिं, मधुरां गिरं आदेश प्रसादेन यच्छ ? ॥ ९५ ॥ युग्मं ॥

अर्थः–आपनी स्तुतिरूपी अमृतनो स्वाद लेवामाटे जिह्वा, आपनी वाणी सांभळवामाटे कर्णो, आपनां दर्शनमाटे आंखो, आपना श्वासनी सुगंधि लेवामाटे नाशिका, तथा आपना चरणोना स्पर्शमाटे आ शरीर, एम मारी पांचे इंद्रिओ परस्पर स्पर्धाथी क्लेश करी रही छे. ॥ ९४ ॥ माटे हे भगवन् ! (मारी) ते पांचे इंद्रियोने खुशी करवामाटे गर्जारवजेवी, निर्मल, शीतल, तथा सुगंधि, अने मधुर वाणी (कंइक) फरमानरूपे आपवाजी आप कृपा करो ? ॥ ९५ ॥ युग्मं ॥

**अथ तीर्थेशसिद्धान्तकल्पद्रुकुसुमैर्मुनिः । वचोभिः शोभयामास वसुधावासवश्रवः ॥ ९६ ॥**

अन्वयः–अथ तीर्थेश सिद्धांत कल्पद्रु कुसुमैः वचोभिः मुनिः वसुधा वासव श्रवः शोभयामास. ॥ ९६ ॥

अर्थः–पछी तीर्थंकरप्रभुना सिद्धांतोरूपी कल्पवृक्षोनां पुष्पोसरखां वचनोवडे करीने ते मुनिराज राजाना कर्णोने शोभाववा लाग्या.

चिरादघौघसंघट्टविपाटनपटीयसीम् । नभःपथेन मे तीर्थयात्रामुर्वीश कुर्वतः ॥ ९७ ॥
इदमद्यैव देवाधिदेवमन्दिरमण्डलैः । भद्रधर्मद्विपालानस्तम्भैरिव विभूषितम् ॥ ९८ ॥
जिनेशधूपधूमोर्मिनाशितैर्मशकैरिव । त्वच्चरित्रकृशैः पापव्रजैरव्यथितप्रजम् ॥ ९९ ॥
पौषधग्राहिणां भित्तिलम्बितै रत्नभूषणैः । अपि पौषधशालासु निशि ध्वस्ततमस्तति ॥ १६०० ॥
बभूव भुवनोद्दामरोचिर्लोचनगोचरम् । व्यक्तमुक्तावलीपुष्पप्रकरं नगरं तव ॥ १ ॥ पञ्चभिः कुलकम् ॥

अन्वयः—(हे) ऊर्वीश ! चिरात् नभ पथेन अघ ओघ संघट विपाटन पटीयसीं तीर्थयात्रां कुर्वतः मे, ॥ ९७ ॥ अद्य एव भद्र धर्म द्विप आलान स्तंभैः इव, देवाधिदेव मंदिर मंडलैः विभूषितं, ॥ ९८ ॥ जिनेश धूप धूम ऊर्मि नाशितैः मशकैः इव, त्वत् चरित्र कृशैः पापव्रजैः अव्यथित प्रजं, ॥ ९९ ॥ पौषध ग्राहिणां भित्ति लंबितैः रत्न भूषणैः निशि पौषध शालासु अपि ध्वस्त तमः तति, ॥ १६०० ॥ भुवन उद्दाम रोचिः, व्यक्त मुक्तावली पुष्पप्रकरं इदं तव नगरं लोचनगोचरं बभूव. ॥ १ ॥ पंचभिःकुलकं ॥

अर्थः—हे राजन् ! घणा समयथी आकाशमार्गे, पापोना समूहना स्पर्शने तोडवामां समर्थ, एवी तीर्थयात्रा करतांथकां, में ॥९७॥ आजेज धर्मरूपी उत्तमजातिना हाथीने बांधवाना स्तंभोसरखा जिनेश्वरप्रभुओना मंदिरोना समूहोवडे अलंकृत थयेलुं, ॥ ९८ ॥ जिनप्रतिमाओपासे कराता धूपना धूमाडाना मोजांओथी नाशी गयेला मच्छरोनीपेठे, आपना सदाचारथी क्षीण थयेला पापोना

समूहोथी पीडारहित मजावाळुं, ॥ ९९ ॥ पौषध लेनारा गृहस्थोनां भींते लटकावेलां रत्नोनां आभूषणोवडे रात्रिए पौषधशाला-ओमां पण नष्ट थयेल छे अंधकारनो विस्तार जेमां एवुं, ॥ १६०० ॥ मेहेलोमां उमदी रोशनीवाळुं, तथा प्रगट देखाती मोतीओनी सेरो तथा पुष्पोना समूहोवाळुं आ तमारुं नगर जोयुं. ॥ १ ॥ पंचभिःकुलकं ॥

**तदेतदवनीनेतर्दूरतः पश्यतो मम । प्रीतिप्रतिष्ठचित्तस्य चिन्ताभूदिति चेतसि ॥ २ ॥**

अन्वयः—(हे) अवनी नेतः प्रीति प्रतिष्ठ चित्तस्य, दूरतः पश्यतः मम चेतसि इति चिंता अभूत्. ॥ २ ॥

अर्थः—(पछी) हे राजन्! प्रेमयुक्त हृदयवाळा, तथा दूरथी जोता एवा मारा हृदयमां एवी चिंता थइ के, ॥ २ ॥

**दूरतो दुरितं जेता नेतास्य नगरस्य यः । आरामिकेण नारामो रामः स्यादधमात्मना ॥ ३ ॥**

अन्वयः—अस्य नगरस्य यः नेता (सः) दूरतः दुरितं जेता, अधमात्मना आरामिकेण आरामः रामः न स्यात्. ॥ ३ ॥

अर्थः—आ नगरनो जे राजा छे ते दूरथी पण पापोने जीतनारो लागे छे, केमके दुष्ट माळीथी बगीचो रमणीक थतो नथी. ॥३॥

**तत्तमत्र महात्मानं पश्यामीत्याशया मया । निक्षिप्तचक्षुषादर्शि भवानीदृक्षदुःखभूः ॥ ४ ॥**

अन्वयः—तत् अत्र तं महात्मानं पश्यामि, इति आशया मया निक्षिप्त चक्षुषा भवान् ईदृक्ष दुःखभूः अदर्शि. ॥ ४ ॥

अर्थः—माटे अहीं ते महात्माने मळु, एवी आशाथी में दृष्टि करतां तमोने आ रीते दुःखी थता जोया. ॥ ४ ॥

**तत्तज्ज्ञातुमिहायातो महीधव जवादहम् । को न स्याद्धर्मधीराणां सतां दुःखेन दुःखितः ॥ ५ ॥**

अन्वयः—तत् ( हे ) महीधव ! तत् ज्ञातुं अहं जवात् इह आयातः, धर्मे धीराणां सतां दुःखेन कः दुःखितः न स्यात्? ॥ ५ ॥

अर्थः—माटे हे राजन् ! ते ( तमारुं ) दुःख जाणवा माटे हुं वेगथी अहीं आव्यो, केमके धर्मकार्योमां धैर्यवाळा एवा सज्जनोनां दुःखथी कोण दुःखी न थाय ? ॥ ५ ॥

**तज्जल्प भुवनाकल्प दुःखं किं धर्मिणोऽपि ते । स्यादिन्दुधामधौतस्य काप्यर्तिः कुमुदस्य किम् ॥ ६ ॥**

अन्वयः—तत् (हे) भुवनाकल्प! जल्प? ते धर्मिणः अपि किं दुःखं? इन्दु धाम धौतस्य कुमदस्य किं का अपि अर्तिः स्यात् ?

अर्थः—माटे हे राजन् ! तुं बोल ! के, तने धर्मात्माने पण शुं दुःख छे? केमके चन्द्रना तेजथी व्याप्त थयेलां चन्द्र विकासी कमलने शुं कंइ पण पीडा होय? ॥ ६ ॥

**अथाभ्यधत्त भूभर्ता प्रभो दुःखतमो मम । सुतेन नयनाम्भोजसहस्रच्छविना विना ॥ ७ ॥**

अन्वयः—अथ भूभर्ता अभ्यधत्त, ( हे ) प्रभो! नयन अंभोज सहस्र च्छविना सुतेन विना मम दुःख तमः ॥ ७ ॥

अर्थः—पछी राजाए कह्युंके, हे भगवन्! चक्षुरूपी कमलने ( विकस्वर करवामां ) सूर्यसरखा पुत्रविना मारा ( मनमां ) दुःख रूपी अंधकार ( व्याप्त थयेलो छे. ) ॥ ७ ॥

**इदानीं तत्परित्रस्तं तदभ्युदयसूचकः । यदेष वीक्षितो युष्मच्चरणावरुणोदयः ॥ ८ ॥**

अन्वयः—इदानीं तत् परित्रस्तं, यत् तत् अभ्युदय सूचकः एषः युष्मत् चरणौ अरुणोदयः वीक्षितः. ॥ ८ ॥

अर्थः—(परंतु) हवे ते अंधकार दूर थयो छे, केमके ते (पुत्ररूपी सूर्यना) उदयने सूचवनारा आपना चरणोरूपी अरुणोदयनां दर्शन थयां छे. ॥ ८ ॥

**अथ पृथ्वीपतेः स्पष्टमिष्टार्थफलवल्लिकाम् । गिरमुल्लासयामास स मुनिः स्मितपुष्पिताम् ॥ ९ ॥**

अन्वयः—अथ सः मुनिः स्मित पुष्पितां इष्ट अर्थ फल वल्लिकां गिरं स्पष्टं पृथ्वीपतेः उल्लासयामास. ॥ ९ ॥

अर्थः-पछी ते मुनिराज हास्यरूपी पुष्पोवाळी, तथा इच्छित पदार्थरूपी फलनी वेलडीसरखी वाणी प्रगटरीते राजापासे कहेवा लाग्या.

**भविष्यति शुभं भूप सर्वमेव तव ध्रुवम् । यदस्मिन्पथि पान्थानां फलमिष्टं पदे पदे ॥ १० ॥**

अन्वयः—(हे) भूप ! ध्रुवं तव सर्वं शुभं एव भविष्यति, यत् अस्मिन् पथि पांथानां पदे पदे इष्टं फलं. ॥ १० ॥

अर्थः–हे राजन् ! खरेखर तमोने सघळुं सारुंज थशे, केमके आ धर्ममार्गमां चालनाराओने पगले पगले वांछित फल मळे छे.

**इहार्थे शृणु दृष्टान्तमस्ति विस्तीर्णवैभवम् । भूर्भुवःस्वस्त्रयीख्यातं दूरपाराभिधं पुरम् ॥ ११ ॥**

अन्वयः–इह अर्थे दृष्टांतं शृणु ? विस्तीर्ण वैभवं, भूः भुवः स्वः त्रयी ख्यातं दूरपार अभिधं पुरं अस्ति. ॥ ११ ॥

अर्थः—( वळी हे राजन् ! ) आ संबंधी तमो दृष्टांत सांभळो ? विशाल समृद्धिवाळुं, तथा पृथ्वी, पाताल अने स्वर्ग, ए त्रणेमां प्रख्याति पामेलुं "दूरपार" नामनुं नगर छे. ॥ ११ ॥

**यस्य भूमिगृहाण्याहुरधोलोकं विचक्षणाः । उच्चैःशिरोगृहाण्यूर्ध्वलोकमालोकशालिनः ॥ १२ ॥**

अन्वयः–आलोक शालिनः विचक्षणाः यस्य भूमि गृहाणि अधोलोकं, उच्चैः शिरोगृहाणि ऊर्ध्वलोकं आहुः. ॥ १२ ॥

अर्थः–ज्ञानवडे शोभता विचक्षणो जे नगरनां भोंयरांओने "अधोलोक" तथा उपरनां घरोने "ऊर्ध्वलोक" कहे छे. ॥ १२ ॥

**महारम्भवशीभूतसुरासुरनरोरगः । उग्रशासन इत्येतत्पुरं पाति जनाधिपः ॥ १३ ॥**

अन्वयः–महारंभ वशीभूत सुर असुर नर उरगः उग्रशासनः इति जनाधिपः एतत् पुरं पाति. ॥ १३ ॥

अर्थः—महोटा समारंभथी वश थयेल छे, देवो, दानवो, मनुष्यो तथा भुवनपतिओ जेने एवो " उग्रशासन " नामनो राजा ते नगरनुं रक्षण करे छे. ॥ १३ ॥

**दत्तमुच्चैःपदं येन तुष्टेनेव सुपर्वणाम् । अर्पितं कुपितेनेव द्विजिह्वानामधःपदम् ॥ १४ ॥**

अन्वयः–तुष्टेन इव येन सुपर्वणां उच्चै.पदं दत्तं, कुपितेन इव द्विजिह्वानां अध.पदं अर्पितं. ॥ १४ ॥

अर्थः—जाणे खुशी थयो होय नही ! तेम ते राजाए देवोने उंचुं स्थान आपेलुं छे, अने क्रोधित थयेलानीपेठे नागोने तेणे नीचुं स्थान आप्युं छे. ॥ १४ ॥

**बभूव सचिवः शुद्धबुद्धिरित्यस्य विश्रुतः । अशेषतत्पुरोदारसर्वव्यापारपारगः ॥ १५ ॥**

अन्वयः—अशेष तत्पुर उदार सर्व व्यापार पारगः " शुद्धबुद्धिः " इति विश्रुतः अस्य सचिवः बभूव. ॥ १५ ॥

अर्थः—तेनां सर्व नगरोनां सघळां विशाळ कार्योमां पारंगामी, एवो " शुद्ध बुद्धि " नामथी प्रख्यात थयेलोतेनो मंत्री हतो।।१५।।

**प्रभोरादेशतो नित्यं पुरेऽस्मिंश्चरतश्चिरात् । पुरुषाश्रय इत्यस्य मिलितः सुहृदन्यदा ॥ १६ ॥**

अन्वयः—प्रभोः आदेशतः नित्यं अस्मिन् पुरे चरतः चिरात् अन्यदा " पुरुषाश्रयः " इति सुहृद् अस्य मिलितः ॥ १६ ॥

अर्थः—स्वामीना हुकमथी हमेशां ते नगरमां फरतां थकां घणे काळे एक दिवसे " पुरुषाश्रय " नामनो मित्र तेने मळयो ॥१६॥

**स कोऽपि परमस्थेमा प्रेमास्मिन्नस्य विद्यते । बभूव भोजने येन भाजनस्यापि नान्तरम् ॥ १७ ॥**

अन्वयः—अस्मिन् अस्य परमस्थेमा सः कः अपि प्रेमा विद्यते, येन भोजने भाजनस्य अपि अंतरं न बभूव ॥ १७ ॥

अर्थः—ते मित्रमां तेनो घणीज स्थिरतावाळो ते कोइक एवो तो प्रेम जाम्यो, के जेथी भोजन समये भाजननो पण ( तेओ वच्चे ) अंतर रह्यो नही ॥ १७ ॥

**प्रीतिं बभार तेनैव स्नातेनालंकृतेन सः । न कदापि स्वयं स्नातो नालंकारं चकार वा ॥ १८ ॥**

अन्वयः—तेन एव स्नातेन अलंकृतेन सः प्रीतिं बभार, स्वयं कदापि न स्नातः, वा न अलंचकार ॥ १८ ॥

अर्थः—ते मित्रनेज न्हवरावीने, तथा आभूषणो पेहेरावीने ते खुशी थतो हतो, परंतु पोते कोइ पण दिवसे न्हातो नही, तेम आभूषणो पण पहेरतो नही ॥ १८ ॥

**स्वयं कुसुमकर्पूरकस्तूरीचन्दनादिभिः । अमुं स वासयामास न चक्रे वासमात्मनः ॥ १९ ॥**

अन्वयः-सः स्वयं अमुं कुसुम कर्पूर कस्तूरी चंदन आदिभिः वासयामास, आत्मनः वासं न चक्रे. ॥ १९ ॥

अर्थः-ते पोते ते मित्रने पुष्पो, कपूर, कस्तूरी, तथा चंदन आदिकवडे सुगंधी करतो हतो, परंतु पोताने सुगंधि करतो न्होतो.

**दुःखितो दुःखितस्यास्य स्पृहां पूरयितुं सदा । सोऽभ्रमद् भुवने बाढं मूढः स्वार्थनिरुद्यमः ॥२० ॥**

अन्वयः-सः मूढः स्वार्थ निरुद्यमः दुःखितः दुःखितस्य अस्य स्पृहां पूरयितुं सदा बाढं भुवने अभ्रमत्. ॥ २० ॥

अर्थः-ते मूर्ख स्वार्थमां आळसु थयोथको कष्ट वेठीने ( पण ) दुःख पामता एवा ते मित्रनी वांछा पूरवाने हमेशां विश्रामरहित जगतमां भमतो हतो. ॥ २० ॥

**वयस्योऽपि समं शेते समं जागर्ति तेन सः । समं याति समं तिष्ठत्याधिक्यं प्रेम्णि दर्शयन् ॥ २१ ॥**

अन्वयः—सः वयस्यः अपि प्रेम्णि आधिक्यं दर्शयन् तेन समं शेते, समं जागर्ति, समं याति, समं तिष्ठति. ॥ २१ ॥

अर्थः-ते मित्र पण प्रेममां अधिकपणुं देखाडतोथको तेनीसाथेज शयन करे, साथेज जागे, साथेज चाले, अने साथेज उभे छे.

**इति तस्य महोद्दामप्रेमप्रसरपेशलम् । नित्यासक्ततया नित्यमित्रमित्यमुमभ्यधुः ॥ २२ ॥**

अन्वयः-इति तस्य नित्य आसक्ततया महा उद्दाम प्रेम प्रसर पेशलं अमुं "नित्यमित्रं" इति अभ्यधुः. ॥ २२ ॥

अर्थः—एरीते तेना हमेशना आसक्तपणाथी अति प्रेमना प्रवाहथी आनंदित थयेला एवा तेने ( लोको ) "नित्यमित्र" नामथी

बोलावता हता. ॥ २२ ॥

**किं चैष पितृपूज्योऽयमिति दाक्षिण्यतः श्रुतिम् । दत्ते विश्वहिताख्यस्य पुंसो वाचि कदाचन ॥ २३ ॥**

अन्वयः-किंच एषः पितृपूज्यः, इति दाक्षिण्यतः कदाचन अयं "विश्वहित" आख्यस्य पुंसः वाचि श्रुतं दत्ते. ॥ २३ ॥

अर्थः-वळी आ (मारा) कुलगुरु छे, एवी दाक्षिणताथी कोइक दिवसे ते शुद्धबुद्धि "विश्वहित" नामना पुरुषनुं वचन सांभळेछे.

**अयमुल्लासमत्तो मां मन्यतेऽथ न मन्यते । इति द्विधामना विश्वहितः प्राह कदापि तम् ॥ २४ ॥**

अन्वयः-उल्लास मत्तः अयं मां मन्यते, अथ न मन्यते, इति द्विधामनाः विश्वहितः कदापि तं प्राह. ॥ २४ ॥

अर्थः—विलासमां उन्मत्त थयेलो आ शुद्धबुद्धि मारुं माने अथवा न ( पण ) माने, एम उच्चकमनवाळा ते विश्वहिते एकदिवसे तेने कह्युं के, ॥ २४ ॥

**उदारस्फाररूपश्रीर्महाकुलसमुद्भवः । सुहृत्तवैष नो कस्य प्रयाति स्पृहणीयताम् ॥ २५ ॥**

अन्वयः-उदार स्फार रूपश्रीः, महाकुल समुद्भवः एषः तव सुहृत् कस्य स्पृहणीयतां न याति ? ॥ २५ ॥

अर्थः—मनोहर विस्तीर्ण रूपनी शोभावाळो, तथा महान् कुलमां उत्पन्न थयेलो आ तारो मित्र कोने आनंद उपजावतो नथी !

**किं तु त्वमनुरक्तोऽसि यथास्मिन्न तथा त्वयि । अयमन्तःकुशुद्धत्वाद्धारयत्यनुरागिताम् ॥ २६ ॥**

अन्वयः-किंतु यथा त्वं अस्मिन् अनुरक्तः असि, तथा अयं अंतः कुशुद्धत्वात् त्वयि अनुरागितां न धारयति, ॥ २६ ॥

अर्थः–परंतु जेम तुं तेनामां आसक्त छो, तेम आ (तारो मित्र) मनमां मेलो होवाथी ताराप्रते अनुरागिपणुं धारण करतो नथी.

**यतः स्नानेन भोज्येनालंक्रियेत यदैव न । कदाप्यसत्कृत इव स्याद्विरूपस्तदैव सः ॥ २७ ॥**

अन्वयः–यतः कदापि यदा एव स्नानेन, भोज्येन सः न अलंक्रियेत, तदैव असत्कृतः इव विरूपः स्यात्. ॥ २७ ॥

अर्थः–केमके कोइक दिवसे ज्यारे स्नान, भोजन, तथा आभूषणोवडे तेनो सत्कार करवामां नही आवे, तेज वखते ते तिरस्कार पामेलानीपेठे विकृतिवाळो थइ जशे. ॥ २७ ॥

**तद्यावद्दैवतो न स्याद्वैचित्यममुना सह । दुःखेऽप्याश्वासकस्तावत्कर्तुं कोऽप्युचितः सुहृत् ॥ २८ ॥**

अन्वयः—तत् दैवतः यावत् अमुना सह वैचित्यं न स्यात्, तावत् दुःखे अपि आश्वासकः कः अपि सुहृत् कर्तुं उचितः ॥२८॥

अर्थः—माटे दैवयोगे ज्यां सुधीमां ते मित्र साथे वैमनस्य न थाय, त्यां सुधीमां दुःखमां पण आश्वासन आपनारो कोइक मित्र (तारे) करवो उचित छे. ॥ २८ ॥

**यदा विघटसे दैवात्सहानेन तदा तव । नान्यो भावी सुहृल्लोकैर्दूरस्थैस्तु हसिष्यसे ॥ २९ ॥**

अन्वयः–दैवात् यदा अनेन सह विघटसे, तदा तव अन्यः सुहृद् न भावी, लोकैः तु दूरस्थैः हसिष्यसे. ॥ २९ ॥

अर्थः–(केमके) दैवयोगे ज्यारे आ मित्रनी साथे तारो अणबनाव थशे, त्यारे तारो बीजो कोइ मित्र थशे नही, अने लोको तो दूर रहीने तारी हांसी कर्या करशे. ॥ २९ ॥

एकं नेत्रमनेत्रेषु सूनुमेकमसूनुषु । एकं मित्रममित्रेषु जगुर्मित्राणि तत्कुरु ॥ ३० ॥

अन्वयः—एकं नेत्रं अनेत्रेषु, एकं सूनुं असूनुषु, एकं मित्रं अमित्रेषु जगुः, तत् मित्राणि कुरु ? ॥ ३० ॥

अर्थः-(वळी) एक चक्षु अचक्षुमां, एक पुत्र अपुत्रोमां, अने एक मित्र अमित्रोमां लेखाय छे, माटे (वधारे) मित्रो कर ? ॥३०॥

इति विश्वहितोक्त्यासौ किंचिदञ्चितचेतनः । चक्रे मित्रं कृतज्ञाख्यमपरं शिथिलादरः ॥ ३१ ॥

अन्वयः—इति विश्वहित उक्त्या किंचित् अंचित चेतनः असौ शिथिल आदरः "कृतज्ञाख्यं" अपरं मित्रं चक्रे. ॥ ३१ ॥

अर्थः-ए रीतनां विश्वहितनां वचनथी कंइंक भान आवतां तेणे मंद आदरमानपूर्बक "कृतज्ञ" नामनो बीजो मित्र कर्यो. ॥३१॥

तमन्नवस्त्रालंकारगन्धताम्बूलमण्डलैः । सोऽप्रीणयत्कृतज्ञाख्यं मित्रं पर्वणि पर्वणि ॥ ३२ ॥

अन्वयः—सः तं कृतज्ञाख्यं मित्रं पर्वणि पर्वणि अन्न वस्त्र अलंकार गंध तांबूल मंडलैः अप्रीणयत्. ॥ ३२ ॥

अर्थः—( पछी ) ते ते कृतज्ञनामना मित्रने पर्वे पर्वे भोजन, वस्त्र, :आभूषण, सुगंधि पदार्थो, तथा तांबूलना समूहोवडे खुशी करवा लाग्यो, ॥ ३२ ॥

पूज्यमानं समालोक्य तेन सर्वेषु पर्वषु । समाचचक्षिरे पर्ववयस्य इति तं जनाः ॥ ३३ ॥

अन्वयः-तेन सर्वेषु पर्वेषु पूज्यमानं तं समालोक्य जनाः "पर्ववयस्यः" इति समाचचक्षिरे. ॥ ३३ ॥

अर्थः-तेनावडे सर्व पर्वोमां पूजाता एवा तेने जोइने लोको (तेने) "पर्वमित्र" एवा नामथी बोलाववा लाग्या. ॥ ३३ ॥

ईदृग्विधसुहृद्द्वन्द्वनिबिडद्वन्द्वपातिनम् । स विश्वमहिता विश्वहितोऽमुं पुनरभ्यधात् ॥ ३४ ॥

अन्वयः–ईदृग्विध सुहृद् द्वंद्व निबिड द्वंद्व पातिनं अमुं विश्वमहिता सः विश्वहितः पुनः अभ्यधात्. ॥ ३४ ॥

अर्थः–एवी रीतना बन्ने मित्रोनी गाढ मित्राचारीमां पडेला एवा ते शुद्धबुद्धिने जगतमां पूजनीक एवा ते विश्वहिते फरीने कह्युं के,

त्वद्दुःखे दुःखितो भावी सैष पर्वसुहृत्क्षणम् । भव्योऽयमपि किं त्वीदृग्मित्रार्थं न दिशाम्यहम् ॥३५॥

अन्वयः—सः एषः पर्वसुहृत् त्वद्दुःखे क्षणं दुःखितः भावी, अयं अपि भव्यः, किंतु अहं ईदृग्मित्रार्थं न दिशामि. ॥३५॥

अर्थः—ते आ पर्वमित्र तारा दुःखवखते थोडीवार दुःखी थशे, माटे ते पण ठीक छे, परंतु में ( तने ) आवा मित्रमाटे इसारो न्होतो कर्यो. ॥ ३५ ॥

यः स्यादल्पेन संतुष्टो नत्या वा स्तवनेन वा । दुःखेभ्यः क्षम उद्धर्तुं स कोऽपि क्रियतां सुहृत् ॥३६॥

अन्वयः–यः नत्या वा स्तवनेन, वा अल्पेन संतुष्टः स्यात्, दुःखेभ्यः उद्धर्तुं क्षमः, सः कः अपि सुहृत् क्रियतां ? ॥ ३६ ॥

अर्थः–जे नमस्कारथी अथवा स्तुतिथी, एम स्वल्प कार्यथीज संतुष्ट थाय, तथा दुःखमांथी छोडाववाने समर्थ होय, एवो कोइक मित्र तुं कर ? ॥ ३६ ॥

विहस्य शिरसि न्यस्य शुद्धबुद्धिः करौ ततः । क्वेदृग्मया सुहृल्लभ्योऽपृच्छद्विश्वहितादिति ॥ ३७ ॥

अन्वयः–ततः शुद्धबुद्धिः विहस्य शिरसि करौ न्यस्य, ईदृग् सुहृद् मया क्व लभ्यः, इति विश्वहितात् अपृच्छत्. ॥ ३७ ॥

अर्थः-पछी ते शुद्ध बुद्धिए हसीने, तथा मस्तके हाथ जोडीने, आवो मित्र मने क्यां मळे ? एम विश्वहितने पूछयुं. ॥ ३७ ॥

**अथैष श्रवणानन्दप्रवणामन्दवाग्भरः । शुद्धबुद्धेः पुरो विश्वहितं विश्वहितो जगौ ॥ ३८ ॥**

अन्वयः—अथ श्रवण आनंद प्रवण अमंद वाग्भरः एषः विश्वहितः शुद्धबुद्धेः पुरः विश्वहितं जगौ. ॥ ३८ ॥

अर्थः—पछी कर्णोने आनंद आपवामां समर्थ अने विशालवाणीना समूहवाळा एवा ते विश्वहिते शुद्धबुद्धिनी आगल जगतने हितकारी वचन कह्युं के, ॥ ३८ ॥

**विभावरीविभुविभासंनिभामलकुन्तलम् । रङ्गद्गङ्गातरङ्गायमानश्रीवरचीवरम् ॥ ३९ ॥**

**मुक्ताचन्दनकर्पूरपूरगौरतरद्युतिम् । तारकोटीरताडङ्कहारकेयूरकङ्कणम् ॥ ४० ॥**

**आनाभिकूर्चमुत्तुङ्गविस्तीर्णाङ्गं सदास्मितम् । दृशा प्रसन्नया पुंसः पश्यन्तं नमतोऽग्रतः ॥ ४१ ॥**

**मध्येपुरं परिभ्राम्यञ्शुद्धबुद्धे कदाचन । पुमांसं मांसलश्रीकमीदृशं क्वापि पश्यसि ॥४२॥चतुर्भिः कला.**

अन्वयः—विभावरी विभु विभा संनिभ अमल कुंतलं, रंगत् गंगा तरंगायमान श्री वर चीवरं, ॥ ३९ ॥ मुक्ता चंदन कर्पूर पूर गौरतर द्युतिं, तार कोटीर ताडंक हार केयूर कंकणं, ॥ ४० ॥ आनाभि कूर्च, उत्तुंग विस्तीर्ण अंगं, सदास्मितं, अग्रतः नमतः पुंसः प्रसन्नया दृशा पश्यंतं, ॥ ४१ ॥ मांसलश्रीकं, ईदृशं पुमांसं, (हे) शुद्धबुद्धे ! मध्येपुरं परिभ्राम्यन् कदाचन क्व अपि पश्यसि.

अर्थः—चंद्रनी कांतिसरखा निर्मल (श्वेत) केशोवाळा, गंगाना उछळतां मोजांसरखा शोभनिक उत्तम (श्वेत) वस्त्रोवाळा, ॥३९॥ मोती, चंदन, तथा कपूरना समूहसरखी अति श्वेत कांतिवाळा, मनोहर मुकुट, कुंडल, हार, बाजुबंध तथा कंकणना (अलंकारोवाळा,) ॥ ४० ॥ छेक नाभिपर्यंत (लटकता) दाढीना केशोवाळा, उंचां विशाल शरीरवाळा, हमेशां हसमुखा, आगळ ( आवीने ) नमता पुरुषोने प्रेमभरी दृष्टिथी जोता, ॥ ४१ ॥ तथा महान समृद्धिवाळा, एवा पुरुषने, हे शुद्धबुद्धि ! (तुं) नगरनी अंदर भ्रमण करतोथको कोइक वखते क्यांक पण जोइ शकीश. ॥ ४२ ॥ चतुर्भिःकलापकं ॥

**अथ सोऽभिदधे तात कदापि जिनसद्मनि । कदापि मुनिशालायां कदापि सदने सताम् ॥ ४३ ॥**

**कदापि राजमार्गान्तः संचरन्तं नरोत्तमम् । संचरन्पथि पश्यामि सेव्यमानं वरैर्नरैः ॥ ४४ ॥युग्मम् ॥**

अन्वयः–अथ सः अभिदधे, (हे) तात ! कदापि जिन सद्मनि, कदापि मुनिशालायां, कदापि सतां सदने, ॥ ४३ ॥ कदापि राजमार्गांतः संचरंतं, वरैः नरैः सेव्यमानं नरोत्तमं पथि संचरन् पश्यामि. ॥ ४४ ॥ युग्मं ॥

अर्थः—पछी ते शुद्धबुद्धिए कह्युं के, हे तात ! कोइक दिवस जिनमंदिरमां, कोइक दिवस मुनिओना उपाश्रयमां, कोइक दिवस सज्जनोने घेर, ॥ ४३ ॥ तथा कोइक दिवस राजमार्गमां चालता, अने उत्तम पुरुषोथी सेवता, एवा ते उत्तम पुरुषने मार्गे चालतो हुं जोउं छुं. ॥ ४४ ॥ युग्मं ॥

**इत्याकर्ण्य जगौ विश्वहिस्तत्तं सुहृत्कुरु । अङ्ग तत्संगमाधाने दुःखं न स्यात्कुतोऽपि ते ॥ ४५ ॥**

अन्वयः—इति आकर्ण्य विश्वहितः जगौ, तत् तं सुहृत् कुरु? तत्संगम आधाने अंग ते कुतः अपि दुःखं न स्यात्. ॥ ४५ ॥

अर्थः—ते सांभळीने ते विश्वहिते कह्युं, ते माटे तेने तुं मित्र कर? तेनी मित्राइ करवाथी खरेखर तने क्यांयथी पण दुःख थशे नही. ॥ ४५ ॥

**स हि सिद्धः पुमाँल्लोकनाथाख्यः सर्वगो महान् । आश्रितं पाति भूपाग्निकूपसर्पाद्यपायतः ॥ ४६ ॥**

अन्वयः–हि सः सर्वगः महान् लोकनाथाख्यः सिद्धः पुमान् आश्रितं भूप अग्नि कूप सर्प आदि अपायतः पाति. ॥ ४६ ॥

अर्थः—खरेखर ते सर्वज्ञ अने महान् लोकनाथ नामना सिद्ध पुरुष छे, अने ते ( पोताना ) आश्रितनुं राजा अग्नि, कुवा, तथा सर्प आदिकना उपद्रवथी रक्षण करे छे. ॥ ४६ ॥

**इत्यस्य शिक्षया सख्यं तेन साकं चिकीर्षति । प्रमादाद्विस्मरत्येव शुद्धबुद्धिर्दिने दीने ॥ ४७ ॥**

अन्वयः–इति अस्य शिक्षया शुद्धबुद्धिः तेन साकं सख्यं चिकीर्षति, दिने दिने प्रमादात् विस्मरति एव, ॥ ४७ ॥

अर्थः–एवी रीतनी तेनी शिखामणथी ते शुद्धबुद्धि तेनी साथे मित्राइ करवानी इच्छा तो करे छे, परंतु रोजेरोज आळसने लीधे ते विस्मरी जाय छे. ॥ ४७ ॥

**अभियोगे ततो विश्वहितेन विहिते मुहुः । तं ननामैकदा लोकनाथं यानस्थ एव सः ॥ ४८ ॥**

अन्वयः—ततः विश्वहितेन मुहुः अभियोगे विहिते, एकदा यानस्थः एव सः तं लोकनाथं ननाम. ॥ ४८ ॥

अर्थ –पछी ते विश्वहिते वारंवार उत्कंठाथी एक दिवसे वाहनमां बेठांबेठांज तेणे ते लोकनाथने वंदन कर्युं. ॥ ४८ ॥

**कदापि कार्यतो गच्छन्दूरे दृष्टस्य वर्त्मनि । तस्य प्रणामसंदेशं प्रेषयामास पार्श्वगैः ॥ ४९ ॥**

अन्वयः–कदापि कार्यतः गच्छन् वर्त्मनि दूरे दृष्टस्य तस्य पार्श्वगैः प्रणाम संदेशं प्रेषयामास. ॥ ४९ ॥

अर्थः–(वळी) एक दिवसे कार्य प्रसंगे (बहार) जतां, मार्गमां दूरथी देखायेला एवा ते लोकनाथने (तेणे) पासे उभेला (नोकरोमारफते) प्रणामनो संदेशो मोकलाव्यो. ॥ ४९ ॥

**फलपुष्पादिकं चारु केनचिद्ढौकनीकृतम् । यस्य कस्यापि हस्तेन तस्मै प्रैषोत्कदापि सः ॥ ५० ॥**

अन्वयः—कदापि सः केनचित् ढौकनीकृतं चारु फल पुष्पादिकं यस्य कस्य अपि हस्तेन तस्मै प्रैषीत् ॥ ५० ॥

अर्थ.—( वळी ) एक दिवसे तेणे, कोइए भेट आपेलां मनोहर फल पुष्पआदिक, कोइक माणसनी मारफते ते लोकनाथने मोकलाव्यां. ॥ ५० ॥

**दूरस्थोऽपि स्वयं गत्वा युग्यादुत्तीर्य नम्यते । स महात्मा स्वयं चास्मै ढौक्यं पुष्पफलादिकम् ॥५१॥**
**इत्थमाराध्यमानोऽयमतिदाक्षिण्यपूरितः । दक्ष रक्षिष्यति स्पष्टं भवत्कष्टं कुतोऽपि ते ॥ ५२ ॥**
**एवं पुनरसौ विश्वहितेनाभिहितो मुदा । यानादुत्तीर्य तं पुष्पफलैरर्चति वन्दते ॥५३॥त्रिभिर्विशेषकम्॥**

अन्वयः—दूरस्थः अपि सः महात्मा युग्यात् उत्तीर्य स्वयं गत्वा नम्यते, च पुष्प फल आदिकं अस्मै स्वयं ढौक्यं. ॥ ५१ ॥ (हे) दक्ष ! इत्थं आराध्यमानः अयं अति दाक्षिण्य पूरित कुत अपि ते भवत् कष्टं स्पष्टं रक्षिष्यति, ॥ ५२ ॥ एवं पुनः विश्व हितेन अभिहितः असौ मुदा यानात् उत्तीर्य तं पुष्प फलैः अर्चति वंदते. ॥ ५३ ॥ त्रिभिर्विशेषकं ॥

अर्थः—दूर रहेला एवा पण ते महात्माने, वाहनपरथी नीचे उतरी पोते जइ वांदवा, तथा पुष्पो अने फलोआदिक तेमने पोताने हाथेज भेट धरवां, ॥ ५१ ॥ हे चतुर शुद्धबुद्धि ! एरीते आराधेला ते लोकनाथ अत्यंत दाक्षिणता धारण करीने, क्यांयथी पण तने आवी पडता दुःखनुं निवारण करशे, ॥ ५२ ॥ एरीते वळी ते विश्वहिते कहेवाथी ते शुद्धबुद्धि हर्षथी वाहनपरथी उतरीने तेमने पुष्पो तथा फलोवडे पूजे छे, तथा वंदन करे छे. ॥ ५३ ॥ त्रिभिर्विशेषकं ॥

**अयमालोकितं मार्गे नियमेन नमत्यमुम् । इति प्रणामसुहृदं जगदुस्तस्य तं जनाः ॥ ५४ ॥**

अन्वयः—मार्गे आलोकितं अमुं अयं नियमेन नमति, इति जनाः तं तस्य प्रणाम सुहृदं जगदुः. ॥ ५४ ॥

अर्थः—मार्गमां नजरे पडता एवा ते लोकनाथने ते शुद्धबुध्धि नियमबंध वांदे छे, एवा हेतुथी लोको तेने तेनो "प्रणाममित्र" कहेवा लाग्या. ॥ ५४ ॥

**इति मित्रत्रयीमेनामेष संतोषयन्सदा । उग्रशासनभूपस्य शासने सुचिरं स्थितः ॥ ५५ ॥**

अन्वयः—इति एनां मित्रत्रयीं सदा संतोषयन् एषः उग्र शासन भूपस्य शासने सुचिरं स्थितः. ॥ ५५ ॥

अर्थः–एरीते ते त्रणे मित्रोने हमेशां संतोषतो ते शुद्धबुद्धि उग्रशासन राजाना राज्यमां घणा समयसुधी रह्यो. ॥ ५५ ॥

**एकदा नित्यमित्रेण सहैकशयने स्थितः । सुखं स एष सुष्वाप भूरिभोगविभूषणः ॥ ५६ ॥**

अन्वयः—एकदा नित्यमित्रेण सह एक शयने स्थितः सः एषः भूरि भोग विभूषणः सुखं सुष्वाप. ॥ ५६ ॥

अर्थः—( पछी ) एक दिवसे ते नित्यमित्रनी साथे एक बिछानामां रहीने ते आ शुद्धबुद्धि घणा भोगोथी विभूषित थइने सुखेथी सूतो. ॥ ५६ ॥

**यावन्निद्रां मुमोचायं तावत्पार्श्वेष्वलोकत । श्यामाञ्शोणदृशः क्रूरान्नरानुद्गर्वेमुद्गरान् ॥ ५७ ॥**

अन्वयः–यावत् अयं निद्रां मुमोच, तावत् पार्श्वेषु श्यामान्, शोण दृशः, क्रूरान्, उद्गर्व मुद्गरान् नरान् अलोकत. ॥५७॥

अर्थः—( पछी ) जेवामां तेणे निद्रानो त्याग कर्यो, तेवामां ( पोतानी ) पडखे श्याम शरीरवाळा, लाल आंखोवाळा, भयंकर, अने उगामेला मुद्गरोवाळा पुरुषोने ते जोवा लाग्यो. ॥ ५७ ॥

**क्रुद्धस्य भर्तुरादेशकृतो यूयं किमागताः । मयि केनापराधेन कारितं प्रभुणास्ति किम् ॥ ५८ ॥**

**एवमेतेन ते पृष्टाः प्राहुर्भर्तैव दोषवित् । त्वं तु स्वाम्यादतः क्रुद्ध्वा क्षेपितोऽस्यद्य कूपके ॥ ५९ ॥**

अन्वयः–क्रुद्धस्य भर्तुः आदेशकृतः यूयं किं आगताः ? केन अपराधेन प्रभुणा मयि किं कारितं अस्ति ? ॥ ५८ ॥ एवं एतेन पृष्टाः ते आहुः, दोषवित् भर्ता एव, त्वं तु अतः स्वाम्यात् क्रुद्ध्वा अद्य कूपके क्षेपितः असि. ॥ ५९ ॥ युग्मं ॥

अर्थः–क्रोधातुर थयेला एवा ते उग्रशासन राजाना नोकरो, एवा तमो (अहीं) केम आव्या छो? अने शुं अपराधथी ते राजाए मारेमाटे तमोने शुं फरमाव्युं छे? ॥ ५८ ॥ एम तेणे पूछवाथी तेओए कह्युं के, तमारा अपराधना संबंधमां तो ते राजाज जाणे छे, परंतु तमोने आ अधिकार उपरथी उतारीने आजे कुवामां फेंकी दीधा छे, ॥ ५९ ॥ युग्मं ॥

**इति तद्वाक्यमाकर्ण्य सोऽयं भयभराकुलः। नित्यमित्रं प्रति प्रोचे गिरा मन्दत्वगुप्तया ॥ ६० ॥**

अन्वयः—इति तद्वाक्यं आकर्ण्य भय भर आकुलः सः अयं मंदत्व गुप्तया गिरा नित्यमित्रंप्रति प्रोचे. ॥ ६० ॥

अर्थः—एरीततुं तेओनुं वचन सांभळीने भयना समूहथी व्यकुल थयेलो ते शुद्धबुद्धि धणीज धीमी अने गुप्त वाणीथी ते नित्य मित्रने कहेवा लाग्यो के, ॥ ६० ॥

**सखे सखे समुत्तिष्ठ कथंचिदपि रक्ष माम्। उग्रशासनधात्रीशः क्रुद्धवानधुना मयि ॥ ६१ ॥**

अन्वयः–(हे) सखे! सखे! समुत्तिष्ठ? कथंचित् अपि मां रक्ष? अधुना मयि उग्र शासन धात्रीशः क्रुद्धवान्. ॥ ६१ ॥

अर्थः—हे मित्र! मित्र! तुं उभो था? अने कोइपण रीते मारुं रक्षण कर? (केमके) आ वखते मारापर उग्रशासन राजा क्रोधायमान थयो छे. ॥ ६१ ॥

**कति संपदि मित्राणि न स्युर्लुब्धानि देहिनाम्। दृश्यतेऽपि विपत्तौ यः क्षितिस्तेनैव रत्नसूः ॥ ६२ ॥**

अन्वयः—संपदि देहिनां कति लुब्धानि मित्राणि न स्युः? यः विपत्तौ अपि दृश्यते, तेन एव क्षितिः रत्नसूः. ॥ ६२ ॥

अर्थः—संपत् वखते प्राणीओने केटला लालचु मित्रो नथी आवी मळता ? परंतु दुःख वखते पण जे आवी मळे छे, तेथीज आ पृथ्वी रत्नने उत्पन्न करनारी कहेवाय छे. ॥ ६२ ॥

**पितृमातृप्रियाभ्रातृपुत्रादिभ्योऽपि वत्सलः । सुहृन्ममासि सन्मित्रं दुःखोद्धाराय धार्यते ॥ ६३ ॥**

अन्वयः-(हे) सुहृत्! (त्वं) मम पितृ मातृ प्रिया भ्रातृ पुत्र आदिभ्यः अपि वत्सलः असि, दुःख उद्धाराय सन्मित्रं धार्यते.

अर्थः—हे मित्र! तुं मने पिता, माता, स्त्री, भाइ, तथा पुत्र आदिकथी पण वहालो छे. वळी (मनुष्यो) दुःखमांथी उगरवामाटे उत्तम मित्रने धारण करे छे. ॥ ६३ ॥

**तदिदानीं ममानेन क्लिश्यमानस्य भूभुजा । अपारदुःखकूपारतारणाय तरीभव ॥ ६४ ॥**

अन्वयः-तत् इदानीं अनेन भूभुजा क्लिश्यमानस्य मम अपार दुःख कूपार तारणाय तरीभव ? ॥ ६४ ॥

अर्थः-माटे आसमये आ उग्रशासन राजाथी पीडा पामता, एवा मने आ अपार कष्टना महासागरमांथी तारवाने (तुं) नावरूप था?

**अथो म्लानाननो नित्यसुहृदित्याह किं नु भोः । नृपं दिशसि मे क्रुद्धं संबन्धः क इवावयोः ॥ ६५ ॥**

अन्वयः-अथो म्लान आननः नित्य सुहृद् इति आह, भोः क्रुद्धं नृपं मे नु किं दिशसि ? आवयोः कः इव संबंधः! ॥६५॥

अर्थः-त्यारे झंखवाणा मुखवाळो ते नित्यमित्र एम कहेवा लाग्यो के, अरे ! क्रोध पामेला राजाना संबंधमां मने (तुं) शुं कहे छे? आपण बन्ने वच्चे शानो संबंध छे! ॥ ६५ ॥

**किं नोपलक्षतेऽसौ मामिति भ्रान्त्येव शुद्धधीः । कस्ते चित्तभ्रमः किं मां न जानासीति तं जगौ ।६६।**

अन्वयः—मां असौ किं न उपलक्षते ? इति भ्रांत्या इव शुद्धधीः तं इति जगौ, ते कः चित्तभ्रमः ! किं मां न जानासि ? ६६

अर्थः—मने आ शुं नथी ओळखतो ? जाणे एवी भ्रमणाथी होय नही ! तेम (ते) शुद्धबुद्धिए तेने एम कह्युं के, तने आ चित्तभ्रम शुं थयो ? शुं (तुं) मने नथी ओळखतो ? ॥ ६६ ॥

**अथायमूचे ज्ञातोऽसि राजद्विष्टं किमप्यधाः । तत्त्वां न्यग्राहयन्न्यायाभिग्रहोऽप्युग्रशासनः ॥ ६७ ॥**

अन्वयः—अथ अयं ऊचे, ज्ञातः असि, किं अपि राजद्विष्टं अधाः, तत् न्याय अभिग्रहः उग्र शासनः अपि त्वां न्यग्राहयत्.

अर्थः—त्यारे ते नित्यमित्रे कह्युं के, हुं तने ओळखुं छुं. तें कंइक पण राजविरुद्ध आचरण कर्युं छे, अने तेथी ते न्यायनिष्ट उग्रशासन राजाए पण तने शिक्षा करी छे. ॥ ६७ ॥

**तन्मे राजविरुद्धेन न कार्यं किमपि त्वया । स्वकृतस्य प्रमाणेन सहस्वैकोऽपि निग्रहम् ॥ ६८ ॥**

अन्वय—तत् राजविरुद्धेन त्वया मे किं अपि कार्यं न, स्वकृतस्य प्रमाणेन एकः अपि निग्रहं सहस्व ? ॥६८॥

अर्थः—माटे राजविरुद्ध आचरण करनार एवा तारीसाथे मारे (रहेवानी) कंइ पण जरुर नथी. “पोतानुं कर्युं पोते भोगवे” ए न्यायथी तुं एकलोज आ सजा भोगव ? ॥ ६८ ॥

**ऊचे सोऽथ सखे नित्यमकृत्यं त्वत्कृते कृतम् । सर्वं ह्युपकृतं तुभ्यं मुक्तान्युपकृतानि हा ॥ ६९ ॥**

अन्वयः—अथ सः ऊचे, (हे) सखे ! त्वत्कृते नित्यं अकृत्यं कृतं, हि तुभ्यं सर्वं उपकृतं, हा ! उपकृतानि मुक्तानि ? ॥ ६९ ॥

अर्थः—त्यारे ते शुद्धबुद्धिए कह्युं के, हे मित्र ! तारेमाटे (में) हमेशां अकार्यो कर्यां, (अने) खरेखर तारापर सर्व उपकारो कर्या, अरेरे ! (ते) उपकारो तें (शुं) विसारी मेल्या ! ॥ ६९ ॥

**अथातिविधुरो नित्यसुहृदभ्यधित क्रुधा । किमुद्घुष्यसि निर्लज्ज मत्कृते किं कृतं त्वया ॥ ७० ॥**

अन्वयः—अथ अति विधुरः नित्य सुहृद् क्रुधा अभ्यधित, (रे) निर्लज्ज ! किं उद्घुष्यसि ? मत्कृते त्वया किं कृतं ? ॥ ७० ॥

अर्थः—त्यारे अति अकळायेला ते नित्यमित्रे क्रोधथी कह्युं के, अरे ! बेशरम ! शुं (तुं) लवान करी रह्यो छे ? मारे माटे तें शुं कर्युं छे?

**यथा यथाहं त्वद्दत्तमाहरामि तथा तथा । प्रीतिस्तेऽभूत्ततः स्वस्मै त्वया सर्वं कृतं न मे ॥ ७१ ॥**

अन्वयः—अहं यथा यथा त्वद् दत्तं आहरामि, तथा तथा ते प्रीतिः अभूत्, ततः त्वया स्वस्मै सर्वं कृतं, मे न. ॥ ७१ ॥

अर्थः—हुं जेम जेम तारुं आपेलुं खाउं छुं, तेम तेम तने आनंद थयो छे, माटे तें तारा पोताना माटेज सघळुं कर्युं छे, मारे माटे कंइज कर्युं नथी. ॥ ७१ ॥

**मिथ्यावादिन्न मे कार्यं राजद्विष्टकृता त्वया । तन्मे पार्श्वं विमुञ्चेति धिक्स तेन गले धृतः ॥ ७२ ॥**

अन्वयः-(रे) मिथ्यावादिन् ! राजद्विष्टकृता त्वया मे न कार्यं, तत् मे पार्श्वं विमुंच ? इति धिक् तेन सः गले धृतः. ॥७२॥

अर्थः-(माटे) अरे ! जूठाबोला लबाड ! राजविरुद्ध आचरण करनारा एवा तारीसाथे मारे कंइं लेवादेवा नथी, माटे मारुं पडखुं तजी दे ? एम कही अरेरे ! ते नित्यमित्रे ते (बिचाराने) गळचीमांथी पकड्यो. ॥ ७२ ॥

**इहान्तरे गृहान्तर्द्राक्पार्वणः सुहृदाययौ । उग्रशासनसंरुद्धं शुद्धबुद्धिं निशम्य सः ॥ ७३ ॥**

अन्वयः-इह अंतरे शुद्धबुद्धिं उग्र शासन संरुद्धं निशम्य सः पार्वणः सुहृद् द्राक् गृहांतः आययौ. ॥ ७३ ॥

अर्थः-एवामां (ते) शुद्धबुद्धिने उग्रशासने पकडेलो सांभळीने ते पर्वमित्र तुरत तेना घरनी अंदर आव्यो. ॥ ७३ ॥

**नित्यमित्रे विमुक्ताशो दीनं चक्षुर्जलाविलम् । किंकर्तव्यत्वमूढोऽसौ पर्वमित्रं प्रति न्यधात् ॥ ७४ ॥**

अन्वयः—नित्यमित्रे विमुक्त आशः, किं कर्तव्यत्व मूढः असौ पर्वमित्रंप्रति दीनं जल आविलं चक्षुः न्यधात्. ॥ ७४ ॥

अर्थः—नित्यमित्रमाटेनी आशा छोडीने, हवे शुं करवुं ? एवा विचारमां मूढ थयेलो ते शुद्धबुद्धि पर्वमित्र तरफ रंकनी पेठे आंसुओथी भरेली दृष्टि करवा लाग्यो. ॥ ७४ ॥

**जातं मित्र किमेतत्ते कथंचिच्छुट संप्रति । दत्वा मदीयं सर्वस्वं दुःखेऽस्मिन्मां नियुज्य वा ॥ ७५ ॥**

अन्वयः—(हे) मित्र ! एतत् ते किं जातं ? संप्रति मदीयं सर्वस्वं दत्वा, वा अस्मिन् दुःखे मां नियुज्य, कथंचित् छुट ?

अर्थः—( त्यारे ते पर्वमित्रे तेने कह्युं के ) हे मित्र ! आ तने शुं थइ गयुं ! हमणाज मारुं ( द्रव्यआदिक ) सर्व कंइं आपीने,

अथवा आ दुःखमां मने जोडीने तुं कोइ पण रीते छूटो था ? ॥ ७५ ॥

**एवं गलज्जलभरं कलयन्नयनद्वयम् । पर्वमित्रस्य गां श्रुत्वा दध्यौ शुद्धमतिस्तदा ॥ ७६ ॥**

अन्वयः–एवं पर्वमित्रस्य गां श्रुत्वा, गलत् जलभरं नयन द्वयं कलयन् तदा शुद्धमतिः दध्यौ. ॥ ७६ ॥

अर्थः–एरीतनी पर्वमित्रनी वाणी सांभळीने, तथा झरता आंसुओना समूहवाळी तेनी बन्ने आंखोने ध्यानमां लेतो ते शुद्धमति त्यारे बोल्यो के, ॥ ७६ ॥

**पोषितः प्लोषितस्वेन धिग्मया पुरुषाश्रयः । हहा कृतं कृतज्ञस्य न कदाचन किंचन ॥ ७७ ॥**

अन्वयः—धिक् ! प्लोषित स्वेन मया पुरुषाश्रयः पोषितः, हहा ! कृतज्ञस्य कदाचन किंचन न कृतं. ॥ ७७ ॥

अर्थः—(मने) धिक्कार छे ! के, पैसानुं पाणी करीने में (आ नित्यमित्रनामना) पुरुषाश्रयने पोष्यो ! (परंतु) अरेरे ! करेला उपकारने जाणनारा एवा (तमारामाटे) में कोइ दिवसे कंइ पण कर्युं नही. ॥ ७७ ॥

**इत्ययं चिन्तयन्नेव नित्यमित्रेण शुद्धधीः । गले बाढतरं धृत्वा द्रुतं दूरीकृतः स्वतः ॥ ७८ ॥**

अन्वयः—इति चिंतयन् एव अयं शुद्धधीः नित्य मित्रेण बाढतरं गले धृत्वा स्वतः द्रुतं दूरी कृतः. ॥ ७८ ॥

अर्थः–एम विचारतो हतो एवामांज ते शुद्धबुद्धिने ते नित्यमित्रे खूब जोरथी गरदन पकडीने पोतानी पासेथी तुरत दूर करी मेल्यो.

**मैनं नयध्वं स्थानेऽस्य मां नयध्वं रयादिति । पर्वमित्रे कृताक्रन्दे सोऽग्राहि नृपकिंकरैः ॥ ७९ ॥**

अन्वयः–एनं मा नयध्वं ? अस्य स्थाने मां नयध्वं ? इति रयात् पर्वमित्रे कृत आक्रंदे नृपकिंकरैः सः अग्राहि. ॥ ७९ ॥

अर्थः—(अरे !) आने न पकडी जाओ ? तेनी जगोए मने पकडी जाओ ? एम वेगथी पर्वमित्रे रडारोळ करते छते, राजाना नोकरोए ते शुद्धबुद्धिने पकडी लीधो. ॥ ७९ ॥

**तैस्तस्मिन्बलतः कृष्टे कष्टं पर्वसुहृद्यभूत् । चिरात्पुत्रीं विवाह्येवाशेत नित्यसुहृत्पुनः ॥ ८० ॥**

अन्वयः–तैः तस्मिन् बलतः कृष्टे पर्वसुहृदि कष्टं अभूत्, नित्य सुहृत् पुनः चिरात् पुत्रीं विवाह्य इव अशेत. ॥ ८० ॥

अर्थः—ते नोकरो तेने बलात्कारे खेंची जवाथी पर्वमित्रने तो कष्ट थयुं, परंतु नित्यमित्र तो जाणे घणे काळे पुत्रीनो विवाह करीने होय नही ! तेम निरांते सुइ गयो. ॥ ८० ॥

**द्वादशार्कप्रभाचक्रकर्कशेन कृशानुना । दीप्तक्रोडस्य कूपस्य पार्श्वेऽसौ तैरनीयत ॥ ८१ ॥**

अन्वयः–द्वादश अर्क प्रभा चक्र कर्कशेन कृशानुना दीप्त क्रोडस्य कूपस्य पार्श्वे तैः असौ अनीयत. ॥ ८१ ॥

अर्थः–बार सूर्योनी कांतिना समूहसरखा आकरा अग्निवडे बळतो छे मध्यभाग जेनो, एवा कूवानी पासे तेओ तेने लाव्या.

**इहामुष्मिन्नहं क्षेप्योऽमीभिः क्रूरताशयैः । तत्कथं नु भविष्यामीत्युत्कम्पोऽयमचिन्तयत् ॥ ८२ ॥**

अन्वयः–हहा ! क्रूरतर आशयैः अमीभिः अहं अमुष्मिन् क्षेप्यः, तत् कथं नु भविष्यामि ? इति उत्कंपः अयं अचिंतयत्.

अर्थः—अररे ! अति निर्दय आशयोवाळा आ राजकिंकरो मने आ (बळता) कूवामां फेंकवाना छे, तो हवे मारुं शुं थशे ? एम

कंपतोथको ते विचारवा लाग्यो के, ॥ ८२ ॥

**मयि विश्वहितेनोक्तं यदा दुःखे पतिष्यसि । त्वां सिद्धः सर्वगो लोकनाथः पास्यत्यसौ तदा ॥ ८३ ॥**

अन्वयः–मयि विश्व हितेन उक्तं, यदा दुःखे पतिष्यसि, तदा असौ सिद्धः सर्वगः लोक नाथः त्वां पास्यति. ॥ ८३ ॥

अर्थः–मने विश्वहिते कह्युं छे के, ज्यारे तुं दुःखमां पडीश, त्यारे आ सिद्ध अने सर्वज्ञ एवा लोकनाथ तारुं रक्षण करशे. ॥८३॥

**स मे संप्रति कालोऽयं करालोऽतिभयंकरः । तदसौ भवतु श्रीमाञ्शरणं करुणार्णवः ॥ ८४ ॥**

अन्वयः—संप्रति करालः अतिभयंकरः अयं मे सः कालः, तत् करुणा अर्णवः असौ श्रीमान् शरणं भवतु. ॥ ८४ ॥

अर्थः–माटे आ समये विक्राळ अने अतिभयंकर आ मारो ते समय (आवी लाग्यो छे), माटे करुणासागर एवा ते श्रीमान् लोकनाथनुं मने शरणुं होजो. ॥ ८४ ॥

**इत्यस्मिन्ध्यायति स्फायमानमञ्जुलतेजसः । हीरचीरपरीधानदृढबन्धकृशोदराः ॥ ८५ ॥**

**शुभ्रवज्रशिलागर्भमयदण्डोग्रपाणयः । अत्युदारहृदस्तारदृष्टयः स्फारमूर्तयः ॥ ८६ ॥**

**मुक्तादामदृढग्रन्थिग्रहावलितवेणयः । उत्तरस्या दिशः केचिदीयुः सारत्वरा नराः ॥८७॥ त्रिभिर्विशेषकम्**

अन्वयः—इति अस्मिन् ध्यायति, स्फायमान मंजुल तेजसः, हीर चीर परीधान दृढ बंध कृशोदराः, ॥ ८५ ॥ शुभ्र बज्र

शिला गर्भमय दंड उग्र पाणयः, अति उदार हृदः, तार दृष्टयः, स्फार मूर्तयः, ॥ ८६ ॥ मुक्ता दाम दृढ ग्रंथि ग्रह आवलित वेणयः, केचित् नराः सारत्वराः उत्तरस्याः दिशः ईयुः. ॥ ८७ ॥ त्रिभिर्विशेषकं ॥

अर्थः—एम ते लोकनाथनुं ध्यान धरतांथकां, विस्तार पामता मनोहर तेजवाळा, रेशमी वस्त्रना दुपट्टाना दृढ बंधनथी पातळी कटीतटवाळा, ॥ ८५ ॥ श्वेत वज्रमणिथी जडेला दंडोथी भयंकर हाथवाळा, अत्यंत निर्मल हृदयवाळा, विस्तीर्ण आंखोवाळा, मनोहर आकारवाळा, ॥ ८६ ॥ मुक्ताफलोनी माळाथी दृढ बांधेली गांठवाळी चोतरफ (मस्तकपर) गुंथेली वेणीओवाळा, केटलाक पुरुषो अति उतावळथी उत्तर दिशामांथी (ते शुद्धबुद्धिनी पासे) आव्या. ॥ ८७ ॥ त्रिभिर्विशेषकं ॥

**अमुं मुञ्चत रे योद्धुं मत्ता धत्तायुधानि वा । इति तेषां गिरा भूपकिंकरैः समरे स्थितम् ॥ ८८ ॥**

अन्वयः—रे मत्ताः ! अमुं मुंचत ? वा योध्धुं आयुधानि धत्त ? इति तेषां गिरा भूप किंकरैः समरे स्थितं. ॥ ८८ ॥

अर्थः—अरे ! उन्मत्त सुभटो ! आ शुद्धबुद्धिने छोडी द्यो ? नहितर युद्धमाटे हथीयार उपाडो ? एवीरीतनां तेओनां वचनथी ते उग्रशासन राजाना सुभटो लडाइमाटे तैयार थया. ॥ ८८ ॥

**ततस्तेषां च तेषां च दूरोद्धूतरजस्तमाः । प्रकम्पितजगच्चित्तः समरः समभून्महान् ॥८९॥**

अन्वयः—ततः तेषां च तेषां दूर उध्धूत रजः तमाः, प्रकंपित जगत् चित्तः महान् समरः समभूत्. ॥ ८९ ॥

अर्थः—पछी ते बन्ने पार्टीओना सुभटोवच्चे, दूरसुधि उडेली रजथी अंधकारवाळुं, तथा जगतना हृदयने कंपावनारुं महान्

युद्ध थवा लाग्युं. ॥ ८९ ॥

**तैर्महापुरुषै राजपुरुषाः परुषायुधाः । उच्चैःस्थितस्य लोकस्य पश्यतो जघ्निरेतराम् ॥ ९० ॥**

अन्वयः-तैः महापुरुषैः उच्चैः स्थितस्य लोकस्य पश्यतः परुषायुधाः राजपुरुषाः जघ्निरे तरां ॥ ९० ॥

अर्थः-ते महान पुरुषोए दूर बेठेला लोकोनी समक्ष तीक्ष्ण शस्त्रोवाळा ते उग्रशासनराजाना सुभटोने खूब मार्या. ॥ ९० ॥

**त्रासिताः पातिताः क्षुण्णा हारिता मारिताश्च ते । तैः सिद्धपूरुषैः पश्चाच्चक्रे विजयनर्तनम् ॥ ९१ ॥**

अन्वयः—तैः सिद्ध पुरुषैः ते त्रासिताः, पातिताः, क्षुण्णाः, हारिताः, च मारिताः, पश्चात् विजय नर्तनं चक्रे. ॥ ९१ ॥

अर्थः—ते सिद्ध पुरुषोए ते उग्रशासनना सुभटोने भयभीत कर्या, पाड्या, हंफाव्या, हराव्या, अने मार्या. तथा पछी तेओए ते विजयमाटे नृत्य कर्युं. ॥ ९१ ॥

**त्वत्प्रणामसुहृल्लोकनाथस्त्वामाह्वयेदिति । तं शुद्धबुद्धिं कूपान्तात्करेणादाय तेऽचलन् ॥ ९२ ॥**

अन्वयः-त्वत्प्रणाम सुहृद् लोकनाथः त्वां आह्वयेत्, इति तं शुद्धबुद्धिं कूप अंतात् करेण आदाय ते अचलन्. ॥ ९२ ॥

अर्थः—तारा प्रणाममित्र लोकनाथ तने बोलावे छे, एम कही ते शुद्धबुद्धिने ते कुवाना तळीयामांथी (पोताने) हाथे कहाडीने, साथे लेइ तेओ चालवा लाग्या. ॥ ९२ ॥

**स तैः समं व्रजन्नग्रे शिखरोल्लिखिताम्बरम् । अतुल्योल्लासिकल्याणमयसर्वाङ्गसुन्दरम् ॥ ९३ ॥**

अवचूलमिलन्मुक्तावलीवलयमञ्जुलम् । स्वविस्तारगुणैर्भूरिपूरिताशासमुच्चयम् ॥ ९४ ॥
अङ्गीकृतमहारङ्गतुरङ्गरथकुञ्जरम् । आलयं प्रीतिमानेकं सुविवेकं व्यलोकयत् ॥ ९५ ॥ त्रिभिर्विशेषकम्॥

अन्वयः—तैः समं अग्रे व्रजन् सः, शिखर उल्लिखित अंबरं, अतुल्य उल्लासि कल्याणमय सर्वांग सुंदरं, ॥ ९३ ॥ अवचूल मिलत् मुक्तावली वलय मंजुलं, स्व विस्तार गुणैः भूरि पूरित आशा समुच्चयं, ॥ ९४ ॥ अंगीकृत महारंग तुरंग रथ कुंजरं, एकं आलयं, सुविवेकं प्रीतिमान् व्यलोकयत्. ॥ ९५ ॥ त्रिभिर्विशेषकं ॥

अर्थः—तेओनी साथे आगळ चालतांथकां शिखरोवडे आकाशने कोतरता, अति चळकाटवाळा सुवर्णथी चोतरफ मढेल होवाथी सुंदर लागता, ॥ ९३ ॥ धजाओना अग्र भागमां लटकावेली मोतीओनी मालाओना वलयोथी शोभता, पोताना विस्तारना गुणोवडे घणो रोकेल छे दिशाओनो समूह जेणे एवा, ॥ ९४ ॥ स्वीकारायेल छे महान रंगवाळा घोडा, रथ तथा हाथी जेमां, एवा एक प्रासादने उत्तम विवेकपूर्वक खुशी थता ते शुद्धबुद्धिए जोयो. ॥ ९५ ॥ त्रिभिर्विशेषकं ॥

अथ क्वचित्कुरङ्गाक्षीशृङ्गारैर्नयनोत्सवे । क्वचिद्गीतसुधासिन्धुतरणोत्तरलश्रुतौ ॥ ९६ ॥
क्वचिद्बृहद्गृहारामसौरभ्योल्लासिनासिके । क्वचित्स्वाद्यशतालोकप्रचलद्रसनाञ्चले ॥ ९७ ॥
क्वचिद्विलाससरसीमरुत्पुलकिताङ्गके । तस्मिन्सद्मनि निश्छद्मप्रमोदः प्रविवेश सः ॥ ९८ ॥

अन्वयः—अथ क्वचित् कुरंगाक्षी शृंगारैः नयन उत्सवे, क्वचित् गीत सुधा सिंधु तरण उत्तरल श्रुतौ, ॥ ९६ ॥ क्वचित् बृहद् गृह आराम सौरभ्य उल्लासि नासिके, क्वचित् स्वाद्य शत आलोक प्रचलत् रसना अंचले, ॥ ९७ ॥ क्वचित् विलास सरसी मरुत् पुलकित अंगके, तस्मिन् सद्मनि निश्छद्म प्रमोदः सः प्रविवेश. ॥ ९८ ॥ त्रिभिर्विशेषकं ॥

अर्थः—पछी क्यांक स्त्रीओना शृंगारथी आंखोने आनंद आपनारा, क्यांक (गवातां) गायनरूपी अमृतसागरमां तरवामाटे अति उत्सुक थता श्रवणोवाळा, ॥ ९६ ॥ क्यांक घरपासे रहेला महान बगीचानी सुगंधिथी आनंद पामती नासिकावाळा, क्यांक खा-वालायक सेंकडोगमे पदार्थोना जोवाथी चपल थती जिह्वाना छेडावाळा, ॥ ९७ ॥ क्यांक मोज करवानी तलावडीपरथी आवता (ठंडा) वायुथी रोमांचित थतां शरीरवाळा, एवा ते मेहेलमां निर्मल आनंदवाळो ते शुद्धबुद्धि दाखल थयो. ॥९८॥ त्रिभिर्विशेषकं॥

अथारात्रिकसंकाशभ्रमन्मार्तण्डमण्डलम् । दूर्वाराजितरौप्यार्घपात्राभमृगलाञ्छनम् ॥ ९९ ॥
मङ्गलाक्षतसंभारनिभव्याकीर्णतारकम् । प्रणम्यमानं हृष्यद्भिः सुरासुरनराधिपैः ॥ १७०० ॥
स्तूयमानं स्वधीशक्त्या सर्वदर्शनसूरिभिः । प्रसादविशदां दृष्टिं ददतं सेवकान्प्रति ॥ १ ॥
युते चतुर्भिश्चरणैर्भाग्येनापि सुदुर्लभैः । निविष्टं विष्टरे लोकस्पृहणीये महीयसि ॥ २ ॥
तस्य विश्वहितस्याङ्के कृतावष्टम्भसुस्थिरम् । प्रणाममित्रं दीप्ताङ्गं लोकनाथमलोकयत् ॥ ३ ॥

अन्वयः–अथ आरात्रिक संकाश भ्रम मार्तंड मंडलं, दुर्वार अजित रौप्य अर्घपात्राभ मृग लांछनं, ॥ ९९ ॥ मंगल अक्षत संभार निभ व्याकीर्ण तारकं, हृष्यद्भिः सुर असुर नर अधिपैः प्रणम्यमानं, ॥ १७०० ॥ सर्व दर्शन सूरिभिः स्व धी शक्त्या स्तूयमानं, सेवकान् प्रति प्रसादविशदां दृष्टिं ददतं, ॥ १ ॥ भाग्येन अपि सुदुर्लभैः चतुर्भिः चरणैः युते, लोक स्पृहणीये, महीयसि विष्टरे निविष्टं, ॥ २ ॥ तस्य विश्वहितस्य अंके कृत अवष्टंभ सुस्थिरं, दीप्त अंगं, लोक नाथं प्रणाम मित्रं अलोकयत् ॥ ३ ॥

अर्थः—पछी आरतीसरखो भ्रम (करावतुं छे) सूर्यमंडल ज्यां, कबूल करवालायक उमदा रूपाना अर्घपात्रसरखो छे चंद्र ज्यां, ॥ ९९ ॥ मंगलीकमाटे तंडुलना समूहनीपेठे वीखरायेला छे ताराओ ज्यां, खुशी थता देव, दानव तथा मनुष्योना नायकोवडे वंदन कराता, ॥ १७०० ॥ सर्व दर्शनोना आचार्योवडे पोतपोतानी बुद्धिनी शक्तिमुजब स्तुति कराता, सेवकोप्रते कृपाथी निर्मल दृष्टि फेंकता, ॥ १ ॥ भाग्यथी पण न मळी शके एवा चार पायाओथी युक्त थयेला, लोकोने गमे एवा महान सिंहासनपर बेठेला, ॥ २ ॥ ते विश्वहितना खोळामां अढेलीने स्थिर थइ बेठेला तथा देदीप्यमान शरीरवाळा, एवा "लोकनाथ" नामना प्रणाममित्रने ते शुद्धबुद्धिए जोया. ॥ ३ ॥ पंचभिः कुलकं ॥

**तद्वीक्ष्य विस्मतोऽथायमध्यायद्धिग्ममौचितीम् । सर्वस्वं नित्यमित्राय दत्तं नो सत्कृतोऽप्ययम् ॥ ४ ॥**

अन्वयः–अथ तद् वीक्ष्य विस्मितः अयं अध्यायत्, मम औचितीं धिक्, नित्यमित्राय सर्वस्वं दत्तं, अयं सत्कृतः अपि न.

अर्थः–पछी ते जोइने आश्चर्य पामेलो ते शुद्धबुद्धि विचारवा लाग्यो के, अरे! मारी योग्यताने धिक्कार छे! नित्यमित्रने (में मारुं)

सर्वस्व आपी दीधुं, अने आ प्रणाममित्रनो तो में सत्कार पण कर्यो नथी. ॥ ४ ॥

**अभविष्यद्गतिः का मे कामेन चरतः क्षितौ । नतिमप्यकरिष्यं चेन्नास्य विश्वहितोक्तिभिः॥ ५ ॥**

अन्वयः-चेत् विश्वहित उक्तिभिः अस्य नतिं अपि न अकरिष्यं, कामेन क्षितौ चरतः मे का गतिः अभविष्यत् ? ॥ ५ ॥

अर्थः—जो विश्वहितना वचनोथी, आ लोकनाथने ( में ) नमस्कार पण न कर्यो होत तो, इच्छामुजब पृथ्वीपर भटकतो एवो जे हुं, तेनी शुं गति थात ? ॥ ५ ॥

**इति चिन्तार्तचित्तोऽयं लोकनाथं ननाम च । तेनालिङ्ग्य धृतश्चाङ्के सप्रमोदवशंवदः ॥ ६ ॥**

अन्वयः-इति चिंता आर्त चित्तः अयं लोकनाथं ननाम, तेन च आलिंग्य अंके धृतः, च सः प्रमोद वशंवदः ॥ ६ ॥

अर्थः—ए रीतनी चिंताथी पीडित हृदयवाळो ते शुद्धबुद्धि लोकनाथने नम्यो, अने तेणे पण ( तेने ) भेटीने खोळामां लीधो, अने (तेथी) ते खुशी थयो. ॥ ६ ॥

**किं मित्र विधुरोऽसीति पृष्टस्तेन महात्मना । शुद्धधीरभ्यधात्मन्युग्रशासनतो भयम् ॥ ७ ॥**

अन्वयः-(हे) मित्र ! किं विधुरः असि ? इति तेन महात्मना पृष्टः शुद्धधीः आत्मनि उग्र शासनतः भयं अभ्यधात्. ॥ ७ ॥

अर्थः-हे मित्र ! तुं केम गभरायेलो छे ? एम ते महात्माए पूछ्याथी ते शुद्धबुद्धिए पोताने ते उग्रशासन राजातरफथी भय थतो जाहेर कर्यो. ॥ ७ ॥

**अथामुं स महात्माह किं भयं ते श्रितस्य माम् । क उग्रशासनस्तस्य दुःखं मूर्ध्नि मुखे रजः ॥ ८ ॥**

अन्वयः-अथ सः महात्मा अमुं आह, मां श्रितस्य ते किं भयं ? कः उग्रशासनः? तस्य मूर्ध्नि दुःखं, मुखे रजः. ॥ ८ ॥

अर्थः-पछी ते महात्मा लोकनाथे तेने कह्युं के, मारे शरणे आवेला एवा तने ( हवे ) शुं भय छे ? ते उग्रशासन कोणमात्र छे ! तेने माथे दुःख पडशे, अने तेना मुखमां धूड पडशे. ॥ ८ ॥

**न सच्चक्रे मया किंचिदयमित्यपि मा शुचः । सत्कृतिभ्यः समस्ताभ्यो महती सत्कृतिर्नतिः ॥ ९ ॥**

अन्वयः-मया अयं किंचित् न सचक्रे, इति अपि मा शुचः ? समस्ताभ्यः सत्कृतिभ्यः नतिः सत्कृतिः महती. ॥ ९ ॥

अर्थः-में आनो कंइ सत्कार कर्यो नथी, एवा विचारथी पण तारे दिलगिर थवुं नही, केमके सघळा सत्कारोथी नमस्काररूपी सत्कार महोटो छे. ॥ ९ ॥

**सेवकानां दद्ल्लक्ष्मीं शौर्यादेः स्यान्नृपोऽनृणः । न तु तेषां प्रणामस्य कथमप्यनृणो भवेत् ॥ १० ॥**

अन्वयः-सेवकानां शौर्य आदेः लक्ष्मीं ददत् नृपः अनृणः स्यात्, तु तेषां प्रणामस्य कथं अपि अनृणः न भवेत्. ॥ १० ॥

अर्थः-सेवकोनी शूरवीरता आदिकना बदलामां धन आपवाथी राजा ( तेना ) करजथी मुक्त थाय छे, परंतु तेओना प्रणामना बदलामां ( ते ) कोइ पण रीते करजमुक्त थतो नथी. ॥ १० ॥

**ततः कृतप्रणामस्य न भवामि तवानृणः । पदं त्रैलोक्यसाम्राज्याद्प्युत्तरमनर्पयन् ॥ ११ ॥**

अन्वयः-ततः कृत प्रणामस्य तव त्रैलोक्य साम्राज्यात् अपि उत्तरं पदं अनर्पयन् अनृणः न भवामि. ॥ ११ ॥

अर्थः-माटे प्रणाम करनार एवा तने त्रणे लोकना साम्राज्यथी पण अधिक पदवी आप्याविना तारा करजथी (हुं) मुक्त थाउं नही.

**कृतिन्किंचिदृणस्यास्य ददे यावत्कलान्तरम् । तावत्तिष्ठैव मत्पार्श्वे मा कुतोऽपि भयं कृथाः ॥ १२ ॥**

अन्वयः-(हे) कृतिन्! यावत् अस्य ऋणस्य किंचित् कलांतरं ददे, तावत् मत्पार्श्वे तिष्ठ एव, कुतः अपि भयं मा कृथाः?

अर्थः—(माटे) हे सज्जन! ज्यांसुधी आ करजनुं (तने) कंइक व्याज आपुं, त्यांसुधी तुं मारीपासेज रहे, अने हवे तुं कोइनो पण भय न राख? ॥ १२ ॥

**इत्युक्त्वा स गृहस्याग्रभूमौ तेनाधिरोपितः । तस्थौ सुखस्पृहातुल्यकालपूर्णमनोरथः ॥ १३ ॥**

अन्वयः-इति उक्त्वा तेन गृहस्य अग्र भूमौ अधिरोपितः सः सुख स्पृहा तुल्य काल पूर्ण मनोरथः तस्थौ. ॥ १३ ॥

अर्थः-एम कहीने ते लोकबांधवे ते घरनी अग्रभूमिपर राखेलो ते शुद्धबुद्धि सुख मेळववानी इच्छाजेटला समयसुधी पोताना मनोरथ संपूर्ण करतोथको रह्यो. ॥ १३ ॥

**कैरप्यथ दिनैरेनं लोकनाथोऽभ्यधादिति । ज्ञातोऽसीह चिरात्तिष्ठन्नुग्रशासनकिंकरैः ॥ १४ ॥**

अन्वयः-अथ कैः अपि दिनैः लोकनाथः एनं इति अभ्यधात्, चिरात् इह तिष्ठन् उग्रशासन किंकरैः ज्ञातः असि. ॥ १४ ॥

अर्थः—पछी केटलाक दिवसो गयाबाद लोकनाथे तेने एम कह्युं के घणा काळथी तुं अहीं रहेलो छे, ए हकीकत उग्रशासनना

नोकरोना जाणवामां आवी छे. ॥ १४ ॥

**वञ्चयित्वैव मे सम्यग्दृष्टिं दुष्टैकचेष्टिताः । कदाचिच्छलयित्वामी त्वां ग्रहीष्यन्ति शत्रवः ॥ १५ ॥**

अन्वयः—दुष्ट एक चेष्टिताः अमी शत्रवः कदाचित् मे सम्यग्दृष्टिं वंचयित्वा त्वां ग्रहीष्यंति एव. ॥ १५ ॥

अर्थः—फक्त दुष्ट आचरणोवाळाज ते शत्रुओ कदाच लाग जोइ मारी नजर चूकावीने तने पकडी जशेज. ॥ १५ ॥

**तन्मुञ्चे मित्र कुत्रापि भवन्तं यत्र तत्र ते । संमुखालोकनेऽपि स्युर्न समर्थाः कथंचन ॥ १६ ॥**

अन्वयः—तत् (हे) मित्र ! भवंतं तत्र कुत्र अपि मुंचे, यत्र ते संमुख आलोकने अपि कथंचन समर्थाः न स्युः. ॥ १६ ॥

अर्थः-माटे हे मित्र ! तने त्यां क्यांक मूकुं, के ज्यां तारी सामे जोवाने पण कोइरीते (तेओ) समर्थ थइ शके नही. ॥ १६ ॥

**किं तु कष्टतरः पन्थाः सुदूरं तत्र गच्छताम् । क्षुत्तृष्णादिमहादुःखं सहमानैर्विलङ्घ्यते ॥ १७ ॥**

अन्वयः-किंतु तत्र सुदूरं गच्छतां पंथाः कष्टतरः, क्षुत् तृष्णा आदि महादुःखं सहमानैः विलंघ्यते. ॥ १७ ॥

अर्थः-परंतु त्यां घणे दूर जनाराओमाटेनो मार्ग वधारे कष्टवाळो छे, अने क्षुधा तथा तृषा आदिक अतिकष्ट सहन करनाराओ (ते मार्ग) ओळंगी शके छे, ॥ १७ ॥

**तद्विधेहि दृढं क्लेशसहने गहने मनः । मामन्वेहि कृतिन्देहि कण्ठपीठे पदं द्विषाम् ॥ १८ ॥**

अन्वयः—तत् (हे) कृतिन् ! गहने क्लेश सहने मनः दृढं विधेहि ? मां अन्वेहि ? द्विषां कंठपीठे पदं देहि ? ॥ १८ ॥

अर्थः—माटे हे चतुर ! आकरा क्लेशो सहन करवामां मनने मजबूत कर ? अने मारीपाछळ चाल्यो आव ? तथा शत्रुओनी गरदनपर पग मूक ? ॥ १८ ॥

**मनोहारिभिराहार्यैर्लोभयित्वा पदे पदे । पथि त्वामाह्वयिष्यन्ति स्नेहमारभ्य वैरिणः ॥ १९ ॥**

अन्वयः—पथि पदेपदे त्वां मनोहारिभिः आहार्यैः लोभयित्वा वैरिणः स्नेहं आरभ्य आह्वयिष्यंति. ॥ १९ ॥

अर्थः—(वळी) मार्गमां पगले पगले तने मनोहर भोजनोवडे ललचावीने ते शत्रुओ स्नेह देखाडीने बोलावशे, ॥ १९ ॥

**अङ्गेन वाचा चित्तेन संभावयसि तान्यदि । तच्छलाद् गृह्यमाणं तैस्त्वां रक्षिष्याम्यहं न हि ॥ २० ॥**

अन्वयः—अंगेन वाचा चित्तेन तान् यदि संभावयसि, तत् छलात् तैः गृह्यमाणं त्वां हि अहं न रक्षिष्यामि. ॥ २० ॥

अर्थः—शरीरथी, वचनथी के मनथी तेओनुं जो तुं आदरमान करीश, तो कपटथी तेओवडे पकडी जवाता एवा तने खरेखर हुं बचावीश नही. ॥ २० ॥

**इत्यमुं शिक्षयित्वैष लोकेशः प्रस्थितः पथि । तद्बद्धनिश्चयः शुद्धबुद्धिरन्वचलन्मुदा ॥ २१ ॥**

अन्वयः—इति अमुं शिक्षयित्वा एषः लोकेशः पथि प्रस्थितः, शुद्धबुद्धिः तद्बद्ध निश्चयः मुदा अन्वचलत्. ॥ २१ ॥

अर्थः—एरीते तेने शिखामण आपीने ते लोकनाथ मार्गे चालवा लाग्या, अने शुद्धबुद्धि ( पण ) तेमनापर विश्वास राखीने

हर्षथी तेनी पाछळपाछळ चालवा लाग्यो. ॥ २१ ॥

**तृषितो यत्र यत्रैष विषमेऽजनि वर्त्मनि । तत्र तत्र पयः शीतं पिबागच्छेति भाषिणीः ॥ २२ ॥**

**स्फारहाराद्यलंकाराः शृङ्गारस्येव देवताः । आलोकत पयःशालापालिका वरबालिकाः ॥ २३ ॥युग्मम् ॥**

अन्वयः—विषमे वर्त्मनि यत्र यत्र एषः तृषितः अजनि, तत्र तत्र आगच्छ? शीतं पयः पिब? इति भाषिणीः, ॥ २२ ॥ स्फार हार आदि अलंकाराः, शृंगाररस्य देवताः इव, पयःशाला पालिकाः वर बालिकाः आलोकत. ॥ २३ ॥ युग्मं ॥

अर्थः—ते विषम मार्गमां ज्यां ज्यां ते शुद्धबुद्धि तरस्यो थयो, त्यां त्यां, तुं आव? आ शीतल जल पी? एम बोलती, ॥ २२ ॥ तथा मनोहर हार आदिक आभूषणोवाळी, शृंगाररसनी देवीसरखी, जलशालानुं रक्षण करनारी मनोहर बालिकाओने ते जोवा लाग्यो. ॥ २३ ॥ युग्मं ॥

**पान्थसंघातपादाग्रपातरुग्णे रजोजुषि । तृणे च तत्र स्त्रैणे च सदृशस्तदृदृशोऽपतन् ॥ २४ ॥**

अन्वयः—पांथ संघात पाद अग्र पात रुग्णे तृणे च तत्र स्त्रैणे च तद् दृशः सदृशः अपतन्. ॥ २४ ॥

अर्थः—मुसाफरोना समूहना पगलांओ पडवाथी करमाइ गयेलां अने रजोटायेलां घासपर तथा ते स्त्रीपर ते शुद्धबुद्धिनी दृष्टि तुल्यपणे पडती हती. (अर्थात् घास अने स्त्रीने सरखी दृष्टिथी ते जोतो हतो.) ॥ २४ ॥

**क्षुत्क्षामकुक्षिर्यत्राभूत्तत्रालोकत सोऽग्रतः । सज्जाः षड्रसनिर्मज्जद्भोजना भाजनावलीः ॥ २५ ॥**

अन्वयः–यत्र सः क्षुत्क्षाम कुक्षिः अभूत्, तत्र अग्रतः षड् रस निर्मज्जत् भोजनाः सज्जाः भाजन आवलीः अलोकत. ॥ २५ ॥

अर्थः–(वळी) ज्यां ते क्षुधातुर थतो, त्यां आगळ षट् रसथी भरेलां भोजनोवाळी तैयार राखेली थाळोनी श्रेणिने ते जोतो हतो.

**अध्वन्यमण्डलीखेदप्रस्वेदजलपिच्छले । रजोभारेऽप्यसौ तत्राहारेऽपि समदर्श्यभूत् ॥ २६ ॥**

अन्वयः—अध्वन्य मंडली खेद प्रस्वेद जल पिच्छले रजः भारे अपि, तत्र आहारे अपि असौ समदर्शी अभूत्. ॥ २६ ॥

अर्थः—मुसाफरोनी श्रेणिओना थाकथी झरता पसीनाना जलथी कादवरूप थयेला धूडना समूहपर तथा ते भोजनप्रते पण ते तुल्य दृष्टिवाळो थयो. ॥ २६ ॥

**रविच्छविप्रतापेन जातो यत्रायमाकुलः । तत्र च्छायातरूनपुष्पगायद्भृङ्गानवैक्षत ॥ २७ ॥**

अन्वयः–रवि च्छवि प्रतापेन यत्र अयं आकुलः जातः, तत्र पुष्पगायत् भृंगान् छाया तरून् अवैक्षत. ॥ २७ ॥

अर्थः–सूर्यमंडलना तापथी ज्यां ते व्याकुल थतो, त्यां पुष्पोपर गुंजारव करता छे भमराओ ज्यां, एवां छायायुक्त वृक्षोने ते जोतो.

**दावाग्नौ च ज्वलज्ज्वाले विशाले च द्रुमोच्चये । तस्मिन्विस्मेरयामास दृशं समरसामसौ ॥ २८ ॥**

अन्वयः–च ज्वलत् ज्वाले दावाग्नौ, च तस्मिन् विशाले द्रुम उच्चये असौ सम रसां दृशं विस्मेरयामास. ॥ २८ ॥

अर्थः–परंतु बळती ज्वालावाळा दावानळमां, तथा ते विस्तीर्ण वृक्षोना समूहपर ते शुद्धबुद्धि तुल्य रसवाळी दृष्टि विस्तारवा लाग्यो, (अर्थात् ते बन्नेने ते तुल्य नजरथी जोतो हतो.) ॥ २८ ॥

आकारयत्सु तद्रक्षामनुष्येषु मृदूक्तिभिः । नासौ प्रपञ्चयामास हेलयापि विलोचनम् ॥ २९ ॥

अन्वयः—तद्रक्षा मनुष्येषु मृदु उक्तिभिः आकारयत्सु असौ हेलया अपि विलोचनं न प्रपंचयामास. ॥ २९ ॥

अर्थः—तेओनुं रक्षण करनारा मनुष्यो कोमल वचनोवडे (तेने) बोलावतां छतां पण तेणे क्रीडामात्रथी ते सामे नजर करी नही.

इति शुद्धमतिः सिद्धप्रतिज्ञः सत्वरं व्रजन् । अनन्यसदृशाकारं केवलैः स्फटिकैः कृतम् ॥ ३० ॥

अदृष्टपूर्वं निर्भाग्यैः सभाग्यैश्च महद्गृहम् । पुरो निरूपयामास लोकनाथेन दर्शितम् ॥ ३१ ॥ युग्मम् ॥

अन्वयः—इति सिद्ध प्रतिज्ञः शुद्धमतिः सत्वरं व्रजन् अनन्य सदृश आकारं केवलैः स्फटिकैः कृतं, ॥ ३० ॥ निर्भाग्यैः च सभाग्यैः अदृष्ट पूर्वं, लोकनाथेन दर्शितं महद्गृहं पुरः निरूपयामास. ॥ ३१ ॥ युग्मं ॥

अर्थः—एरीते संपूर्णप्रतिज्ञावाळो ते शुद्धबुद्धि तुरत चालतो थको अनुपम आकृतिवाळा, केवल स्फटिक रत्नोथी बनावेला, ॥३०॥ निर्भाग्योए तथा सभाग्योए पण पूर्वे नही जोयेला, अने लोकनाथे देखाडेला महान मेहेलने जोवा लाग्यो. ॥ ३१ ॥ युग्मं ॥

तदालोकनसंजातपरमानन्दमग्नहृत् । स तृणं गणयामास चक्रिशक्रादिसंपदः ॥ ३२ ॥

अन्वयः—तत् आलोकन संजात परम आनंद मग्न हृत् सः चक्रि शक्र आदि संपदः तृणं गणयामास. ॥ ३२ ॥

अर्थः—ते मेहेलने जोवाथी उत्पन्न थयेला परम आनंदमां मग्न थयेलुं छे हृदय जेनुं एवो ते शुद्धबुद्धि चक्री तथा इन्द्रनी समृ-

द्धिने (पण) तृणसमान गणवा लाग्यो. ॥ ३२ ॥

**प्रविशाशु महासौधं तदेतत्तेऽकुतोभयम् । तमित्युक्त्वाचलल्लोकनाथो लोकेष्टसिद्धये ॥ ३३ ॥**

अन्वयः-तत् एतत् महा सौधं आशु प्रविश ? ते अकुतः भयं, इति तं उक्त्वा लोकनाथः लोक इष्ट सिद्धये अचलत्. ॥ ३३ ॥

अर्थः—ते आ महान् मेहेलमां (तुं) तुरत दाखल था? (हवे) तने कोइ तरफथी पण भय नथी, एम तेने कहीने ते लोकनाथ लोकोनो उपकार करवामाटे (त्यांथी) चालता थया. ॥ ३३ ॥

**इति सर्वेष्टदं सर्वकष्टपिष्टकरं प्रभुम् । त्वमप्येनं महीनाथ लोकनाथं सुहृत्कुरु ॥ ३४ ॥**

अन्वयः-(हे) महीनाथ! इति सर्व इष्ट दं, सर्व कष्ट पिष्ट करं एनं लोकनाथं प्रभुं त्वं अपि सुहृत् कुरु? ३४ ॥

अर्थः—हे राजन्! ए रीते सर्व वांछित पदार्थो आपनारा, तथा सर्व दुःखोनो नाश करनारा ते लोकनाथ नामना प्रभुने तुं पण मित्र कर? ॥ ३४ ॥

**मुञ्च दुःखं न दुःखेन भवन्तीष्टानि कुत्रचित् । आराध्नुहि रयाल्लोकनाथमिष्टार्थसिद्धये ॥ ३५ ॥**

अन्वयः-दुःखं मुंच? दुःखेन कुत्रचित् इष्टानि न भवंति, इष्ट अर्थ सिद्धये रयात् लोकनाथं आराध्नुहि? ॥ ३५ ॥

अर्थः—(तुं) संतापने छोडी दे? (केमके) संताप करवाथी क्यांयें वांछित कार्य सिद्ध थतुं नथी. वांछित पदार्थनी प्राप्तिमाटे (तुं) तुरत ते लोकनाथने आराध? ॥ ३५ ॥

अथापृच्छत्प्रियः पृथ्व्या लोकनाथः स कः प्रभो । कथं चाराध्यतेऽसौ तमाराध्नोमि प्रियासखः ॥ ३६ ॥

अन्वयः-अथ पृथ्व्याः प्रियः अपृच्छत्, (हे) प्रभो! सः लोकनाथः कः? च असौ कथं आराध्यते? प्रियासखः तं आराध्नोमि.

अर्थः—पछी ते राजाए पूछयुं के, हे स्वामी! ते लोकनाथ कोण छे? अने तेने केम आराधी शकाय छे? (ते कहो? के जेथी) राणी सहित हुं तेने आराधुं. ॥ ३६ ॥

इत्थमुक्ते नृपेणायं मुनिराचष्ट खेचरः । अन्तरङ्गधिया राजन्विचारय कथामिमाम् ॥ ३७ ॥

अन्वयः-नृपेण इत्थं उक्ते अयं खेचरः मुनिः आचष्ट, (हे) राजन्! अंतरंग धिया इमां कथां विचारय? ॥ ३७ ॥

अर्थः-राजाए एम कहेवाथी ते विद्याधर मुनि बोल्या के, हे राजन्! अंतरंग बुद्धिथी तुं आ कथानो विचार कर? ॥ ३७ ॥

संसार एव दुःपारो दूरपाराभिधं पुरम् । उग्रः कर्मपरीणामो राजास्मिन्नुग्रशासनः ॥ ३८ ॥

अन्वयः—संसारः एव दुःपारः, दूरपार अभिधं पुरं, अस्मिन् कर्म परीणामः उग्रः, उग्रशासनः राजा. ॥ ३८ ॥

अर्थः-संसारज दुःपार होवाथी, ते दूरपारनामनुं नगर छे, अने तेमां कर्मोनो परिपाक भयंकर होवाथी, ते उग्रशासन नामे राजा छे.

शुद्धात्मा जीव एवैतन्मन्त्री शुद्धमतिर्मतः । नित्यमित्रं पुनस्तस्य यथोदितगुणं वपुः ॥ ३९ ॥

अन्वयः-शुद्ध आत्मा जीवः एव तत् मंत्री शुद्धमतिः मतः, पुनः यथोदित गुणं वपुः तस्य नित्यमित्रं. ॥ ३९ ॥

अर्थः-निर्मल आत्मस्वभाववाळो जीवज ते राजानो शुद्धमतिनामे मंत्री कहेलो छे, तथा पूर्वे कहेला गुणोवाळुं जे शरीर, ते तेनो

नित्यमित्र छे. ॥ ३९ ॥

**जनो जनितसौजन्यस्तस्य पर्वसुहृन्मतः । गुरूपदेश एवास्य पूज्यो विश्वहिताभिधः ॥ ४० ॥**

अन्वयः—जनित सौजन्यः जनः तस्य पर्व सुहृद् मतः, गुरु उपदेशः एव अस्य विश्व हित अभिधः पूज्यः. ॥ ४० ॥

अर्थः—करेल छे सज्जनता जेणे एवा माणसने तेनो पर्वमित्र कहेलो छे, तथा गुरुनो उपदेशज तेनो विश्वहितनामे पूज्य उपदेशक छे.

**तच्छिक्षयामुना राजन् यः प्रणामसुहृत्कृतः । तं विद्धि लोकनाथाख्यं धर्ममेवाद्भुतं प्रभुम् ॥ ४१ ॥**

अन्वयः—(हे) राजन्! तत् शिक्षया अमुना यः प्रणाम सुहृत् कृतः, तं धर्मं एव अद्भुतं लोकनाथ आख्यं प्रभुं विद्धि?

अर्थः—हे राजन्! ते विश्वहितना उपदेशथी तेणे जे प्रणाममित्र कर्यो, ते धर्मज छे, अने तेनेज अद्भुत एवा लोकनाथनामना प्रभु जाणवा. ॥ ४१ ॥

**दृष्टाः सुप्तोत्थितेनाग्रे तेन ये निष्ठुरा नराः । ते दुःकर्मगणा व्याधिमृत्युदुर्गतिहेतवः ॥ ४२ ॥**

अन्वयः—सुप्त उत्थितेन तेन अग्रे ये निष्ठुराः नराः दृष्टाः, ते व्याधि मृत्यु दुर्गति हेतवः दुःकर्म गणाः. ॥ ४२ ॥

अर्थः—(वळी) सूइ उठ्याबाद तेणे (पोतानी) पासे जे निर्दय पुरुषोने जोया, ते रोग, मृत्यु तथा दुर्गतिना कारणरूप दुष्कर्मोना समूहो जाणवा. ॥ ४२ ॥

**तै रुद्धो निःक्रियं वीक्ष्य जीवः शुद्धमतिर्वपुः । तस्मिन्नुपकृतं मेने भस्मनि क्षिप्तवत्तदा ॥ ४३ ॥**

अन्वयः—तैः रुद्धः शुद्धमतिः जीवः वपुः निःक्रियं वीक्ष्य, तदा तस्मिन् उपकृतं भस्मनि क्षिप्तवत् मेने. ॥ ४३ ॥

अर्थः—ते दुष्कर्मोथी रुंधायेलो ते शुद्धमति जीव (पोतानां) शरीरने क्रियारहित थयेलुं जोइने, ते वखते तेनापर करेला उपकारने राखमां फेंक्या समान मानवा लाग्यो. ॥ ४३ ॥

**कदाचित्किंचिदप्येष यद्ददौ स्वजने जने । तदा धावति दुःखार्तें तदमन्यत साध्विव ॥ ४४ ॥**

अन्वयः—कदाचित् किंचित् अपि एषः यत् स्वजने जने ददौ, तदा दुःखार्तें धावति, तत् साधु इव अमन्यत. ॥ ४४ ॥

अर्थः—(वळी) कोइ कोइ वखते कंइक पण ते शुद्धबुद्धि जे (पर्वमित्ररूप) स्वजनने आपतो, ते स्वजन ते समये पीडित थइ तेनां (औषधआदिक माटे) दोडधाम करी मेलतो, तेथी तेने आपेलुं ते सफल मानतो हतो. ॥ ४४ ॥

**कृष्टोऽङ्गेन गले धृत्वा क्रन्दति स्वजने शुचा । नीतो यत्रैष कूपोऽसौ नरको दुःखसाग्निकः ॥ ४५ ॥**

अन्वयः—अंगेन गले धृत्वा कृष्टः, स्वजने शुचा क्रंदति एषः नीतः, यत्र दुःख साग्निकः असौ नरकः कूपः. ॥ ४५ ॥

अर्थः—(एवामां) शरीरे तो गळची पकडीने (तेने) खेंची कहाड्यो, अने स्वजन तो शोकथी (त्यांज) रडतो रह्यो, अने ते जीवने (त्यां) घसडी जवामां आव्यो, के ज्यां दुःखरूपी अग्निथी भरेलो नरकरूपी कूवो हतो. ॥ ४५ ॥

**शरणं लोकनाथोऽस्तु ममेति गदितेऽमुना । ईयुर्ये पुरुषाः कर्मगणास्ते धर्मसाक्षिकाः ॥ ४६ ॥**

अन्वयः—लोकनाथः मम शरणं अस्तु, इति अमुना गदिते, ये पुरुषाः ईयुः, ते धर्म साक्षिकाः कर्मगणाः. ॥ ४६ ॥

अर्थः—लोकनाथ मने शरणरूप थाओ, एम तेणे कहेवाथी जे पुरुषो त्यां आवी पहोंच्या, तेओने (तेना) धर्मकार्योना साक्षीरूप थयेला (शुभ) कर्मोना समूहो (जाणवा.) ॥ ४६ ॥

**जितदुःकर्मभिर्निन्ये यत्र सत्कर्मभिस्त्वसौ । लीलावासः स धर्मस्य विवेकाख्योऽतिनिर्मलः ॥ ४७ ॥**

अन्वयः—तु जित दुःकर्मभिः सत्कर्मभिः असौ यत्र निन्ये, सः धर्मस्य अति निर्मलः विवेक आख्यः लीला आवासः. ॥४७॥

अर्थः—पछी ते दुष्कर्मोने जीतीने ते सत्कर्मो तेने ज्यां लेइ गया, तेने धर्मनो अत्यंत निर्मल विवेकनामनो क्रीडामेहेल (जाणवो.)

**दानशीलतपोभावसत्पादोपशमासनम् । गुरूपदेशावष्टम्भं तत्रासौ धर्ममैक्षत ॥ ४८ ॥**

अन्वयः—तत्र असौ दान शील तपः भाव सत्पाद उपशम आसनं गुरु उपदेश अवष्टंभं धर्मं ऐक्षत. ॥ ४८ ॥

अर्थः—त्यां ते शुद्धबुद्धिए दान, शील, तप तथा भावरूपी उत्तम चार पायावाळा उपशमनामना आसनवाळा, तथा गुरुना उपदेशने अवलंबीने रहेला धर्मने जोयो. ॥ ४८ ॥

**श्रीधर्मेण स्वसौधाग्रभूमौ कालं कमप्ययम् । देवेषु सम्यग्दृष्टित्वपदे सौख्येन लालितः ॥ ४९ ॥**

अन्वयः—श्रीधर्मेण स्व सौध अग्र भूमौ देवेषु सम्यग् दृष्टित्व पदे अयं कं अपि कालं सौख्येन लालितः ॥ ४९ ॥

अर्थः—पछी ते श्रीमान धर्मे पोताना मेहेलनी अग्र भूमिपर देवपणामां सम्यग्दृष्टिपणानी पदवीपर ते शुद्धबुद्धिने केटलाक काळसुधी सुखेथी आनंद कराव्यो. ॥ ४९ ॥

ततः शिक्षास्थिरं मार्गे विषयैरप्रलोभितम् । धर्मस्तं मन्दिरे मुक्तौ मुक्तवानकुतोभये ॥ ५० ॥

अन्वयः–ततः शिक्षा स्थिरं, मार्गे विषयैः अप्रलोभितं तं धर्मः अकुतः भये मुक्तौ मंदिरे मुक्तवान्. ॥ ५० ॥

अर्थः—पछी शिखामणोथी स्थिर चित्तवाळा, तथा मार्गमां विषयोवडे लालचमां नही पडेला एवा ते शुद्धबुद्धिने ते धर्मे तद्दन निर्भय एवा मोक्षमंदिरमां मूक्यो. ॥ ५० ॥

येन प्रणाममात्रेण प्रसन्नेनेति निर्मितम् । स धर्मो विधिनाराद्धो राजन्किं किं न यच्छति ॥ ५१ ॥

अन्वयः–प्रणाम मात्रेण प्रसन्नेन येन इति निर्मितं, सः विधिना आराद्धः धर्मः (हे) राजन्! किं किं न यच्छति ? ॥ ५१ ॥

अर्थः–फक्त प्रणामथीज खुशी थयेला, एवा जे धर्मे आवुं कार्य कर्युं, ते विधिपूर्वक आराधेलो धर्म, हे राजन्! शुं शुं नथी आपतो ?

अथाभ्यधाद्धरित्रीन्द्रस्तत्क्रियोन्निद्रमानसः । धर्मस्याराधने देवीसखं शिक्षयताशु माम् ॥ ५२ ॥

अन्वयः–अथ तत्क्रिया उन्निद्र मानसः धरित्री इंद्रः अभ्यधात्, देवी सखं मां धर्मस्य आराधने आशु शिक्षयत ? ॥ ५२ ॥

अर्थः—पछी ते धर्मक्रियामाटे उत्सुक हृदयवाळा ते राजाए कह्युं के, (हे भगवन्!) आ राणीसहित मने धर्मना आराधनमाटे तुरत उपदेश आपो ? ॥ ५२ ॥

शमामृतसमुद्रोर्मिशीकरप्रकरैस्ततः । अक्षरैः शिक्षयामास साधुर्धर्मविधौ नृपम् ॥ ५३ ॥

अन्वयः—ततः साधुः शम अमृत समुद्र ऊर्मि शीकर प्रकरैः अक्षरैः नृपं धर्मविधौ शिक्षयामास. ॥ ५३ ॥
अर्थः—पछी ते मुनिराजे शांतिरूपी अमृतसागरना मोजांओना जलकणोना समूहसरखा अक्षरोवडे राजाने धर्मविधिमाटे शिखामण आपी. ॥ ५३ ॥

**धर्मस्य तस्यार्हत्सिद्धाचार्योपाध्यायसाधवः । यथा पञ्चेन्द्रियाणीव तुष्यन्ति नृप तत्कुरु ॥ ५४ ॥**

अन्वयः-(हे) नृप! तस्य धर्मस्य पंच इंद्रियाणि इव अर्हत् सिद्ध आचार्य उपाध्याय साधवः यथा तुष्यंति, तत् कुरु? ॥५४॥
अर्थः-हे राजन्! ते धर्मनी पांचे इंद्रियोसरखा अरिहंत, सिद्ध, आचार्य, उपाध्याय अने साधुओ जेम खुशी थाय, तेम तुं कर?

**सुखसाध्यमसंभाव्यप्रत्यूहकणमप्यहो । पृथिवीप्रिय तत्प्रीतेरुपायं विपुलं शृणु ॥ ५५ ॥**

अन्वयः—(हे) पृथिवी प्रिय! अहो! सुख साध्यं, असंभाव्य प्रत्यूहकणं अपि, तत् प्रीतेः विपुलं उपायं शृणु? ॥ ५५ ॥
अर्थः—(वळी) हे राजन्! अहो! सुखे साधी शकाय एवो, तथा जेमां विघ्नना लेशनो पण संभव नथी, एवो तेओने खुशी करवानो विस्तीर्ण उपाय (तुं) सांभळ? ॥ ५५ ॥

**जयत्यम्भःशिखिविषस्तम्भनः प्रियलम्भनः । महामन्त्रो नमस्कारः पञ्चानां परमेष्ठिनाम् ॥ ५६ ॥**

अन्वयः-अंभः शिखि विष स्तंभनः, प्रिय लंभनः, पंचानां परमेष्ठिनां नमस्कारः महामंत्रः जयति. ॥ ५६ ॥
अर्थः—जल, अग्नि, तथा विषने अटकावनारो, तथा वांछित पदार्थो प्राप्त करनारो, एवो ते पंचपरमेष्ठिना नमस्काररूप महान

मंत्र जयवंतो वर्ते छे. ॥ ५६ ॥

**मर्त्यामर्त्यासुरश्रेणीकर्षणेऽस्य किमद्भुतम् । यत्करोति नमस्कारः संमुखीं मुक्तिमप्यसौ ॥ ५७ ॥**

अन्वयः–अस्य मर्त्य अमर्त्य असुर श्रेणी कर्षणे अद्भुतं किं ? यत् असौ नमस्कारः मुक्तिं अपि संमुखीं करोति. ॥ ५७ ॥

अर्थः–ते मनुष्य, देव, तथा दानवोनी पंक्तिने आकर्षे एमां शुं आश्चर्य छे ? केमके ते नमस्कार तो मुक्तिने पण सन्मुख लावे छे.

**राजन्सैष शुचीभूय त्रिकालं जप्यते यदि । तदायं प्रीयते धर्मः प्रसन्नसकलेन्द्रियः ॥ ५८ ॥**

अन्वयः–(हे) राजन् ! शुचीभूय सः एषः यदि त्रिकालं जप्यते, तदा प्रसन्न सकल इंद्रियः अयं धर्मः प्रीयते. ॥ ५८ ॥

अर्थः—हे राजन् ! पवित्र थइने ते आ नमस्कारने जो त्रणे काल जपवामां आवे, तो प्रसन्न थयेल सर्व इंद्रियोवाळो आ धर्म संतुष्ट थाय छे. ॥ ५८ ॥

**इत्युदीर्य मुनीन्द्रोऽयं सरहस्यं रहस्यदात् । राज्ञे पञ्चनमस्कारमन्त्रं पावित्र्यशालिने ॥ ५९ ॥**

अन्वयः—इति उदीर्य अयं मुनींद्रः रहसि पावित्र्य शालिने राज्ञे स रहस्यं पंच नमस्कार मंत्रं अदात्. ॥ ५९ ॥

अर्थः–एम कहीने ते मुनिराजे गुप्तरीते पवित्रताथी शोभता एवा ते राजाने तत्त्वज्ञानसहित ते पंचनमस्काररूपी मंत्र आप्यो.

**मन्त्रमाप्य धरित्रीन्दुः प्रीतश्च प्रियया सह । गतश्च गगनं देहद्युतिद्योतितदिग्मुनिः ॥ ६० ॥**

अन्वयः—च मंत्रं आप्य धरित्री इंदुः प्रियया सह प्रीतः, च मुनिः देहद्युति द्योतित दिग् गगनं गतः. ॥ ६० ॥

अर्थः—पछी ते मंत्र मेळवीने राजा राणीसहित आनंद पाम्यो, तथा ते मुनि पण शरीरनी कांतिथी दिशाओने तेजस्वी करता-थका आकाशमां चाल्या गया. ॥ ६० ॥

**मुनीन्द्रदर्शनानन्दरसास्वादविचेतनः । चिरं स्थित्वैव तत्रैव भवनं भूविभुर्ययौ ॥ ६१ ॥**

अन्वयः–मुनींद्र दर्शन आनंद रस आस्वाद विचेतनः भूविभुः चिरं तत्र एव स्थित्वा एव भवनं ययौ. ॥ ६१ ॥

अर्थः–ते मुनिराजना दर्शनथी थयेला आनंदरसना स्वादमांज बेभान थयेलानीपेठे ते राजा घणासमयसुधी त्यांज स्थिर थइने घेर गयो. ॥ ६१ ॥

**अथो यथाविधि धराधिपतिः प्रतिवासरम् । चक्रे पञ्चनमस्कारमन्त्रध्यानं वधूसखः ॥ ६२ ॥**

अन्वयः–अथो धराधिपतिः वधूसखः प्रतिवासरं यथाविधि पंचनमस्कार मंत्र ध्यानं चक्रे. ॥ ६२ ॥

अर्थः—पछी ते राजा राणीसहित हमेशां विधिपूर्वक पंचपरमेष्ठिना नमस्काररूपी मंत्रनुं ध्यान करवा लाग्यो. ॥ ६२ ॥

**यथाकालपतन्नीरो नीरोगो निरुपद्रवः । सरसान्नसमुद्देशो देशोऽमुष्य तदाभवत् ॥ ६३ ॥**

अन्वयः–तदा अमुष्य देशः यथा काल पतत् नीरः, नीरोगः, निरुपद्रवः, सरस अन्न समुद्देशः अभवत्. ॥ ६३ ॥

अर्थः–ते वखते ते राजानो देश नियमसर पडता वरसादवाळो, रोगरहित, उपद्रवविनानो. तथा रसयुक्त अनाजनी उत्पत्तिवाळो थयो.

**दुग्धैः क्षरद्भिर्धेनूनां धारालैरूधसः पथि । यशोभिरिव भूपस्य तदा तस्य व्यभूषि भूः ॥ ६४ ॥**

अन्वयः—तदा यशोभिः इव धेनूनां ऊधसः पथि क्षरद्भिः धारालैः दुग्धैः तस्य भूपस्य भूः व्यभूषि. ॥ ६४ ॥

अर्थः—ते वखते जाणे यशवडे करीने होय नही ! तेम गायोनां स्तनोमांथी मार्गमां झरता धाराबंध दूधवडे ते राजानी भूमि शोभवा लागी. ॥ ६४ ॥

**आविर्बभूवुः सर्वेषु शैलेषु मणिखानयः । आसन्सर्वेष्वरण्येषु तदा तद्भुवि दन्तिनः ॥ ६५ ॥**

अन्वयः—तदा तद्भुवि सर्वेषु शैलेषु मणि खानयः आविर्बभूवुः, सर्वेषु अरण्येषु दंतिनः आसन्. ॥ ६५ ॥

अर्थः-(वळी) ते वखते ते राजानी भूमिमां सर्व पर्वतोमां रत्नोनी खाणो प्रगट थइ, तथा सघळां जंगलोमां हाथीओ उत्पन्न थया.

**इत्थं महर्द्धिवर्धिष्णुनिःशेषविषयव्रजः । कदाचिदपि निद्रान्ते निशान्तेऽचिन्तयन्नृपः ॥ ६६ ॥**

अन्वयः—इत्थं महर्धि वर्धिष्णु निःशेष विषय व्रजः नृपः कदाचित् अपि निशा अंते निद्रा अंते अचिंतयत्. ॥ ६६ ॥

अर्थः—एरीते महान् समृद्धिथी वृद्धि पामतो छे सर्व विषयोनो ( देशोनो ) समूह जेनो एवो ते राजा एक दिवसे रात्रिने अंते निद्रा उडी गयाबाद विचारवा लाग्यो के, ॥ ६६ ॥

**अहो महत्त्वं मन्त्रस्य यत्प्रसादवशादभूत् । राज्यं मम मनोहारि स्पृहणीयं हरेरपि ॥ ६७ ॥**

अन्वयः-अहो ! मंत्रस्य महत्त्वं ! यत्प्रसाद वशात् मम राज्यं मनोहारि हरेः अपि स्पृहणीयं अभूत्. ॥ ६७ ॥

अर्थः-अहो ! आ मंत्रनुं (केवुं) माहात्म्य छे ? के जेनी कृपाथी ( आ ) मारुं राज्य मनोहर तथा इंद्रने पण ललचावनारुं थयुं छे.

नयनानन्दसंदोहमन्दिरं नन्दनस्तु माम् । नाधुनापि धिनोतीन्दुरिव दुग्धपयोनिधिम् ॥ ६८ ॥

अन्वयः—तु अधुना अपि इंदुः दुग्ध पयोनिधिं इव, नयन आनंद संदोह मंदिरं नंदनः मां न धिनोति. ॥ ६८ ॥

अर्थः-परंतु हजु पण चंद्र जेम क्षीरसमुद्रने, तेम चक्षुने हर्षना समूहना स्थान सरखो पुत्र मने आनंद आपतो नथी. ॥ ६८ ॥

इति ध्यानभृतं धात्रीभृतं सद्यो विनिद्रदृक् । राज्ञी विज्ञपयामास संमदोल्लाससंपदा ॥ ६९ ॥

अन्वयः—इति ध्यान भृतं धात्री भृतं सद्यः विनिद्र दृक् राज्ञी संमद उल्लास संपदा विज्ञपयामास. ॥ ६९ ॥

अर्थः-एरीतना विचारमां पडेला ते राजाने तुरत निद्रारहित आंखोवाळी राणी हर्षना उभरानीसमृद्धिथी विनववा लागी के, ६९

पीयमानं सुधापूरं जनिताञ्जलिभिर्जनैः । वर्षन्कर्षन्करैर्बिम्बान्मलिनं लक्ष्म निर्मलैः ॥ ७० ॥

योगीन्द्रैरपि साक्षेपं लक्ष्यमाणोऽधुना मया । स्वप्नेऽदर्शि प्रविश्येन्दुर्वदनेनोदरं स्थितः ॥७१॥ युग्मम्॥

अन्वयः-जनित अंजलिभिः जनैः पीयमानं सुधा पूरं वर्षन्, निर्मलैः करैः बिंबात् मलिनं लक्ष्म कर्षन्, ॥ ७० ॥ योगींद्रैः अपि साक्षेपं लक्ष्यमाणः, वदनेन उदरं प्रविश्य स्थितः इन्दुः मया अधुना स्वप्ने अदर्शि. ॥ ७१ ॥ ॥ युग्मं ॥

अर्थः अंजलिओ भरीने लोकोवडे पीवाता अमृतना समूहने वर्षनारा, तथा निर्मल किरणोवडे बिंबमांथी मलिन लांछनने खेंची लेता, ॥ ७० ॥ अने योगींद्रोवडे पण आश्चर्यथी जोवाता, तथा मुखमार्गे ( मारा ) उदरमां प्रवेश करीने स्थिर रहेला, एवा चंद्रने में हमणांज स्वप्नमां जोयो. ॥ ७१ ॥ युग्मं ॥

**इत्याकर्ण्याद्भुतस्वप्नसोमां रोमाञ्चितः कथाम् । राजा वदनराजीवमरन्दमसृजद्गिरम् ॥ ७२ ॥**

अन्वयः—इति अद्भुत स्वप्न सोमां कथां आकर्ण्य रोमांचितः राजा वदन राजीव मरंदं गिरं असृजत्. ॥ ७२ ॥

अर्थः—एरीतनी आश्चर्यकारक चंद्रना स्वप्नवाळी कथा सांभळीने रोमांचित थयेलो राजा, मुखरूपी कमलना मकरंदसरखी वाणी बोल्यो के, ॥ ७२ ॥

**अकलङ्ककलाशाली धर्मात्मा मधुराकृतिः । जगतामुपजीव्यस्ते भविता देवि नन्दनः ॥ ७३॥**

अन्वयः—(हे) देवि! अकलंक कला शाली, धर्मात्मा, मधुर आकृतिः, जगतां उपजीव्यः ते नंदनः भविता. ॥ ७३ ॥

अर्थः—हे देवि! निष्कलंक कलाओथी शोभतो, धार्मिक हृदयवाळो, मनोहर शरीरवाळो, तथा जगतपर उपकार करनारो तने पुत्र थशे.

**एवमस्त्विति बध्नत्यामेतस्यां ग्रन्थिमंशुके । बहिर्बभूव कम्बूनां प्रातस्त्यो मङ्गलध्वनिः ॥ ७४ ॥**

अन्वयः—एवं अस्तु ? इति एतस्यां अंशुके ग्रंथिं बध्नत्यां बहिः कंबूनां प्रातस्त्यः मंगलध्वनिः बभूव. ॥ ७४ ॥

अर्थः—एमज थाओ ? एम (कहीने) ते राणी वस्त्रने छेडे (जेवामां) गांठ बांधती हती, तेवामां (मेहेलनी) बहार शंखोनो प्रभात काळनो मांगलीक ध्वनि थयो. ॥ ७४ ॥

**अथोद्यत्प्रमदामोदः सप्रियो मेदिनीपतिः । क्षणं स्थितो नमस्कारमन्त्रध्यानस्थमानसः ॥ ७५ ॥**

अन्वयः—अथ उद्यत् प्रमद आमोदः मेदिनी पतिः सप्रियः क्षणं नमस्कार मंत्र ध्यानस्थ मानसः स्थितः. ॥ ७५ ॥

अर्थः—पछी उत्पन्न थयेला आनंदना उल्लासवाळो ते राजा प्रियासहित क्षणवारसुधी नवकारमंत्रना ध्यानमां मन राखीने स्थिर रह्यो.

**एतौ विशेषतस्तत्र मन्त्रे प्रस्तृमरादरौ । शमयामासतुर्दुःखं गमयामासतुर्दिनान् ॥ ७६ ॥**

अन्वयः—एतौ तत्र मंत्रे विशेषतः प्रसृमर आदरौ दुःखं शमयामासतुः, दिनान् गमयामासतुः. ॥ ७६ ॥

अर्थः—(ए रीते) तेओ बन्ने ते नवकारमंत्रमां विशेष प्रकारे विस्तीर्ण आदरमानवाळा थयाथका दु खने उपशमावीने दिवसो वीताडवा लाग्या. ॥ ७६ ॥

**दिनेषु परिपूर्णेषु पूर्णेन्दुवदनस्ततः । सूनुर्जज्ञे जयावल्याः शुभेऽह्नि शुभलक्षणः ॥ ७७ ॥**

अन्वयः—ततः दिनेषु परिपूर्णेषु जयावल्याः शुभे अह्नि शुभ लक्षणः, पूर्ण इंदु वदनः सूनुः जज्ञे. ॥ ७७ ॥

अर्थः—पछी दिवसो संपूर्ण थयाबाद ते जयावली राणीने शुभ दिवसे उत्तम लक्षणोवाळो, तथा संपूर्ण चंद्रसरखा मुखवाळो पुत्र थयो.

**पुत्रजन्मोत्सवं यो यः कथयामास भूभुजे । स ददावुद्यदानन्दस्तस्य तस्याधिकाधिकम् ॥ ७८ ॥**

अन्वयः—यः यः भूभुजे पुत्र जन्म उत्सवं कथयामास, तस्य तस्य उद्यत् आनंदः सः अधिक अधिकं ददौ. ॥ ७८ ॥

अर्थः—जे जे माणसे राजाने पुत्रना जन्मनी वधामणी आपी, ते ते माणसने उल्लासित आनंदवाळो ते राजा अधिक अधिक दान आपतो हतो. ॥ ७८ ॥

**तत्कालं नृपतेर्मुक्तबन्धबन्धुरचेतसाम् । तत्र पुत्रे तदोत्पन्ने द्विषामप्युत्सवोऽभवत् ॥ ७९ ॥**

अन्वयः–तदा तत्र पुत्रे उत्पन्ने तत्कालं नृपतेः मुक्त बंध बंधुर चेतसां द्विषां अपि उत्सवः अभवत्. ॥ ७९ ॥

अर्थः– ते वखते ते पुत्रनो जन्म थवाथी तेज समये राजाए बंधनमुक्त करवाथीं हर्षित थयेला मनवाळा शत्रुओने पण महोत्सव थयो.

**अस्मिन्गर्भस्थिते चन्द्र उदरे ददृशेऽम्बया । इति स्वप्नाद्ददौ भूपस्तस्य चन्द्रोदराभिधाम् ॥ ८० ॥**

अन्वयः—अस्मिन् गर्भ स्थिते अंबया उदरे चंद्रः ददृशे, इति स्वप्नात् भूपः तस्य "चंद्रोदर" अभिधां ददौ. ॥ ८० ॥

अर्थः—आ पुत्र गर्भमां आव्येथी (तेनी) माताए उदरमां चंद्र जोयो हतो. एवा विचारथी स्वप्नने अनुसारे राजाए तेनुं "चंद्रोदर" नाम आप्युं. ॥ ८० ॥

**समं राज्यश्रिया बालः सोऽवर्धत दिने दिने । परा परिणतिः पञ्चपरमेष्ठिनमस्कृतेः ॥ ८१ ॥**

अन्वयः–राज्य श्रिया समं सः बालः दिने दिने अवर्धत, पंचपरमेष्ठि नमस्कृतेः परा परिणतिः. ॥ ८१ ॥

अर्थः—राज्यलक्ष्मीनी साथे ते बाळक दिवसे दिवसे वृद्धि पामवा लाग्यो, (ते साथे) तेओने पंचपरमेष्ठिना नमस्कारनी उत्कृष्टी श्रद्धा पण (वधवा लागी). ॥ ८१ ॥

**स पञ्चवर्षदेशीयः सहर्षमवनीभुजा । कलागुरुभ्यो निःशेषकलाशिक्षार्थमर्पितः ॥ ८२ ॥**

अन्वयः–पंच वर्ष देशीयः सः अवनीभुजा सहर्ष निःशेष कला शिक्षार्थं कला गुरुभ्यः अर्पितः. ॥ ८२ ॥

अर्थः–पांच वर्षोनी वयवाळा एवा ते चंद्रोदरने राजाए हर्षसहित समस्त कलाओ शिखवामाटे कलाचार्यने सोंप्यो. ॥ ८२ ॥

कामभभ्यस्यतस्तस्य प्रज्ञातिशयमीक्षितुम् । कलाः कौतूहलेनेव तदुपान्तमुपागताः ॥ ८३ ॥

अन्वयः–कामं अभ्यस्यतः तस्य प्रज्ञा अतिशयं ईक्षितुं इव कलाः कौतूहलेन तत् उपांतं उपागताः, ॥ ८३ ॥

अर्थः—सहेज अभ्यास करता एवा ते चंद्रोदर कुमारनी बुद्धिनी विशालताने जोवामाटे जाणे होय नही ! तेम कलाओ आश्चर्यथी तेनी नजीक आववा लागी. ॥ ८३ ॥

बालोऽयं लालयन्तीभिः प्रहृष्टाभिर्मुहुर्मुहुः । कलाभिः कुतुकात्काममङ्कादङ्कमनीयत ॥ ८४ ॥

अन्वयः–लालयंतीभिः, मुहुः मुहुः, प्रहृष्टाभिः कलाभिः कामं कुतुकात् अयं बालः अंकात् अंकं अनीयत. ॥ ८४ ॥

अर्थः—लाड लडावती, तथा वारंवार आनंद पामती कलाओ आनंद अने आश्चर्यपूर्वक ते बाळकने एकना खोळामांथी बीजाना खोळामां लेवा लागी. (अर्थात् सर्व कळाओमां ते पारंगामी थयो.) ॥ ८४ ॥

तथा कथंचिद्दक्षाभिः कलाभिर्लालितः शिशुः । यथा ताभिर्विना नायं क्वचित्क्षणमपि स्थितः ॥ ८५ ॥

अन्वयः–दक्षाभिः कलाभिः शिशुः कथंचित् तथा लालितः, यथा ताभिः विना अयं क्षणं अपि क्वचित् न स्थितः. ॥ ८५ ॥

अर्थः—ते चतुर कलाओए ते बाळकने कोइ एवी रीते तो लडाव्यो के, जेथी ते कलाओविना ते क्षणमात्र पण क्यांये थोभ्यो नही.

क्रमात्कलाकलापेषु निर्भराभ्यासभासुरः । जज्ञे बोधविशेषेण गुरूणामप्ययं गुरुः ॥ ८६ ॥

अन्वयः—क्रमात् कला कलापेषु निर्भर अभ्यास भासुरः अयं बोध विशेषेण गुरूणां अपि गुरुः जज्ञे. ॥ ८६ ॥

अर्थः—अनुक्रमे कलाओना समूहोमां अत्यंत अभ्यासथी तेजस्वी थयेलो ते चंद्रोदर कुमार आधिक ज्ञानथी गुरुओनो पण गुरु थइ गयो. ॥ ८६ ॥

**खिन्नं लक्षणमार्गेऽर्कतीव्रतर्कातुरं मुहुः । साहित्यामृतवापीषु पान्थवत्तन्मनोऽविशत् ॥ ८७ ॥**

अन्वयः—लक्षण मार्गे खिन्नं, अर्क तीव्र तर्क आतुरं, तत् मनः पांथवत् मुहुः साहित्य अमृत वापीषु अविशत्. ॥ ८७ ॥

अर्थः—व्याकरणना (मार्गमां) अभ्यासमां थाकी गयेलुं, तथा सूर्यसरखा आकारा न्यायशास्त्रोथी कंटाळेलुं ते चंद्रोदर कुमारनुं हृदय मुसाफरनीपेठे वारंवार साहित्यरूपी अमृतनी वावोमां प्रवेश करतुं हतुं. ॥ ८७ ॥

**दानहृद्यं सुविद्यं च तं देशान्तरकोविदाः । जङ्गमं श्रीसरस्वत्योः संगमं तीर्थमागमन् ॥ ८८ ॥**

अन्वयः—दान हृद्यं च सुविद्यं तं देशांतर कोविदाः श्री सरस्वत्योः संगमं जंगमं तीर्थं आगमन्. ॥ ८८ ॥

अर्थः—दान आपवामां मनोहर तथा उत्तम विद्यावाळा एवा ते चंद्रोदर कुमारने देशांतरना विद्वानो लक्ष्मी अने सरस्वतीना संगमरूप जंगम तीर्थ (जाणीने तेनी पासे) आववा लाग्या. ॥ ८८ ॥

**अभ्यासाद् भ्रमयन्नस्त्रीमङ्गस्य परितोऽपि सः । लोहपञ्जरमध्यस्थ इवालोकि विलोककैः ॥ ८९ ॥**

अन्वयः—अभ्यासात् अंगस्य परितः अपि अस्त्रीं भ्रमयन् सः विलोककैः लोह पंजर मध्यस्थः इव आलोकि. ॥ ८९ ॥

अर्थः-अभ्यासथी (पोताना) शरीरनी आसपास शस्त्रोनो समूह भमावता एवा ते कुमारने प्रेक्षको लोखंडना पांजरानी अंदर रहेलानीपेठे जोवा लाग्या. ॥ ८९ ॥

**अभ्यासकुतुकेनापि कोऽप्यस्य न पुरः स्थितः । स दक्षो लक्षमाधाय स्तम्भमेव व्यजृम्भत ॥ ९० ॥**

अन्वयः—अभ्यास कुतुकेन अपि अस्य पुरः कः अपि न स्थितः, स दक्षः स्तंभं एव लक्षं आधाय व्यजृंभत. ॥ ९० ॥

अर्थः—अभ्यासनी क्रीडाथी पण आ चंद्रोदर कुमारनी आगळ कोइ पण उभी शक्यो नही. (त्यारे) ते चतुर कुमार स्तंभनेज (पोताना) लक्षरूप करीने (धनुर्विद्या आदिक) साधवा लाग्यो. ॥ ९० ॥

**निर्विशेषपदन्यासः पुष्पाद्धम्मिल्लपातिनः । त्वरावेशादविज्ञातपूर्वपश्चात्पदक्रमः ॥ ९१ ॥**

**खेलन्खुरलिकाधाम्नि वामदक्षिणमण्डलैः । स नाङ्गसादं न स्वेदं न च श्वासमदर्शयत् ॥ ९२ ॥युग्मम्॥**

अन्वयः-धम्मिल पातिनः पुष्पात् निर्विशेष पदन्यासः, त्वरा आवेशात् अविज्ञात पूर्व पश्चात् पद क्रमः, ॥ ९१ ॥ वाम दक्षिण मंडलैः खुरलिका धाम्नि खेलन् सः, न अंग सादं, न स्वेदं, च न श्वासं अदर्शयत्. ॥ ९२ ॥ युग्मं ॥

अर्थः—चोटलामांथी पडता पुष्पथी अभिन्न (झडपी) चरणन्यासवाळो, उतावळना आवेशथी आगळ पाछळनी पगनी गतिने (पण) नही जणावनारो, ॥ ९१ ॥ (एरीते) डाबा जमणा मंडलोवडे कसरतशाळामां खेलतो ते चंद्रोदरकुमार न शरीरना थाकने, न पसीनाने, के नही श्वासने जणावतो हतो. ॥ ९२ ॥ युग्मं ॥

**नीरसं नखमश्वस्य शतं च महिषत्वचाम् । सगुडेभभिदाभ्यासे शरैर्योधो विवेध सः ॥ ९३ ॥**

अन्वयः—सः योधः शरैः सगुड इभ भिदा अभ्यासे अश्वस्य नीरसं नखं, च महिष त्वचां शतं विवेध. ॥ ९३ ॥

अर्थः—ते चंद्रोदर योद्धो बाणोवडे करीने बख्तरसहित हाथीने वींधवापूर्वक घोडानी नकर खरीने तथा महिषना ( उपराउपर गोठवेलां ) एकसो चांबडांने वींधी नाखवा लाग्यो. ॥ ९३ ॥

**शरैरलक्षितादानसंधानाकर्षमोक्षणैः । वेध्यानि विद्धवान्दूरचलसूक्ष्मदृढान्ययम् ॥ ९४ ॥**

अन्वयः—अयं अलक्षित आदान संधान आकर्षण मोक्षणैः शरैः दूर चल सूक्ष्म दृढानि वेध्यानि विद्धवान्. ॥ ९४ ॥

अर्थः—(वळी) ते चंद्रोदर कुमार, नथी जणायेल लेवुं, जोडवुं, खेंचवुं तथा मूकवुं जेओनुं, एवां बाणोवडे दूरनां, चपल, सूक्ष्म तथा मजबूत वेध्योने पण विंधवा लाग्यो. ॥ ९४ ॥

**सर्वेषु सैष चित्रेषु दुःकरेषु च दुर्धरः । अगीयत धराधीशैर्धनुर्धरधुरंधरः ॥ ९५ ॥**

अन्वयः—च सर्वेषु चित्रेषु दुःकरेषु दुर्धरः सः एषः धरा अधीशैः धनुर्धर धुरंधरः अगीयत. ॥ ९५ ॥

अर्थः—वळी सर्व विचित्र प्रकारनां दुष्कर कार्योमां ( पण ) महा बलिष्ठ एवा ते चंद्रोदर कुमारने राजाओ धुनर्धरोमां अग्रेसर कहेवा लाग्या. ॥ ९५ ॥

मेचके ज्याकिणश्रेणी भुजयोस्तस्य रेजतुः । हृद्बद्धशौर्यदन्तीन्द्रमदलेखाद्वयोपमे ॥ ९६ ॥

अन्वयः–हृद् बद्ध शौर्य दंतींद्र मद लेखा द्वय उपमे तस्य भुजयोः मेचके ज्या किण श्रेणी रेजतुः. ॥ ९६ ॥

अर्थः–हृदयमां बांधी राखेला शूरवीरपणारूपी हस्तींद्रनी बे मदरेखा सरखी, तेना बन्ने हाथमां श्याम रंगनी धनुषनी दोरीथी (पडेला) डणनी श्रेणिओ शोभती हती. ॥ ९६ ॥

बभौ स भूपतेः सूनुः प्रचलेषु परिस्फुरन् । तुरङ्गेषु तरङ्गेषु प्रतिबिम्बं रवेरिव ॥ ९७ ॥

अन्वयः–भूपतेः सः सूनुः, तरंगेषु रवेः प्रतिबिंबं इव प्रचलेषु तुरंगेषु परिस्फुरन् बभौ. ॥ ९७ ॥

अर्थः–ते चंद्रोदर राजकुमार, (जलना) मोजांओमां सूर्यना प्रतिबिंबनीपेठे, चपल घोडापर (बेसीने तेने दोडावतोथको) शोभतो हतो.

इतस्ततस्तरलितैर्वालितैर्मंक्षु चालितैः । द्विपैः सोऽरमत स्वैरं समीर इव नीरदैः ॥ ९८ ॥

अन्वयः–नीरदैः समीरः इव, इतः ततः तरलितैः, मंक्षु वालितैः चालितैः द्विपैः सः स्वैरं अरमत. ॥ ९८ ॥

अर्थः–वादळांओसाथे जेम पवन, तेम आमतेम दोडता, एकदम वाळेला तथा चलायमान करेला हाथीओसाथे ते मरजीमुजब खेलतो हतो. ॥ ९८ ॥

ऊरुसंदंशकापीड्यमानग्रीवो यदृच्छया । अचाल्यत प्रमत्तोऽपि नागो नाग इवामुना ॥ ९९ ॥

अन्वयः–ऊरु संदंशक आपीड्यमान ग्रीवः प्रमत्तः अपि नागः नागः इव अमुना यदृच्छया अचालयत. ॥ ९९ ॥

अर्थः—साथळोरूपी साणसामां दबावेली छे गरदन जेनी, एवा उन्मत्त हाथीने पण सर्पनी माफक ते कुमार पोतानी मरजीमुजब चलावतो हतो. ॥ ९९ ॥

**इत्यशेषकलाश्लेषविशेषसुभगाकृतिः । पूर्णचन्द्रोपमां चन्द्रोदरः स्म भजते युवा ॥ १८०० ॥**

अन्वयः–इति अशेष कला आश्लेष विशेष सुभग आकृतिः, युवा चंद्रोदरः पूर्ण चंद्र उपमां भजते स्म. ॥ १८०० ॥

अर्थः—एरीते समस्त कलाओनी प्राप्तिथी वधारे वधारे मनोहर आकृतिवाळो ते युवान चंद्रोदर कुमार पूर्णिमाना चंद्रनी उपमाने धारण करतो हतो. ॥ १८०० ॥

**सद्धर्मगतिसारस्य मतिसारस्य मन्त्रिणः । राज्ञा नीतिलयज्ञस्य शिक्षार्थमयमर्पितः ॥ १ ॥**

अन्वयः–राज्ञा अयं सद्धर्म गति सारस्य, नीति लयज्ञस्य मतिसारस्य मंत्रिणः शिक्षार्थं अर्पितः, ॥ १ ॥

अर्थः—( पछी ) राजाए ते कुमारने उत्तम धर्मविधिना सारवाळा, तथा नीतिशास्त्रनुं रहस्य जाणनारा, एवा मतिसार मंत्रिने ज्ञान प्राप्तिमाटे सोंप्यो. ॥ १ ॥

**अतीव सान्द्रयन्कूर्चकुन्तलान्दन्तकान्तिभिः । मन्त्री पुरः कुमारस्य नर्तयामास भारतीम् ॥ २ ॥**

अन्वयः–दंत कांतिभिः कूर्च कुंतलान् अतीव सांद्रयन् मंत्री कुमारस्य पुरः भारतीं नर्तयामास. ॥ २ ॥

अर्थः—दांतोनी कांतिवडे डाढीमूछना केशोने अत्यंत श्वेत करतो ते मंत्री ते राजकुमारनी पासे वाणीने नचाववा लाग्यो, (अर्थात् बोल्यो.) ॥ २ ॥

**वत्स यच्छिक्षयामि त्वामर्कमुज्ज्वालयामि तत् । आज्ञा राज्ञो न लङ्घ्येति किंचिद्वच्मि तथाप्यहम् ॥३॥**

अन्वयः-(हे) वत्स ! त्वां यत् शिक्षयामि, तत् अर्कं उज्ज्वालयामि, तथापि राज्ञः आज्ञा न लंघ्या, इति अहं किंचित् वच्मि.

अर्थः—हे वत्स ! तने जे शिखामण आपवी, ते सूर्यने तेजस्वी करवा जेवुं छे, तोपण राजानी आज्ञा उलंघवी नही, माटे हुं कंइक (तने) कहुं छुं. ॥ ३ ॥

**सुस्थूलंकरणः काममिहलोकश्रियां नयः । परलोकश्रियां धर्म इव तीर्थेशदेशितः ॥ ४ ॥**

अन्वयः-तीर्थेश देशितः धर्मः परलोक श्रियां इव, नयः इह लोकश्रियां कामं सुस्थूलंकरणः. ॥ ४ ॥

अर्थः—तीर्थंकरे उपदेशेलो धर्म जेम परलोकनी लक्ष्मीनी पुष्टि करनारो छे, तेम न्याय आ लोकनी लक्ष्मीने सेहेलाइथी पुष्ट करनारो छे. ॥ ४ ॥

**पूर्यः सेवाकृतां राज्ञा धर्मेणेव मनोरथः । न देयः पातकेनेव प्रत्युत व्यसनोदयः ॥ ५ ॥**

अन्वयः—धर्मेण इव राज्ञा सेवा कृतां मनोरथः पूर्यः, प्रत्युत पातकेन इव व्यसनोदयः न देयः. ॥ ५ ॥

अर्थः-धर्मनीपेठे राजाए (पोताना) सेवकोनो मनोरथ संपूर्ण करवो, परंतु पापनीपेठे (तेओने) पीडा उपजाववी नही. ॥५॥

कल्पद्रुः प्रार्थितं वेगाद्धर्मस्त्वप्रार्थितं चिरात् । द्रुतं चाप्रार्थितं चैको दत्ते सेवाभृतां नृपः ॥ ६ ॥

अन्वयः—कल्पद्रुः सेवाभृतां प्रार्थितं वेगात् दत्ते, धर्मः तु चिरात् अप्रार्थितं (दत्ते), च द्रुतं अप्रार्थितं एकः नृपः (दत्ते) ॥६॥

अर्थः—कल्पवृक्ष सेवकोने मागवाथी तुरत (वांछित) आपे छे, अने धर्म लांबे काळे नही मागवाथी पण आपे छे, परंतु मागणी कर्याविना तुरत तो एक राजाज आपी शके छे. ॥ ६ ॥

श्रीषु स्त्रीषु च नो रक्तिर्न विश्वासश्च रच्यते । जीवतां व्यसनायोच्चैर्मृतानां नरकाय याः ॥ ७ ॥

अन्वयः—याः जीवतां उच्चैः व्यसनाय, मृतानां नरकाय, श्रीषु च स्त्रीषु नो रक्तिः, च विश्वासः न रच्यते. ॥ ७ ॥

अर्थ—जेओ जीवतां अति कष्ट आपनारी छे, तथा मृत्युबाद नरकगति आपनारी छे, एवी लक्ष्मी तथा स्त्रीमां आसक्ति राखवी नही, तेम तेओनो विश्वास पण करवो नही. ॥ ७ ॥

कीर्तये धर्ममूलायै रक्षणीयः सदोद्यमः । स्थलमूर्ध्नि तृणालीव कीर्तिरन्याशु नश्यति ॥ ८ ॥

अन्वयः—धर्म मूलायै कीर्तये सदा उद्यमः रक्षणीयः, अन्या कीर्तिः स्थल मूर्ध्नि तृण आली इव आशु नश्यति. ॥ ८ ॥

अर्थः—धर्मरूपी मूलवाळी कीर्ति मेळववामाटे हमेशां उद्यम राखवो, (केमके ते शिवायनी) बीजी कीर्तितो (उंची) जमीनपर उगेला घासनीश्रेणिनीपेठे तुरत विनाश पामे छे. ॥ ८ ॥

**नृणां रूपं न रूपं स्याद्दानं रूपं जगन्मुदे । वर्षन्नब्दो वरं कृष्णोऽप्यवर्षन्विशदोऽपि न ॥ ९ ॥**

अन्वयः—नृणां रूपं रूपं न स्यात्, दानं रूपं जगत्मुदे, वर्षन् कृष्ण अपि अब्दः वरं, अवर्षन् विशदः अपि न. ॥ ९ ॥

अर्थः–पुरुषोनुं (जे सुंदर) रूप ते रूप न कहेवाय, परंतु (तेनुं) दानरूपी रूप जगतने हर्ष आपनारुं छे, (केमके) वरसतो एवो कालो मेघ पण प्रशंसनीय छे, परंतु नही वरसतो श्वेत मेघ पण प्रशंसाने पात्र नथी. ॥ ९ ॥

**रक्षणीयः सदा दक्षैः पुरेऽपि व्यसनो वसन् । पापानां व्यसनं मूलं पापं दुःखततेरिव ॥ १० ॥**

अन्वयः–पुरे अपि व्यसनी वसन् दक्षैः सदा रक्षणीयः, दुःख ततेः पापं इव पापानां मूलं व्यसनं. ॥ १० ॥

अर्थः—नगरमां पण जो (कोइ) व्यसनी वसतो होय, तो तेने चतुर माणसोए हमेशां सुधारवो, केमके दुःखोनी श्रेणिनुं मूळ जेम पाप छे, तेम पापोनुं मूळ व्यसन छे. ॥ १० ॥

**धर्मस्याव्यसनं मूलं धर्मः सर्वसुखश्रियाम् । व्यसने सुखमिच्छन्ति मूढाः शैत्यमिवानले ॥ ११ ॥**

अन्वयः—धर्मस्य मूलं अव्यसनं, सर्व सुख श्रियां (मूलं) धर्मः, अनले शैत्यं इव मूढाः व्यसने सुखं इच्छंति. ॥ ११ ॥

अर्थः–धर्मनुं मूल निर्व्यसनीपणुं छे, अने सर्व प्रकारनां सुखोनी लक्ष्मीनुं मूल धर्म छे, (परंतु) अग्निमां शीतलतानीपेठे मूढमाणसो व्यसन सेवीने सुखनी इच्छा करे छे. ॥ ११ ॥

सर्वव्यसनमुक्तेषु युक्तेषु सुकृतोत्सवैः । पुरुषेषु त्वया तात रचनीया रतिस्ततः ॥ १२ ॥

अन्वयः-( हे ) तात ! ततः सर्व व्यसन मुक्तेषु, सुकृत उत्सवैः युक्तेषु पुरुषेषु त्वया रतिः रचनीया. ॥ १२ ॥

अर्थः-माटे हे वत्स ! तेथी सर्व प्रकारनां व्यसनोथी रहित, तथा उत्तम कार्योना महोत्सववाळा पुरुषोमां तारे प्रेम राखवो.

इत्यसौ सचिवाचार्यवाचा प्रीतो नृपात्मजः । मेने मुधा सुमनसः सुधयाप्युन्मुदः सुरान् ॥ १३ ॥

अन्वयः-इति सचिव आचार्य वाचा प्रीतः असौ नृप आत्मजः सुमनसः सुधया उन्मुदः सुरान् अपि मुधा मेने. ॥ १३ ॥

अर्थः—एरीते ते मंत्रीरूपी आचार्यना वचनथी खुशी थयेलो ते राजकुमार उत्तम हृदयवाळा, तथा अमृतथी अति आनंद पामेला देवोने पण व्यर्थ मानवा लाग्यो. ॥ १३ ॥

कदाचन सभागर्भं भूपो भास्वरसेवकम् । अलंचकार सत्तारमिव ताराविभुर्नभः ॥ १४ ॥

अन्वयः—कदाचन सत्तारं नभः ताराविभुः इव भूपः भास्वर सेवकं सभागर्भं अलंचकार. ॥ १४ ॥

अर्थः—एक दिवसे उत्तम ताराओवाळा आकाशने जेम चंद्र, तेम राजा तेजस्वी सेवकोवाळा राजसभाना मध्य भागने शोभाववा लाग्यो. ॥ १४ ॥

नृपाननदिनाधीशस्मितस्य सचिवेशितुः । अङ्के पङ्केरुहस्येव हंसो भूपालभूरभूत् ॥ १५ ॥

अन्वयः-पंकेरुहस्य अंके हंसः इव, नृप आनन दिन अधीश स्मितस्य सचिव ईशितुः अंके भूपालभूः अभूत्. ॥ १५ ॥

अर्थः—कमलना मध्य भागमां हंसनीपेठे, राजाना मुखरूपी सूर्यथी विकस्वर थयेला ते मंत्रींद्रना खोळामां ते राजकुमार बेठो हतो.

**वितन्वानं कलावद्भिः कलालापमिलापतिः । सुतं पश्यन्व्रतं स्वस्मै तस्मै राज्यर्द्धिमैहत ॥ १६ ॥**

अन्वयः—कलावद्भिः कला आलापं वितन्वानं सुतं पश्यन् इलापतिः स्वस्मै व्रतं, तस्मै राज्य ऋद्धिं ऐहत. ॥ १६ ॥

अर्थः—कलावानोसाथे कलासंबंधि वातचित करता पुत्रने जोतो राजा पोतामाटे व्रत लेवानी, तथा तेने राज्यगादी सोंपवानी इच्छा करवा लाग्यो. ॥ १६ ॥

**तद्विवाहं स्वदीक्षायामन्तरायं धरापतिः । अमन्यतावनम्रेण विज्ञप्तश्चाशु वेत्रिणा ॥ १७ ॥**

अन्वयः—धरापतिः स्वदीक्षायां तद्विवाहं अंतरायं अमन्यत, च अवनम्रेण वेत्रिणा विज्ञप्तः. ॥ १७ ॥

अर्थः—(पछी) ते राजा पोतानी दीक्षामाटे ते पुत्रना ( नही थयेला ) विवाहने अंतरायरूप मानवा लाग्यो, एवमां नम्र थयेला छडीदारे (आवीने तेने) विनंति करी के, ॥ १७ ॥

**स्वामिन्नामितसर्वारेः काम्पील्यनगरेशितुः । राज्ञः श्रीरत्नसेनस्य दूतोऽस्ति द्वारि वारितः ॥ १८ ॥**

अन्वयः—(हे) स्वामिन् ! नामित सर्व अरेः, कांपील्य नगर ईशितुः श्रीरत्नसेनस्य दूतः द्वारि वारितः अस्ति. ॥ १८ ॥

अर्थः—हे स्वामी ! नमावेल छे सर्व शत्रुओने जेणे एवा कांपिल्य नगरना श्रीरत्नसेन नामना राजाना दूतने (में) दरवाजे अटकाव्योछे.

**चक्षुस्त्वन्मुखचन्द्रेऽस्य प्रमोदयितुमिच्छतः । प्रभो पूरय संकल्पमवनीकल्पपादप ॥ १९ ॥**

अन्वयः-(हे) प्रभो ! (हे) अवनी कल्प पादप ! त्वत् मुख चंद्रे चक्षुः प्रमोदयितुं इच्छतः अस्य संकल्पं पूरय ? ॥ १९ ॥

अर्थः—(माटे) हे स्वामी ! हे ! पृथ्वीपरना कल्पवृक्षसमान ! आपना मुखरूपी चंद्रथी नयनने आनंद पमाडवाने इच्छता एवा ते दूतनो मनोरथ संपूर्ण करो ? ॥ १९ ॥

**इत्याकर्ण्य नियुक्तोऽयं राज्ञा भ्रूवल्लिसंज्ञया । तं द्रुतं वेत्रभृद्दूतं सभादेशमवेशयत् ॥ २० ॥**

अन्वयः-इति आकर्ण्य भ्रू वल्लि संज्ञया राज्ञा नियुक्तः अयं वेत्रभृत् तं दूतं द्रुतं सभा देशं अवेशयत्. ॥ २० ॥

अर्थः-ते सांभळीने भ्रुकुटीनी संज्ञाथी राजाए आज्ञा आपवाथी ते छडीदारे ते दूतने तुरत ते राजसभानी अंदर दाखल कर्यो.

**आविर्भूतमदो दूतस्तदोत्तंसस्फुरत्करः । नत्वा नृपमथादिष्टे निविष्टो विष्टरे पुरः ॥ २१ ॥**

अन्वयः-अथ आविर्भूत मदः, उत्तंस स्फुरत्करः दूतः तदा नृपं नत्वा आदिष्टे विष्टरे पुरः निविष्टः. ॥ २१ ॥

अर्थः-पछी प्रगट थयेल छे हर्ष जेने, तथा मस्तकपर जोडेल छे हाथ जेणे एवो ते दूत ते समये राजाने नमीने देखाडेलां आसनपर आगळ बेठो. ॥ २१ ॥

**श्रीरत्नसेनः कुशली वयस्यः परमो मम । किमर्थं पार्थिवोत्तंसः स त्वां मयि नियुक्तवान् ॥ २२ ॥**

**इत्थं पृथ्वीभुजङ्गेन स पृष्टो हृष्टचेतसा । रवाभिभूतजीमूतो दूतो वचनमाददे ॥ २३ ॥ युग्मम् ॥**

अन्वयः–मम परमः वयस्यः श्रीरत्नसेनः कुशली? पार्थिव उत्तंसः स त्वां मयि किं अर्थं नियुक्तवान्? ॥ २२ ॥ इत्थं हृष्ट चेतसा पृथ्वी भुजंगेन पृष्टः सः दूतः रव अभिभूत जीमूतः वचनं आददे ॥ २३ ॥ युग्मं॥

अर्थः–मारा परम मित्र एवा ते श्रीरत्नसेन राजाने कुशल तो छे ने? वळी राजाओमां शिरोमणि समान एवा ते राजाए तने मारी पासे शा माटे मोकल्यो छे? ॥ २२ ॥ एरीते आनंदित हृदयवाळा ते राजाए पूछवाथी ते दूत (पोताना) ध्वनि वडे मेघगर्जनाने पराजित करतो थको बोलवा लाग्यो के, ॥ २३ ॥ युग्मं ॥

**कस्तस्य कुशलप्रश्नो यस्ते हस्तेऽर्पितोदयः । स्वामिन्संकुचति क्वापि किं रवेः केलिवारिजम् ॥ २४ ॥**

अन्वयः–(हे) स्वामिन्! यः ते हस्ते अर्पित उदयः, तस्य कुशल प्रश्नः कः? रवेः केलिवारिजं किं क्व अपि संकुचति? ॥२४॥

अर्थः–हे स्वामी! जेणे आपना हाथमांज पोतानो उदय सोंपी दीधो छे, तेना माटे कुशलनो प्रश्नज शुं छे? (केमके) सूर्यनी (हयातिमां) क्रीडा माटेनुं कमल शुं क्यांये पण संकोच पामे छे? ॥ २४ ॥

**न स्वस्य किंचिदप्यल्पं स भूधव भवद्वशः । विधोरन्तःपुरक्रीडाचकोर इव मन्यते ॥ २५ ॥**

अन्वयः–(हे) भूधव! विधोः अंत पुरे क्रीडा चकोरः इव भवद्वशः सः स्वस्य किंचित् अपि अल्पं न मन्यते. ॥ २५ ॥

अर्थः–हे राजन्! चंद्रना अंतःपुरमां रहेला क्रीडामाटेना चकोर पक्षीनीपेठे, आपने स्वाधीन रहेलो ते राजा पोताने कंइ पण न्यून गणतोज नथी. ॥ २५ ॥

मर्त्यलोकार्य यत्कार्यमस्ति तस्यास्मदीशितुः । तत्समाकर्णय क्षोणिवर्णिनीकर्णकुण्डल ॥ २६ ॥

अन्वयः-(हे) मर्त्य लोक आर्य! [हे] क्षोणि वर्णिनी कर्ण कुंडल! तस्य अस्मत् ईशितुः यत् कार्यं अस्ति, तत् समाकर्णय.? २६

अर्थः—(हे) मनुष्यलोकमां उत्तम! तथा पृथ्वीरूपी स्त्रीना कर्णना कुंडळसरखा एवा हे राजन्! ते अमारा स्वामिनुं जे कार्य छे ते सांभळो? ॥ २६ ॥

अस्ति श्रीरत्नसेनस्य कलत्रं रत्नमञ्जरी । या विराजति तत्पुण्यपादपस्येव मञ्जरी ॥ २७ ॥

अन्वयः-श्रीरत्नसेनस्य रत्नमंजरी कलत्रं अस्ति, या तत्पुण्य पादपस्य मंजरी इव विराजति. ॥ २७ ॥

अर्थः—ते श्रीरत्नसेन राजानी रत्नमंजरी नामे राणी छे, के जे तेना पुण्यरूपी वृक्षनी जाणे मांजर होय नही! तेम शोभे छे.

कलावती तु तत्कुक्षिकमलैकमरालिका । अस्ति तस्य महीनेतुस्तनया नयनोत्सवः ॥ २८ ॥

अन्वयः—तु तस्य महीनेतुः तत् कुक्षि कमल एक मरालिका, नयन उत्सवः कलावती तनया अस्ति. ॥ २८ ॥

अर्थः—(वळी) ते राजानी ते राणीनी कुक्षिरूपी कमलमां एक हंसी सरखी तथा चक्षुओने आनंद आपनारी कलावती नामनी पुत्री छे. ॥ २८ ॥

अदृष्टपूर्वं शीलं च रूपमासंस्तृतेरपि । तत्तदस्यां तदालोकधृतोत्कण्ठमिवागतम् ॥ २९ ॥

अन्वयः—तत् आलोक धृत उत्कंठं इव, आसंसृतेः अपि अदृष्ट पूर्वं तत् शीलं, च तत् रूपं अस्यां आगतं. ॥ २९ ॥

अर्थः—ते कलावतीने जोवाने जाणे उत्कंठित थयां होय नही ! तेम छेक संसारनी आदिथी पण (जगतमां) पूर्वे नही देखायेलां एवां ते (अनुपम) शील अने ते रूप तेणीमां प्राप्त थयेलां छे. ॥ २९ ॥

**तस्यां धियं समालोक्य स्वतोऽप्युपरिवर्तिनीम् । ह्रियेव हृदये लीना छन्नं तस्थौ कलावलिः ॥ ३० ॥**

अन्वयः—तस्यां स्वतः अपि उपरि वर्तिनीं धियं समालोक्य कला आवलिः ह्रिया इव हृदये छन्नं लीना तस्थौ. ॥ ३० ॥

अर्थः—ते कन्यामां पोताथी पण उपर रहेनारी (वधारे चडीयाती) बुद्धिने जोइने कलाओनी श्रेणि जाणे लज्जाथी होय नही ! तेम (तेणीना) हृदयमां गुप्तपणे संताइने रहेली छे. ॥ ३० ॥

**राजत्यसौ जिनग्रन्थजिनाज्ञाजिनभक्तिभिः । व्याप्तकर्णशिरोहृद्भिर्गौणाखिलविभूषणा ॥ ३१ ॥**

अन्वयः—जिन ग्रंथ जिन आज्ञा जिन भक्तिभिः व्याप्त कर्ण शिरः हृद्भिः गौण अखिल विभूषणा असौ राजति. ॥ ३१ ॥

अर्थः—जिनेश्वर प्रभुना आगमो, जिनेश्वर प्रभुनी आज्ञा, तथा जिनेश्वर प्रभुनी भक्ति, अनुक्रमे ( पोताना ) कर्ण, मस्तक तथा हृदयमां दाखल करीने, (स्वर्ण रत्नोनां) सर्व आभूषणोने गौणपणे राखनारी ते राजकन्या शोभे छे. ॥ ३१ ॥

**दिद्युते नन्दनैर्नायं तथा भूपो यथा तया । नावश्यायैस्तथा भाति गिरीन्द्रो गङ्गया यथा ॥ ३२ ॥**

अन्वयः—अयं भूपः यथा तया, तथा नंदनैः न दिद्युते, गिरींद्रः यथा गंगया तथा अवश्यायैः न भाति. ॥ ३२ ॥

अर्थः—ते राजा जेवो ते कन्यावडे शोभे छे, तेवो पुत्रोवडे नथी शोभतो, (केमके) हिमालय जेवो गंगानदीवडे शोभे छे, तेवो बरफथी शोभतो नथी. ॥ ३२ ॥

**नरेन्दुना सभादानदेवावसरभूमिषु । सहैव संचरत्येषा नित्यं कान्तिरिवात्मजा ॥ ३३ ॥**

अन्वयः—एषा नित्यं आत्मजा कांतिः इव सभा दान देव अवसर भूमिषु नर इन्दुना सह एव संचरति. ॥ ३३ ॥

अर्थः—ते कन्या हमेशां पोतानी कांतिनीपेठे सभा, दान, तथा देवपूजाना कार्योमां राजानी साथेने साथेज रह्या करे छे. ॥

**उत्सङ्गसङ्गिनीमेनां कदापि कलयन्नृपः । भूषितां भूरिभिर्भूपैः सभाभुवमभासयत् ॥ ३४ ॥**

अन्वयः—कदापि एनां उत्संग संगिनीं कलयन् नृप भूरिभिः भूपैः भूषितां सभा भुवं अभासयत्. ॥ ३४ ॥

अर्थः—एक दिवसे ते कन्याने (पोताना) खोळामां बेसाडीने राजा घणा राजाओवडे शोभिती थयेली राजसभाने शोभाववा लाग्यो. ॥ ३४ ॥

**अस्या रूपकलाशीलैः समः कोऽस्ति क्षितौ वरः । इत्यपृच्छन्नृपो दूतान्प्रभूतावनिचारिणः ॥ ३५ ॥**

अन्वयः—रूप कला शीलैः अस्याः समः कः वरः क्षितौ अस्ति? इति नृपः प्रभूत अवनि चारिणः दूतान् अपृच्छत्. ॥ ३५ ॥

अर्थः—रूप, कला अने शीलवडे करीने आ कन्या जेवो कयो वर पृथ्वीपर छे? एम राजाए पृथ्वीपर घणी जगोए फरनारा दूतोने पूछयुं. ॥ ३५ ॥

**यावद्वदन्त्यमी किंचित्तावन्नृपतिनन्दिनी । नाहं विवाहं वाञ्छामीत्याह सा हर्षशालिनी ॥ ३६ ॥**

अन्वयः–यावत् अमी किंचित् वदंति, तावत् सा हर्ष शालिनी नृपति नंदिनी इति आह, अहं विवाहं न वांछामि. ॥ ३६ ॥

**अर्थः**–जेवामां तेओ कंइंक बोले छे, तेवामां ते हर्षित थयेली राजकुमारी एम बोली के, हुं विवाहनी इच्छा करती नथी. ३६

**अथैनामभ्यधाद् भूमिविभुर्वैलक्ष्यलक्षणः । पाणिग्रहस्य विमुखी वत्से त्वच्छेमुषी कथम् ॥ ३७ ॥**

अन्वयः–अथ वैलक्ष्य लक्षणः भूमि विभुः एनां अभ्यधात्, (हे) वत्से ! त्वत् शेमुषी पाणि ग्रहस्य कथं विमुखी ? ॥ ३७ ॥

**अर्थः**—पछी विलखो पडेलो राजा तेणीने कहेवा लाग्यो के, हे वत्से ! तारी बुद्धि विवाहना संबंधमां केम विमुख थयेली छे? (अर्थात् तुं विवाहथी शामाटे कंटाळे छे ? ) ॥ ३७ ॥

**न रतिः स्फुरति स्वान्ते येन केन विना तव । स त्वया श्वशुरावासे कायच्छायवदेष्यति ॥ ३८ ॥**

अन्वयः–येन केन विना तव स्वांते रतिः न स्फुरति, सः काय च्छायवत् श्वशुर आवासे त्वया (सह) एष्यति. ॥ ३८ ॥

**अर्थः**–जे कोइना विना तारा हृदयमां आनंद न उपजतो होय, ते ( तारा ) शरीरनी छायानीपेठे ( तारा ) ससराने घेर तारी साथेज आवशे. ॥ ३८ ॥

**चेन्म्लायसि वियोगे मे तडागस्येव पद्मिनी । आनेष्यामि तदत्रैव मरालमिव ते वरम् ॥ ३९ ॥**

अन्वयः—तडागस्य पद्मिनी इव, चेत् मे वियोगे म्लायसि, तत् मरालं इव ते वरं अत्र एव आनेष्यामि. ॥ ३९ ॥

अर्थः—तळावना वियोगथी कमलिनीपेठे जो मारा वियोगथी तने दुःख थतुं होय, तो हंसनीपेठे तारा वरने हुं अहींज बोलावीने राखीश. ॥ ३० ॥

**काम्यं यत्किंचिदन्यद्वा दूरं तत्पूरयामि ते । वत्से विवाहमात्सर्यमुत्सारय मदिच्छया ॥ ४० ॥**

अन्वयः—वा अन्यत् किंचित् काम्यं, तत् दूरं ते पूरयामि, (हे) वत्से ! मत् इच्छया विवाह मात्सर्य उत्सारय ? ॥ ४० ॥

अर्थः—अथवा बीजी कंइं ( तारी ) इच्छा होय, तो ते मुश्केल छतां पण हुं पूर्ण करुं, माटे हे वत्से ! मारी इच्छाथी विवाहना अणगमाने तुं दूर कर ? ॥ ४० ॥

**इत्याग्रहमहीयस्या महीपस्यापि भाषया । सेयं विवाहवार्तामप्यमन्यत न कन्यका ॥ ४१ ॥**

अन्वयः—इति महीपस्य आग्रह महीयस्या भाषया अपि सा इयं कन्यका विवाह वार्ता अपि न अमन्यत. ॥ ४१ ॥

अर्थः—एवी रीते राजाना महान आग्रहवाळां वचनथी पण ते कन्याए विवाहनी वातने पण स्वीकारी नही. ॥ ४१ ॥

**ततः कन्येयमेकान्ते पृथिवीकान्तकान्तया । विवाहाय मुहुः प्रार्थ्यमानादत्त गिरं चिरात् ॥ ४२ ॥**

अन्वयः–ततः पृथिवी कांत कांतया एकांते इयं कन्या विवाहाय मुहुः प्रार्थ्यमाना चिरात् गिरं अदत्त. ॥ ४२ ॥

अर्थः—पछी ते राजानी राणीए एकांते ते कन्याने विवाहमाटे वारंवार आजीजी करतां केटलेक काळे ते बोली के, ॥ ४२ ॥

**राधावेधं विधाता यो याता नार्यन्तरं न यः । मातर्मां तेन केनापि कृतिना परिणायय ॥ ४३ ॥**

अन्वयः—(हे) मातः यः राधावेधं विधाता, यः नार्यतरं न याता, तेन केन अपि कृतिना मां परिणायय ? ॥ ४३ ॥

अर्थः–हे माताजी ! जे पुरुष राधावेध साधी शके, तथा जे बीजी स्त्री-ते गमन न करे, एवा कोइक विद्वाननी साथे मने परणाव?

**इति तद्वचनं देवीमुखादाकर्ण्य पार्थिवः । राधावेधकृते वीरानाह्वातुं प्रैषयच्चरान् ॥ ४४ ॥**

अन्वयः–इति तद् वचनं देवी मुखात् आकर्ण्य पार्थिवः राधावेधकृते वीरान् आह्वातुं चरान् प्रैषयत्. ॥ ४४ ॥

अर्थः—एवी रीतना तेणीना वचनने राणीना मुखथी सांभळीने राजाए राधावेध साधवामाटे शूरवीर राजकुमारोने बोलाववा-माटे दूतो मोकल्या छे. ॥ ४४ ॥

**अहं तु गन्तुमनसा सौहृदस्य परां धराम् । इहास्मि प्रहितो राज्ञा विज्ञापितमिदं वचः ॥ ४५ ॥**

अन्वयः–सौहृदस्य परां धरां गंतुमनसा राज्ञा अहं तु इह प्रहितः अस्मि, इदं वचः विज्ञापितं. ॥ ४५ ॥

अर्थः—मित्राइनी उत्कृष्टी कोटीए पहोंचवानी इच्छावाळा राजाए मने पण अहीं मोकल्यो छे, तथा ( आपने ) आवी रीतनो संदेशो कहेवराव्यो छे के, ॥ ४५ ॥

**यद्देव कन्यया राधावेधे वरपणीकृते । चन्द्रोदरस्य योधत्वसिद्ध्यास्मि स्मितमानसः ॥ ४६ ॥**

अन्वयः–(हे) देव! यत् कन्यया वर पणीकृते राधावेधे, चंद्रोदरस्य योधत्व सिध्ध्या स्मित मानसः अस्मि. ॥ ४६ ॥

अर्थः—हे स्वामी! कन्याये वर वरवामाटे राधावेधनी शरत करी छे. हवे चंद्रोदरना शूरवीरपणानी सिद्धिथी मारुं हृदय उल्लासित थयुं छे. ॥ ४६ ॥

**चन्द्रोदरं विना कोऽपि राधावेधाय न क्षमः। इत्यस्यैव यशो व्यङ्क्तुमाहूता दोर्भृतः परे ॥ ४७ ॥**

अन्वयः—चंद्रोदरं विना कः अपि राधावेधाय क्षमः न, इति अस्य एव यशः व्यंक्तुं परे दोर्भृतः आहूताः. ॥ ४७ ॥

अर्थः–( वळी ) चंद्रोदरविना कोइपण राधावेध साधवाने समर्थ नथी, एम विचारीने तेनोज यश जाहेर करवामाटे बीजा शूरवीरोने (पण) बोलाव्या छे. ॥ ४७ ॥

**तदादिश विशामिन्द्र चन्द्रोदरमिहोद्यमे। अधिकं दधतां स्नेहग्रन्थिर्दार्ढ्यमिहावयोः ॥ ४८ ॥**

अन्वयः—तत् (हे) विशां इंद्र! इह उद्यमे चंद्रोदरं आदिश? इह आवयोः स्नेह ग्रंथिः अधिकं दार्ढ्यं दधतां? ॥ ४८ ॥

अर्थः–माटे हे राजन्! आ राधावेधना उद्यममाटे आप चंद्रोदरने आज्ञा फरमावो? अने आ जगतमां आपण बन्ने वच्चेनी स्नेहगांठ वधारे मजबूत थाओ? ॥ ४८ ॥

**इति श्रीरत्नसेनस्य वाचिकेनाश्रितस्मयः। हर्षोपचितरोमाञ्चकञ्चुकः क्षितिकामुकः ॥ ४९ ॥**

**राधावेधोत्सुकं लज्जमानं पाणिग्रहोक्तिभिः। अस्मिन्महोत्सवे चन्द्रोदरं सादरमादिशत् ॥ ५० ॥**

अन्वयः–इति श्रीरत्नसेनस्य वाचिकेन अंचित स्मयः हर्ष उपचित रोमांच कंचुकः क्षिति कामुकः, ॥ ४९ ॥ राधावेध उत्सुकं, पाणि ग्रह उक्तिभिः लज्जमानं चंदोदरं अस्मिन् महोत्सवे सादरं आदिशत्. ॥ ५० ॥ युग्मं ॥

अर्थः–एरीतनां श्रीरत्नसेनना संदेशाथी सन्मान पामेला, तथा आनंदथी उछळेला रोमांचित शरीरवाळा ते राजाए ॥४९॥ राधावेध साधवामाटे उत्सुक थयेला, तथा लग्ननी वातथी शरमाता एवा ते चंद्रोदर कुमारने ते महोत्सवमां ( जवा माटे ) आदरथी आज्ञा आपी. ॥ ५० ॥ युग्मं ॥

प्रसाददानादानन्दस्यूते दूते गते च सः । चतुरङ्गचमूवारः कुमारः प्राचलन्मुदा ॥ ५१ ॥

अन्वयः—च प्रसाद दानात् आनंद स्यूते दूते गते चतुरंग चमू वारः कुमारः मुदा प्राचलत्. ॥ ५१ ॥

अर्थः–पछी शिरपाव आपवाथी आनंदथी एकगांठ थयेलो ते दूत गया बाद चतुरंगी सैन्यना समूह सहित ते चंद्रोदर कुमारे हर्ष पूर्वक (त्यांथी) प्रयाण कर्युं. ॥ ५१ ॥

महत्त्वनिर्जितेनोच्चैरब्धिनेव चरीकृतम् । व्यञ्जयन्त्या ध्वनिं विश्वे वृतः पृतनयाभितः ॥ ५२ ॥

पश्यन्नलंकृतान् रत्नैर्निर्गलन्मदनिर्झरान् । जयश्रीजङ्गमक्रीडाभूधरान्गन्धसिन्धुरान् ॥ ५३ ॥

त्वराभराभिरामाणि मुहुर्जनमनांस्यपि । आकर्षन्तीषु वेगेन दत्तदृग्वाजिराजिषु ॥ ५४ ॥

गङ्गालहरिभिर्धुर्यहरिभ्यः शिक्षितुं त्वराम् । ध्वजव्याजादुपेताभिः कान्तानालोकयन् रथान् ॥ ५५ ॥
गणयद्भिस्तृणं प्राणांस्त्रिलोकीं च स्वधैर्यतः । अभिन्नात्मपरैर्वीरैर्वृतो यतिवरैरिव ॥ ५६ ॥
द्रष्टुं श्वभ्रदिवोः कन्याः श्रुततादृक्पतिंवराः । खनन्हरिखुरैः क्षोणीं कुर्वन्पद्यां रजोभरैः ॥ ५७ ॥
ग्रामरामाभिराकृष्टहृद्दृष्टिभिः स्मितदृष्टिभिः । असंस्कृतमनोज्ञाभिरनाकूतं निरीक्षितः ॥ ५८ ॥
दधिसारदधिक्षीरैः स्वैर्मनोभिरिवोज्ज्वलैः । प्रथितोपायनान्ग्रामवृद्धान्संमानयन्पथि ॥ ५९ ॥
सिञ्चन्द्विरदवृन्दानां दानाम्भोभिर्वनद्रुमान् । दुस्तराः सुतराः कुर्वन्नुर्वीधूलीभरैर्धुनीः ॥ ६० ॥
गिरिमध्याध्ववैषम्यं भिन्दन्स्यन्दननेमिभिः । क्षोभयन्नटवीसिंहान्सिंहनादैर्भुजाभृताम् ॥ ६१ ॥
अज्ञातपथसंचारो विदग्धानां कथारसैः । क्रमात्कुमारः काम्पील्यपत्तनाभ्यासमासदत् ॥६२॥एकाद. कु.

अन्वयः—विश्वे महत्त्व निर्जितेन अब्धिना उच्चैः चरी कृतं इव, ध्वनिं व्यंजयंत्या पृतनया अभितः वृतः, ॥ ५२ ॥ रत्नैः अलं-अकृतान्, निर्गलत् मद निर्झरान्, जय श्री जंगम क्रीडा भूधरान्, गंध सिंधुरान् पश्यन् ॥ ५३ ॥ वेगेन त्वरा भर अभिरामाणि जन मनांसि अपि मुहुः आकर्षतीषु वाजि राजिषु दत्तदृग्, ॥ ५४ ॥ धुर्य हरिभ्यः कलां शिक्षितुं ध्वज व्याजात् उपेताभिः गंगाल-हरिभिः कांतान् रथान् आलोकयन्, ॥ ५५ ॥ स्व धैर्यतः प्राणान् च त्रिलोकीं तृणं गणयद्भिः, अभिन्न आत्म परैः, यति वरैः इव

वीरैः वृतः, ५६ श्रुत तादृक् पतिंवराः श्वभ्र दिवोः कन्याः द्रष्टुं हरिखुरैः क्षोणीं खनन्, रजो भरैः पद्मां कुर्वन्, ५७ आकृष्ट हृष्टिभिः, स्मित दृष्टिभिः, असंस्कृत मनोज्ञाभिः, ग्रामरामाभिः अनाकूतं निरीक्षितः, पथि स्वैः मनोभिः इव उज्ज्वलैः दधिसार दधि क्षीरैः प्रथित उपायनान् ग्राम वृद्धान् संमानयन्, ॥५९॥ द्विरद वृंदानां दान अंभोभिः वनद्रुमान् सिंचन्, उर्वी धूली भरैः दुस्तराः धुनीः सुतराः कुर्वन्, ॥६०॥ स्यंदन नेमिभिः गिरि मध्य अध्व वैषम्यं भिंदन्, भुजाभृतां सिंहनादैः अटवी सिंहान् क्षोभयन्, ॥६१॥ विदग्धानां कथारसैः अज्ञात पथ संचारः, कुमारः क्रमात् कांपील्य पत्तन अभ्यासं आसदत्. ॥ ६२ ॥ एकादशभिः कुलकं ॥

अर्थः—जगतमां महानपणाथी जीतेलो महासागर जाणे म्होटेथी पोकार करी रह्यो होय नही! एवा घोंघाटने प्रगट करती सेनावडे चोतरफथी घेरायेलो, ॥ ५२॥ रत्नोवडे शणगारेला, झरता मदना झरणावाळा, तथा जयलक्ष्मीना क्रीडा करवाना जंगम पर्वतसरखा, गंधहस्तीओने जोतो, ॥ ५३ ॥ वेगवडे करीने, उतावळना समूहथी शोभतां लोकोनां मनने पण खेंचती, एवी घोडाओनी श्रेणिओप्रते नजर करतो, ॥ ५४ ॥ जोडेला घोडाओपासेथी (दोडवानी) कला शिखवामाटे पताकाओना मिषथी आवेला गंगानदीना मोजांओवडे मनोहर लागता रथोने जोतो, ॥ ५५ ॥ पोतानी धीरजथी प्राणोने तथा त्रणे लोकने ( पण ) तृणसमान गणता, अने पोतानी तथा परनी वच्चे तफावत नही राखनारा ( परस्पर संपथी रहेनारा ) एवा उत्तम मुनिराजसरखा सुभटोवडे वींटायेलो, ॥ ५६ ॥ सांभळेलो छे तेवो स्वयंवर जेओनो, एवी पाताळ तथा देवलोकनी कन्याओने (जाणे) जोवाने, घोडाओनी खरीओवडे जमीनने खोदता, तथा ( उडती ) रजना समूहवडे ( आकाश तरफ ) निरसरणी करता, ॥ ५७ ॥ हर्ष पामेली, तथा

विकस्वर आंखोवाळी, संस्कार ( शरीरसंबंधि टापटीप ) विनापण मनोहर लागती, एवी गांबडीआणीओवडे अचानक जोवायेलो, ॥५८॥ मार्गमां पोतानां मनसरखां उज्ज्वल एवां मांखण, दहीं तथा दूधनां भेटणां धरी उभेला वृद्ध गांबडीयाओनुं सन्मान करतो, ॥ ५९ ॥ हाथीना समूहोना मदजलवडे वननां वृक्षोने सिंचतो, जमीनपरथी (उडती) धूडना समूहोथी उंडी नदीओने पणसुखे सुखे तराय एवी करतो, ॥ ६० ॥ रथोना चक्रोवडे पर्वतनी अंदरना मार्गनी विषमताने तोडतो, शूरवीरोना सिंहनादोवडे वनना सिंहोने ( पण ) क्षोभ पमाडतो, ॥ ६१ ॥ विद्वानोनी कथा ( सांभळवाना ) रसथी नथी जाणेल मार्गनी मुसाफरी (थाक) जेणे एवो ते चंद्रोदर कुमार अनुक्रमे ते कांपील्य नगरनी नजीक आवी पहोंच्यो. ॥ ६२ ॥ एकादशभिः कुलकं ॥

**सन्मान्य रत्नसेनेन कुमारः स्थापितस्ततः । सुधाकरकरध्वंसोद्दामधामनि धामनि ॥ ६३ ॥**

अन्वयः–ततः रत्नसेनेन सन्मान्य सुधाकर कर ध्वंस उद्दाम धामनि धामनि कुमारः स्थापितः. ॥ ६३ ॥

अर्थः—पछी ते रत्नसेन राजाए सन्मानपूर्वक, चंद्रना किरणोने पण झांखा करनारा विशाळ प्रकाशवाळा मेहेलमां ते चंद्रोदर कुमारने उतारो आप्यो. ॥ ६३॥

**धनुर्धरैकधौरेयमन्यैरन्यैरपि द्रुतम् । अपूरि पूरियं वीरै राधावेधाय धावितैः ॥ ६४ ॥**

अन्वयः—धनुर्धर एक धौरेयं मन्यैः, राधावेधाय धावितैः अन्यैः वीरैः अपि इयं पूः द्रुतं अपूरि. ॥ ६४ ॥

अर्थः—(पोताने) धनुर्धरोमां एक धुरंधर माननारा, तथा राधावेध साधवामाटे दोडता आवेला, एवा बीजा शूरवीर कुमारोवडे

पण ते नगर तुरत भराइ गयुं. ॥ ६४ ॥

**ततोऽलंकृतमालोलध्वजच्छायाहिरक्षितैः । कलशैर्मन्मथस्पष्टनिधानकलशैरिव ॥ ६५ ॥**

**विलासमण्डपं भूमिमण्डलाखण्डलस्ततः । अकारयन्मणिश्रेणिश्रीहसन्मञ्चसंचयम् ॥ ६६ ॥ युग्मम् ॥**

अन्वयः—ततः आलोल ध्वज च्छाया अहि रक्षितैः, मन्मथ स्पष्ट निधान कलशैः इव कलशैः अलंकृतं, ॥ ६५ ॥ मणि श्रेणि श्री हसत् मंच संचयं विलास मंडपं भूमि मंडल आखंडलः अकारयत्. ॥ ६६ ॥ युग्मं ॥

अर्थः—पछी उडती ध्वजाओनी छायारूपी सर्पोवडे रक्षण करायेला, कामदेवना जाहेर देखाता निधानोना कुंभोसरखा कलशोवडे शणगारेलो, ॥ ६५ ॥ तथा मणिओनी पंक्तिओनी शोभाथी (जाणे) हसती खुरशीओना समूहवाळो विलासमंडप पृथ्वीमंडलना इंद्रसरखा ते राजाए कराव्यो. ॥ ६६ ॥ युग्मं ॥

**तत्राहूय न्यवेश्यन्त भुजभाजो महीभुजा । बभौ तेषु त्विषा चन्द्रोदरश्चन्द्र इवोडुषु ॥ ६७ ॥**

अन्वयः—महीभुजा भुजभाजः आहूय तत्र न्यवेश्यंत, उडुषु चंद्रः इव तेषु त्विषा चंद्रोदरः बभौ. ॥ ६७ ॥

अर्थः—(पछी) राजाए (सर्वे) ते शूरवीरराजकुमारोने बोलावीने ते मंडपमां बेसाड्या, त्यारे ताराओनी अंदर चंद्रनीपेठे ते राजकुमारोमां कांतिथी चंद्रोदरकुमार शोभवा लाग्यो. ॥ ६७ ॥

क्लृप्तयोर्व्योम्नि यन्त्राग्रे षोडशद्वादशारयोः। सृष्टिसंहाररूपेण भ्राम्यतोरधऊर्ध्वयोः ॥ ६८ ॥
चक्रयोरुपरि न्यस्य भ्रमन्तीं काष्ठकच्छपीम्। अधत्त भूतले पात्रं हैममच्छैर्भृतं घृतैः ॥ ६९ ॥युग्मम् ॥

अन्वयः–यंत्र अग्रे व्योम्नि क्लृप्तयोः, सृष्टि संहार रूपेण अधः ऊर्ध्वयोः भ्राम्यतोः, षोडश द्वादश आरयोः, ॥ ६८ ॥ चक्रयोः उपरि भ्रमंतीं काष्ठ कच्छपीं न्यस्य, भूतले अच्छैः घृतैः भृतंहै मं पात्रं अधत्त. ॥ ६९ ॥ युग्मं ॥

अर्थः—यंत्रना अग्र भागपर आकाशमां गोठवेला, तथा ( जाणे ) सृष्टिना विनाशरूपे नीचे उपर भमता, तथा शोळ अने बार आराओवाळा, ॥ ६८ ॥ बे चक्रोपर भमती काष्टनी पुतळी राखीने, ( नीचे ) जमीनपर निर्मल घृतथी भरेलुं सुवर्णनुं पात्र राखवामां आव्युं. ॥ ६९ ॥ युग्मं ॥

ऊर्ध्वीकृत्य करं भूपः पश्यतां सर्वदोष्मताम्। सनीरनीरभृद्धीरगम्भीरध्वनिरभ्यधात् ॥ ७० ॥

अन्वयः—सर्व दोष्मतां पश्यतां भूपः करं ऊर्ध्वीकृत्य सनीर नीरभृत् धीर गंभीर ध्वनिः अभ्यधात्. ॥ ७० ॥

अर्थः–सर्व शूरवीर राजकुमारोना जोतां राजाए हाथ उंचो करीने, जलयुक्त मेघसरखा धैर्यवाळी तथा गंभीर वाणीथी कह्युं के,

वेगाभोगभ्रमच्चक्रद्वयारान्तः खवर्त्मना। क्षिप्त्वेषुं दत्तदृग्लक्ष्ये घृतान्तःप्रतिबिम्बिते ॥ ७१ ॥
प्रभ्रमत्कच्छपीवामविलोचनकनीनिकाम्। यो भेत्स्यति स एवास्मत्तनयां परिणेष्यति ॥ ७२ ॥ युग्मम्

अन्वयः–घृत अंतः प्रतिबिंबिते लक्ष्ये दत्तदृग्, वेग आभोग भ्रमत् चक्र द्वय आरा अंतः ख वर्त्मना इषुं क्षिप्त्वा, ॥ ७१ ॥
यः प्रभ्रमत् कच्छपी वाम विलोचन कनीनिकां भेत्स्यति, सः एव अस्मत् तनयां परिणेष्यति. ॥ ७२ ॥ युग्मं ॥
अर्थः–घृतनी अंदर प्रतिबिंबित थयेलां लक्ष्यपर दृष्टि राखीने, वेगना प्रभावथी फरतां बन्ने चक्रोना आराओमां रहेली पोलाणने मार्गे बाण फेंकीने, ॥ ७१ ॥ जे कोइ ( मथाळे ) फरती पुतळीनी डाबी आंखनी कीकीने भेदशे, तेज ( आ ) अमारी पुत्रीने परणी शकशे. ॥ ७२ ॥ युग्मं ॥

**इत्याकर्ण्य गिरं कोऽपि क्ष्मापश्चापमुदञ्चयन् । राधायन्त्रतलं प्राप योधविद्यैकदुर्मदः ॥ ७३ ॥**

अन्वयः—इति गिरं आकर्ण्य योध विद्या एक दुर्मदः कः अपि क्ष्मापः चापं उदंचयन् राधा यंत्र तलं प्राप. ॥ ७३ ॥
अर्थः–एरीतनी वाणी सांभळीने युद्धकळानाज एक अभिमानवाळो कोइक राजा धनुष उंचुं करतोथको राधावेधना यंत्रनीचे आव्यो.

**तन्मुक्तः खं ययौ बाणश्चक्रमुन्मुच्य वामतः । द्रुतभ्राम्यदरोद्घट्टादङ्गभङ्गभयादिव ॥ ७४ ॥**

अन्वयः—तन्मुक्तः बाणः, द्रुत भ्राम्यत् अर उद्घट्टात् अंग भंग भयात् इव, वामतः चक्रं उन्मुच्य खं ययौ. ॥ ७४ ॥
अर्थः–तेणे छोडेलुं बाण, वेगथी फरता ( चक्रना ) आरासाथे भटकाबाथी, ( पोतानुं ) शरीर भेदाइ जवाना भयथी जाणे होय नही! तेम डाबी बाजुए चक्रने छोडीने आकाशमां चाल्युं गयुं. ॥ ७४ ॥

**वेध्याध्वानं मुहुः सैष रुणद्धातीव कोपतः । बाणः कस्यापि भूभर्तुररं चक्रस्य विद्धवान् ॥ ७५ ॥**

अन्वयः-सः एषः वेध्य अध्वानं मुहुः रुणद्धि, इति कोपतः इव कस्य अपि भूभर्तुः बाणः चक्रस्य अरं विद्धवान्. ॥ ७५ ॥

अर्थः—ते आ ( चक्रनुं पांखीयुं ) वींधवानी पुतळीना मार्गने वारंवार रोके छे, एवा क्रोधथी जाणे होय नही! तेम कोइक राजाना बाणे चक्रना पांखीयांने ( आरानेज ) वींधी नाख्युं. ॥ ७५ ॥

**अस्माभिः सह वेगेन स्पर्धतेऽसाविति क्रुधा । अरैर्भ्रमद्भिश्चक्रस्य कस्यापीषुर्विखण्डितः ॥ ७६ ॥**

अन्वयः—असौ वेगेन अस्माभिः सह स्पर्धते, इति क्रुधा चक्रस्य भ्रमद्भिः अरैः कस्य अपि इषुः विखंडितः. ॥ ७६ ॥

अर्थः—आ बाण वेगवडे करीने अमारीसाथे स्पर्धा करे छे, (जाणे) एवा क्रोधथी चक्रना भमतां पांखीयांओएज कोइक राजाना बाणने भांगी नाख्युं. ॥ ७६ ॥

**कच्छपीदृग्भिदे मुक्तश्चक्रारैः स्खलितः पतन् । कस्याप्यूर्ध्वमुखस्येषुर्दृशं तस्यैव विद्धवान् ॥ ७७ ॥**

अन्वयः-ऊर्ध्व मुखस्य कस्य अपि कच्छपी दृग् भिदे मुक्तः, चक्र अरैः स्खलितः पतितः इषुः तस्य एव दृशं विद्धवान्.

अर्थः-उंचुं मुख करेला कोइक राजकुमारना (ते) पुतळीनी आंखने भेदवामाटे मूकेलां, तथा चक्रना आरामां भटकावाथी नीचे पडेलां बाणे ते राजकुमारनीज आंखने फोडी नाखी. ॥ ७७ ॥

**कश्चिद्विगुप्यतो वीक्ष्य हस्यमानाञ्जनैर्नृपान् । प्राप्तोऽहं द्रष्टुमेवेति मञ्चाग्रादपि नोत्थितः ॥ ७८ ॥**

अन्वयः—कश्चित् जनैः विगुप्यतः, हस्यमानान् नृपान् वीक्ष्य, अहं द्रष्टुं एव प्राप्तः, इति मंच अग्रात् उत्थितः अपि न. ॥७८॥

अर्थः—कोइक राजा तो, लोकोथी वगोवाता तथा हांसी कराता (ते) राजाओने जोइने "हुं तो फक्त आ तमासो जोवाज आव्यो छुं" एम (कहीने) खुरशीपरथी उठ्योज नही. ॥ ७८ ॥

**स्त्रीकृते किं न लज्जेऽहमभ्यस्तां दर्शयन्कलाम् । इत्युत्तरकरो राधां कोऽप्यवज्ञातवान्हसन् ॥ ७९ ॥**

अन्वयः—अभ्यस्तां कलां स्त्रीकृते दर्शयन् अहं किं न लज्जे ? इति हसन् उत्तरकरः कः अपि राधां अवज्ञातवान्. ॥ ७९ ॥

अर्थः—(मारी) शीखेली कलाने (फक्त) स्त्रीमाटे देखाडतां शुं मने शरम न आवे ? एम हास्यसहित उत्तर आपनारो कोइक राजा तो ते राधावेधनी अवगणनाज करवा लाग्यो. ॥ ७९ ॥

**उत्तरेष्वपि रुद्धेषु राधावेधनिषेधिनां । ययावकथयन्नेव कश्चिदुत्थाय मञ्चतः ॥ ८० ॥**

अन्वयः—राधा वेध निषेधिनां उत्तरेषु अपि रुद्धेषु, कश्चित् अकथयन् एव मंचतः उत्थाय ययौ. ॥ ८० ॥

अर्थः—राधावेधनो निषेध करनारा राजाओना उत्तरो पण खूटी जवाथी कोइक तो (कंई) बोल्या चाल्याविना (मौन धारण करीनेज) खुरशीपरथी उठीने चालतो थइ गयो. ॥ ८० ॥

**इत्थं विसंस्थुले राजकुले काम्पील्यपार्थिवः । एत्य चन्द्रोदरस्याग्रे जाग्रदुद्गर्जगीर्जगौ ॥ ८१ ॥**

अन्वयः—इत्थं राजकुले विसंस्थुले कांपील्य पार्थिवः चंद्रोदरस्य अग्रे एत्य जाग्रत् उद्गर्जगीः जगौ. ॥ ८१ ॥

अर्थः—एरीते (ते) राजाओनो समूह निराश थयाबाद (ते) कांपील्य नगरनो राजा चंद्रोदरकुमारनी पासे आवीने गर्जना-

सरखी वाणीथी कहेवा लाग्यो के, ॥ ८१ ॥

**उत्तिष्ठोत्तिष्ठ कोदण्डकलाधुर्य दधुर्यतः । वीरा मुखेष्वयोधत्वदुःकीर्तिमिव कालिकाम् ॥ ८२ ॥**

अन्वयः-(हे) कोदंड कलाधुर्य ! उत्तिष्ठ ? उत्तिष्ठ ? यतः वीराः अयोधत्व दुःकीर्तिं इव मुखेषु कालिकां दधुः. ॥ ८२ ॥

अर्थः—हे धनुर्वेदीओमां अग्रेसर ! तुं उठ ? उठ ? केमके आ शूरवीरोए तो युद्धकलानी अशक्तिथी (मळेली) अपकीर्ति सरखी (पोताना) मुखपर काळाशने धारण करी छे. ॥ ८२ ॥

**सन्ति वीरास्त्वमेवासि राधावेधविधौ बुधः । सन्ति तेजस्विनो भास्वानेव रात्रिक्षये क्षमः ॥ ८३ ॥**

अन्वयः-वीराः संति, राधावेध विधौ त्वं एव बुधः असि, तेजस्विनः संति, रात्रि क्षये भास्वान् एव क्षमः. ॥ ८३ ॥

अर्थः—शूरवीरो तो (घणा) छे, (परंतु) राधावेध साधवामां तो तुंज समर्थ छो, (केमके) तेजस्वी पदार्थो तो (घणा) छे, परंतु रात्रिनो नाश करवामां तो सूर्यज समर्थ छे. ॥ ८३ ॥

**मानवेन न केनापि वेध्या राधेति निश्चयम् । मिथो लज्जापहं राज्ञा हर साम्यश्रिया सह ॥ ८४ ॥**

अन्वयः-केन अपि मानवेन राधा न वेध्या, इति राज्ञां लज्जा अपहं मिथः निश्चयं साम्यश्रिया सह हर ? ॥ ८४ ॥

अर्थः—कोइ पण मनुष्य आ राधाने वींधी शके एम नथी, एवी रीतना आ राजाओना लज्जापर ढांकपीछोडो करनारा परस्परना निश्चयने तुल्यपणाना गर्व सहित (तुं) दूर कर ? ॥ ८४ ॥

इत्यस्य वाग्भिरुत्थाय वहँल्लीलायितं गतौ। जगाम रामसू राधां हसद्भिर्वीक्षितो नृपैः ॥ ८५ ॥

अन्वयः–इति अस्य वाग्भिः उत्थाय गतौ लीलायितं वहन्, हसद्भिः नृपैः वीक्षितः रामसूः राधां जगाम. ॥ ८५ ॥

अर्थः—एवी रीतनां ते राजाना वचनथी उठीने, आनंदपूर्वक गमन करतो, तथा हांसी करता ते राजाओवडे जोवायेलो रामराजानो पुत्र ते चंद्रोदरकुमार राधावेधना यंत्रपासे गयो. ॥ ८५ ॥

षोडशे धन्वनि स्वैरमात्तवन्दितसज्जिते। संदधौ तत्र सूच्यग्रशिखं स विशिखं कृती ॥ ८६ ॥

अन्वयः–तत्र स्वैरं आत्त वंदित सज्जिते षोडशे धन्वनि सः कृती सूचि अग्र शिखं विशिखं संदधौ. ॥ ८६ ॥

अर्थः—( पछी ) त्यां पोतेज उपाडेला वांदेला तथा तैयार करेला शोळमा धनुषपर ते शूरवीरे सोइनी अणीसरखी शिखावाळा बाणने सांध्युं. ॥ ८६ ॥

घृते प्रतिमितं लक्ष्यं भ्रमदालोकयन्नयम्। इदं मुहुरिहायातीत्यारचय्य स्थिरां दृशम् ॥ ८७ ॥

दृग्लक्ष्यसंमुखीं धृत्वा विशिखस्य शिखामसौ। चिरमाकृष्टकोदण्डश्चित्रन्यस्त इव स्थितः ॥८८॥युग्मम्॥

अन्वयः–घृते प्रतिमितं भ्रमत् लक्ष्यं आलोकयन् अयं, इदं मुहुः इह आयाति, इति स्थिरां दृशं आरचय्य, ॥ ८७ ॥ दृग् लक्ष्य संमुखीं विशिखस्य शिखां धृत्वा, आकृष्ट कोदंडः असौ चिरं चित्र न्यस्तः इव स्थितः ॥ ८८ ॥ युग्मं ॥

अर्थः—घृतनी अंदर प्रतिबिंबित थयेली तथा फरती एवी ते पुतळीने जोतो, एवो ते चंद्रोदरकुमार, आ पुतळी वारंवार अहीं

आवे छे, एम विचारी दृष्टिने स्थिर करीने, ॥ ८७ ॥ नजरे देखातां ते लक्ष्यसन्मुख बाणनी अणी राखीने, तथा धनुषने खेंचीने ते घणा समयसुधी चित्रनीपेठे स्थिर थइने उभो. ॥ ८८ ॥ युग्मं ॥

**तद्बाणाग्रे च लक्ष्ये च हृदयस्पर्धया रयात्। राज्ञां विधत्ते दृग्युग्ममेहिरेयाहिरां मुहुः ॥ ८९ ॥**

अन्वयः–राज्ञां दृग् युग्मं, तद् बाण अग्रे, च लक्ष्ये च, हृदय स्पर्धया मुहुः एहिरे याहिरां विधत्ते. ॥ ८९ ॥

अर्थः—(ते वखते) ते राजाओनी बन्ने आंखो ते चंद्रोदरकुमारना बाणना अग्र भागपर, तथा पुतळीनी डाबी आंखपर मननी स्पर्धासहित वारंवार आवजाव करवा लागी. ॥ ८९ ॥

**न स मुञ्चञ्शरं प्रैक्षि न च खे संचरञ्शरः। वेध्यमेव तदा विद्धं विस्मितैर्वीक्षितं नृपैः ॥ ९० ॥**

अन्वयः—तदा विस्मितैः नृपैः सः शरं मुंचन् न प्रैक्षि, च खे संचरन् शरः न, वेध्यं एव विद्धं वीक्षितं. ॥ ९० ॥

अर्थः—ते वखते आश्चर्य पामेला ते राजाओए ते चंद्रोदर कुमारने बाण छोडतो (पण) जोयो नही, तथा आकाशमां उडेलुं तेनुं बाण (पण) तेओ जोइ शक्या नही, फक्त ते पुतळीनी डाबी कीकीनेज वींधायेली तेओए जोइ. ॥ ९० ॥

**नृपेष्वथ महाश्चर्यलीलाधामसु रामसूः। अपायि श्रमभेदाय कैर्न श्लाघासुधारसम् ॥ ९१ ॥**

अन्वयः–अथ नृपेषु महाश्चर्य लीला धामसु रामसूः श्रम भेदाय कैः श्लाघा सुधा रसं न अपायि? ॥ ९१ ॥

अर्थः—पछी ते राजाओ महान आश्चर्यनी लीलाना स्थानरूप थये छते, ते चंद्रोदर कुमारने (तेनो) थाक उतारवामाटे कोणे

(तेनी) प्रशंसारूपी अमृतनो रस न पायो ? (अर्थाद् सघळाओए तेनी प्रशंसा करी.) ॥ ९१ ॥

**औचित्याधानसन्मानसहानीतान्यभूभुजा । पूःप्रवेशं नरेशेन कुमारः कारितस्ततः ॥ ९२ ॥**

अन्वयः–ततः औचित्य आधान सन्मान सह आनीत अन्य भूभुजा नरेशेन कुमारः पूः प्रवेशं कारितः. ॥ ९२ ॥

अर्थः–पछी योग्य आदरमान करवामाटे सत्कारसहित साथे लीधेला छे बीजा (सर्व) राजाओने जेणे एवा ते कांपिल्यपुरना राजाए ते चंद्रोदरकुमारने नगरनी अंदर प्रवेश कराव्यो. ॥ ९२ ॥

**राजलोके ततः पाणिग्रहमाङ्गलिकोत्सुके । आनन्दसुन्दरेऽधत्त सा कन्या म्लानमाननम् ॥ ९३ ॥**

अन्वयः—ततः आनंद सुंदरे राजलोके पाणिग्रह मांगलिक उत्सुके सा कन्या म्लानं आननं अधत्त. ॥ ९३ ॥

अर्थः—पछी हर्षमां लीन थयेला राजदरबारीओ विवाहसंबंधि मांगलिक कार्योमाटे उत्कंठित थये छते, ते कन्या म्लानिवाळुं मुख धारण करवा लागी. ॥ ९३ ॥

**तादृशोदयदानन्दमन्थमन्थरया गिरा । अथैनामभ्यधाद्दुःखपञ्जरी रत्नमञ्जरी ॥ ९४ ॥**

अन्वयः–अथ दुःख पंजरी रत्नमंजरी तादृश उदयत् आनंद मंथ मंथरया गिरा एनां अभ्यधात्. ॥ ९४ ॥

अर्थः–पछी ते दुःखथी फिक्की पडेली रत्नमंजरी, तेवो उत्पन्न थयेलो आनंद वींखाइ जवाथी अचकाती वाणीवडे तेणीने कहेवा लागी के, ॥ ९४ ॥

**वत्से कृत्स्नपरीवारमुखवारिरुहक्षपाम् । कालिकां कलयस्येवमद्यापि वदने कथम् ॥ ९५ ॥**

अन्वयः-(हे) वत्से ! अद्य अपि एवं कृत्स्न परीवार मुख वारिरुह क्षपां कालिकां वदने कथं कलयसि ? ॥ ९५ ॥

अर्थः-हे वत्से ! हजु पण आवीरीते सर्व परिवारना मुखरूपी कमलने ( करमावनारी ) रात्रिसरखी श्यामताने ( तारा ) मुखपर ( तुं ) केम धारण करे छे ? ॥ ९५ ॥

**रूपे निरुपमः काम्यकलावलिविलासभूः । अपूरयत्तव श्रद्धां शुद्धान्वयनृपात्मजः ॥ ९६ ॥**

अन्वयः—रूपे निरुपमः, काम्य कला आवलि विलास भूः, शुद्ध अन्वय नृप आत्मजः तव श्रद्धां अपूरयत्. ॥ ९६ ॥

अर्थः-रूपमां अनुपम, मनमानती कलाओनी श्रेणिओने विलास करवाना स्थानसरखा, तथा निर्मल वंशमां उत्पन्न थयेला आ चंद्रोदर राजकुमारे तारी प्रतिज्ञा संपूर्ण करी छे. ॥ ९६ ॥

**धीरोदात्ताकृतिर्लक्ष्यदाक्ष्यदाक्षिण्यभूषणः । नायं सपत्नीदुःखं ते कदाचिद्दर्शयिष्यति ॥ ९७ ॥**

अन्वयः-धीर उदात्त आकृतिः, लक्ष्य दाक्ष्य दाक्षिण्य भूषणः अयं ते कदाचित् सपत्नी दुःखं न दर्शयिष्यति. ॥ ९७ ॥

अर्थः—( वळी ) धैर्यवान्, मनोहर आकृतिवाळो, साक्षात डहापणवाळो, तथा दाक्षिणताथी शोभतो, एवो आ चंद्रोदर कुमार कोइपण दिवसे ( तने ) शोक्यसंबंधि दुःख देखाडशे नही. ॥ ९७ ॥

**वत्से तन्मुञ्च वैमुख्यं स्मितं भातु भवन्मुखम् । क्षणेऽत्र स्वजनानन्दक्षीरनीरनिधेर्विधुः ॥ ९८ ॥**

अन्वयः-(हे) वत्से ! तत् वैमुख्यं मुंच ? अत्र क्षणे स्वजन आनंद क्षीर नीर निधेः विधुः, भवत् मुखं स्मितं भातु ? ॥९८॥

अर्थः-हे वत्से ! माटे मुखपरनी झांखपनो तुं त्याग कर ? आ समये तो स्वजनोना आनंदरूपी क्षीरसमुद्रने ( उल्लासित करवा-माटे ) चंद्रसरखुं तारुं मुख हसतुं शोभवुं जोइए. ॥ ९८ ॥

**इत्याकर्ण्य गिरं मातुः सा तुषारकरानना । ऊचे भ्रूचेष्टितैरन्तः सूचयन्ती शुचं पराम् ॥ ९९ ॥**

अन्वयः-इति मातुः गिरं आकर्ण्य तुषार कर आनना सा, भ्रूचेष्टितैः अंतः परां शुचं सूचयंती ऊचे. ॥ ९९ ॥

अर्थः-एरीतनी मातानी वाणी सांभळीने चंद्रसरखा मुखवाळी ते राजकन्या भृकुटीनी चेष्टाओथी हृदयनी विशाळ दिलगिरिने सूचवतीथकी बोली के, ॥ ९९ ॥

**मातः कातरता नास्ति सपत्नीभ्यः कदापि मे । मत्तश्चेत्कर्मबन्धं ताः कुर्युरीर्ष्यासु तद्भयम् ॥१९००॥**

अन्वयः-(हे) मातः सपत्नीभ्यः मे कदापि कातरता नास्ति, चेत् ताः मत्तः ईर्ष्यासु कर्मबंधं कुर्युः, तद्भयं ॥ १९०० ॥

अर्थः-हे माताजी ! शोक्योतरफनो मने कोइ पण दिवसे डर नथी, कदाच तेओ मारे लीधे ईर्ष्यामां पडीने कर्मबंधन करे, तेटलोज मने भय छे. ॥ १९०० ॥

**यद्यथैता भविष्यन्ति तदतिप्रीतिरीतिभिः । चिन्तयिष्यामि ता भर्तृसुन्दरीः सोदरीरिव ॥ १ ॥**

अन्वयः-अथ यदि एता भविष्यंति, तत् अति प्रीति रीतिभिः ताः भर्तृ सुंदरीः सोदरीः इव चिंतयिष्यामि. ॥ १ ॥

अर्थः—वळी कदाच ते शोक्यो थशे, तोपण तेओप्रते अत्यंत प्रेमभाव राखीने स्वामिनी ते स्त्रीओने हुं ( म्हारी ) सगी व्हेनो तरीके लेखीश. ॥ १ ॥

**तदेतच्चेतसि न मे मातर्मालिन्यकारणम् । धत्तेऽब्जिन्यास्तमिस्रारिः किं संकोचनिमित्तताम् ॥ २ ॥**

अन्वयः–(हे) मातः तत् एतत् मालिन्य कारणं मे चेतसि न, तमिस्र अरिः किं अब्जिन्याः संकोच निमित्ततां धत्ते ? ॥ २ ॥

अर्थः—हे माताजी ! माटे ते शोक्यसंबंधि मलिनतानुं कारण मारा हृदयमां पण नथी, केमके सूर्य शुं कमलिनीना संकोचनुं कारण थइ शके छे ? ॥ २ ॥

**किं तु प्रतिज्ञा मेऽपूरि राधावेधेन नामुना । अन्यः स राधावेधोऽस्ति येन मे हृन्महोत्सवः ॥ ३ ॥**

अन्वयः–किंतु अमुना राधावेधेन मे प्रतिज्ञा न अपूरि, येन मे हृद् महोत्सवः, सः राधावेधः अन्यः अस्ति. ॥ ३ ॥

अर्थः–परंतु आरीतना राधावेधथी मारी प्रतिज्ञा पूरी थइ नथी, जे वडे मारा मनमां आनंद उपजे ते राधावेध बीजा प्रकारनो छे.

**अरैः सत्कर्मदुःकर्मचक्रयोर्वेदनामयैः । भ्रमद्भिः सृष्टिसंहारक्रमेणान्तरितं द्रुतैः ॥ ४ ॥**

**भ्रान्तं संदेहयन्त्रेण विचारविशिखेन यः । सूक्ष्मं भिन्द्यात्परं तत्त्वं राधावेधी स मे प्रियः ॥ ५ ॥**

अन्वयः–सत्कर्मदुःकर्म चक्रयोः सृष्टि संहार क्रमेण द्रुतैः भ्रमद्भिः वेदनामयैः अरैः अंतरितं, ॥ ४ ॥ संदेह यंत्रेण भ्रांतं सूक्ष्मं परं तत्त्वं विचार विशिखेन यः भिंद्यात्, सः राधावेधी मे प्रियः. ॥ ५ ॥ युग्मं ॥

अर्थः-सत्कार्य अने दुष्कार्यरूपी बे चक्रोना जीवन मरणना क्रमथी प्रेरायेला, अने ममता एवा वेदनामय आराओनी वच्चे ॥ ४ ॥ संदेहरूपी यंत्रवडे ममता सूक्ष्म परम तत्वने विचाररूपी बाणवडे जे भेदे, एवो राधवेध साधनारो मने प्रिय छे. ॥ ५ ॥ युग्मं ॥

**इत्यस्यां विकसद्वाचि श्लोकोऽयमुदभूद्भुवः । लीलावातायनतलात्सहसा राजमार्गतः ॥ ६ ॥**

अन्वयः-इति अस्यां विकसत् वाचि भुवः लीला वातायन तलात् राजमार्गतः अयं श्लोकः उदभूत् . ॥ ६ ॥

अर्थः-एवीरीते ते राजकुमारी जेवामां वचन बोले छे, तेवामां पृथ्वीपरथी क्रीडा करवाना झरूखानी नीचेना राजमार्गमांथी आ मुजबनो श्लोक प्रगट थयो. ॥ ६ ॥

**ईदृक्षराधावेधेन कलावत्या मनःप्रियः । एकश्चन्द्रोदरो विश्वमौलिवर्ती जयत्ययम् ॥ ७ ॥**

अन्वयः—ईदृक्ष राधावेधेन कलावत्याः मनः प्रियः, विश्व मौलिवर्ती अयं एकः चंद्रोदरः जयति ॥ ७ ॥

अर्थः—एवीरीतना राधावेधवडे करीने कलावतीना हृदयने आनंद उपजावनारो, तथा जगतमां अग्रेसर एवो आ एक चंद्रोदर-कुमार जयवंतो वर्ते छे. ॥ ७ ॥

**इत्युपश्रुतिमेवानुमोदमाना प्रमोदिनी । ददौ जालान्तरे नेत्रं पुत्र्या सह नृपप्रिया ॥ ८ ॥**

अन्वयः—इति उपश्रुतिं एव अनुमोदना प्रमोदिनी नृपप्रिया पुत्र्या सह जालांतरे नेत्रं ददौ. ॥ ८ ॥

अर्थः—एरीतना ते श्लोकना श्रवणने अनुमोदती, तथा ( तेथी ) आनंद पामेली राणीए पुत्रीसहित जालीमांथी ( नीचे ) नजर

करी ॥ ८ ॥

असौ पुरःपठद्बन्दिनिवहं वाहवाहनम् । पथि चन्द्रोदरं वीरं संचरन्तमलोकत ॥ ९ ॥

अन्वयः–पुरः पठत् बंदि निवहं, वाह वाहनं, पथि संचरंतं वीरं चंद्रोदरं असौ अलोकत. ॥ ९ ॥

अर्थः—( एवामां ) जेनी आगळ बंदिओनो समूह बिरुदावलि बोली रह्यो छे एवा, तथा घोडापर स्वार थइ मार्गमां चालता एवा ते शूरवीर चंद्रोदर कुमारने तेणीए जोयो. ॥ ९ ॥

चन्द्रोदरस्य पुत्र्याश्च वीक्षयमाणा मुखं मुहुः । अनुषङ्गाच्छिरःकम्पमन्वभूद्रत्नमञ्जरी ॥ १० ॥

अन्वयः—चंद्रोदरस्य च पुत्र्याः मुखं मुहुः वीक्षमाणा रत्नमंजरी अनुषंगात् शिरः कंपं अन्वभूत् ॥ १० ॥

अर्थः–ते चंद्रोदर कुमारना तथा ( पोतानी ) पुत्रीना मुखने वारंवार जोती एवी ते रत्नमंजरी ( तेओ बन्नेना ) योग्य मेलापथी मस्तक कंपाववा लागी. ॥ १० ॥

कायं कृतीन्दुर्यातीति पृष्टा दिक्करिका तया । कापि गत्वाशु विज्ञाय समागत्य व्यजिज्ञपत् ॥ ११ ॥

अन्वयः–कृतींदुः अयं क्व याति? इति तया पृष्टा का अपि दिक्करिका आशु गत्वा विज्ञाय समागत्य व्यजिज्ञपत्. ॥ ११ ॥

अर्थः—विद्वानोमां शिरोमणि एवो आ चंद्रोदर कुमार क्यां जाय छे? एम तेणीए पूछवाथी कोइक युवतीए तुरत जइ, तेनो वृत्तांत जाणी, तथा ( पाछी ) आवीने कह्युं के, ॥ ११ ॥

अद्यायं देवि मन्त्रीन्दुमतिसारगिराचलत् । पुरान्तस्तीर्थकृच्चैत्यपरिपाटीविधित्सया ॥ १२ ॥

अन्वयः-(हे) देवि! अद्य अयं मंत्री इन्दु मतिसार गिरा पुरांतः तीर्थकृत् चैत्य परिपाटी विधित्सया अचलत्. ॥ १२ ॥

अर्थः-हे देवि! आजे आ चंद्रोदर कुमार मतिसार मंत्रीश्वरना कहेवाथी नगरनी अंदर तीर्थंकर प्रभुना मंदिरोनी यात्रा करवानी इच्छाथी फरे छे. ॥ १२ ॥

वार्तया च तया चन्द्रोदरश्रीदर्शनेन च । प्रीता कलावती किंचिद्भेजे पाणिग्रहस्पृहाम् ॥ १३ ॥

अन्वयः—च तया वार्तया, च चंद्रोदर श्री दर्शनेन किंचित् प्रीता कलावती पाणिग्रह स्पृहां भेजे. ॥ १३ ॥

अर्थः-पछी ते समाचारथी, तथा चंद्रोदर कुमारनो भभको जोवाथी कंइंक खुशी थयेली ते कलावतीए लग्ननी इच्छा धारण करी.

अथाकारयदावार्धिमिलितस्वजनव्रजम् । चन्द्रोदरकलावत्योर्नृपः पाणिग्रहोत्सवम् ॥ १४ ॥

अन्वयः-अथ नृपः आवार्धि मिलित स्वजन व्रजं, चंद्रोदर कलावत्योः पाणिग्रह उत्सवं अकारयत्. ॥ १४ ॥

अर्थः-पछी ते राजाए, छेक समुद्रसुधिना स्वजनोना समूहना मेलापवाळो, ते चंद्रोदरकुमार तथा कलावतीनो लग्नमहोत्सव कराव्यो.

विदुषोऽपि पठन्मूर्ख तिष्ठेत्याक्षिप्य संभ्रमात् । आचारं कारयन्तीषु गोत्रवृद्धासु हर्षतः ॥ १५ ॥

ताम्बूलपूरणस्थूलकपोलासु पुरन्ध्रिषु । लसत्कुङ्कुमकौसुम्भशोभासूद्यदुल्लुलुषु ॥ १६ ॥

पठत्यन्वयमुत्ताले वैतालिककुलेऽभितः । वाद्यमानेषु वाद्येषु सान्द्रमन्द्रतरस्वरम् ॥ १७ ॥
ह्रिया न्यग्मुखयोः स्वैः स्वैरुन्मुखीक्रियमाणयोः । वधूटीवरयोर्जायमाने तारेक्षणे मुहुः ॥ १८ ॥
आपूर्णगगनो भग्नभुवनश्रवणेन्द्रियः । उद्भूत्तुमुलः कोऽपि दिग्भित्तिभ्रंशभूरिव ॥१९॥पञ्चभिः कुलकम्॥

अन्वयः—विदुषः अपि "(हे) पठन्मूर्ख !" तिष्ठ ? इति आक्षिप्य संभ्रमात् हर्षतः गोत्र वृद्धासु आचारं कारयंतीषु, ॥१५॥ तांबूल पूरण स्थूल कपोलासु, लसत् कुंकुम कौसुंभ शोभासु, पुरंध्रिषु उद्यत् उलूलुषु, ॥ १६ ॥ अभितः वैतालिक कुले उत्ताले अन्वयं पठति, सांद्र मंद्रतर स्वरं वाद्येषु वाद्यमानेषु, ॥ १७ ॥ ह्रिया न्यग्मुखयोः, स्वैः स्वैः उन्मुखी क्रियमाणयोः वधूटी वरयोः मुहुः तारेक्षणे जायमाने, ॥ १८ ॥ आपूर्ण गगनः, भग्न भुवन श्रवण इंद्रियः, दिग् भित्ति भ्रंश भूः इव, कः अपि तुमुलः उदभूत्.

अर्थः—पंडित एवा पण ते चंद्रोदरकुमारने "अरे ! भण्याछतां मूर्ख" उभो रहे ? एम तुच्छकारीने अचानक हर्षथी गोत्रनी वृद्धस्त्रीओ चालतो रूढी रीवाज करावते छते, ॥ १५ ॥ तांबूलथी भरेला, अने तेथी उपसेला गालोवाळी, छंटातां केसर अने कसुंबानी शोभावाळी, युवतीओ मांगलीक गीतो गाते छते, ॥ १६ ॥ चोतरफ वींटायेलो भाटोनो समूह तालीओ बजावी तेमना वंशसंबंधि गुणगान करते छते, उंडा गंभीर नादपूर्वक वाजित्रो वागते छते, ॥ १७ ॥ लज्जावडे नीचां करेल मुखवाळा, तथा पोतपोताना संबंधिओथी उंचां करातां मुखवाळा, ते वरवहूनो वारंवार तारामेलाप होते छते, ॥ १८ ॥ आकाशने भरी देतो, तथा त्रणे भुवनोनी कर्णेंद्रियोने फाडी नाखनारो, जाणे दिशाओरूपी भींतोना पडवाथी उत्पन्न थयो होय नही ! एवो कोइक विचित्र

प्रकारनो कोलाहल थइ रह्यो. ॥ १९ ॥ पंचभिः कुलकं ॥

**ततः किमिदमित्युच्चभ्रूलते ततचक्षुषि । उत्कन्धरे धराधीशचन्द्रे चन्द्रोदरेऽपि च ॥ २० ॥**

**कोऽपि राजपुमानेत्य वैधुर्यग्लपितस्वरम् । ऊचे वाचा त्वराचारकण्ठशोषेण रूक्षया ॥ २१ ॥ युग्मम् ॥**

अन्वयः—ततः इदं किं? इति उच्च भ्रूलते, तत चक्षुषि उत्कंधरे, धरा अधीश चंद्रे च चंद्रोदरे, ॥ २० ॥ कः अपि राजपुमान् एत्य, त्वरा चार कंठ शोषेण रूक्षया वाचा वैधुर्य ग्लपित स्वरं ऊचे. ॥ २१ ॥ युग्मं ॥

अर्थः—पछी आ ते शुं थयुं छे? एवा विचारथी उंची थयेली भृकुटिवाळा, विकसित आंखोवाळा, उंची थयेली गरदनवाळा एवा ते राजा अने चंद्रोदरकुमार होते छते, ॥ २० ॥ कोइक राजपुरुषे ( त्यां ) आवीने, बहु उतावळे चालवाथी थयेला कंठशोषने लीधे लूखी लागती वाणीवडे, गभराटथी बेसी गयेला सादवडे कह्युं के, ॥ २१ ॥ युग्मं ॥

**समासो गगनस्येव व्यासो विन्ध्यगिरेरिव । स्वामिन्क्रूरत्वदीक्षादिगुरुः पितृपतेरिव ॥ २२ ॥**

**शुण्डावलितदन्ताग्रो गर्जितार्जितदिग्गजः । दृग्गोचरस्य नामापि नाशयन्गात्रघट्टनैः ॥ २३ ॥**

**पुराट्टश्रेणिकायुग्मकूलङ्कषमहारयः । हिंसामहापगापूर इव दूरसमुन्नतः ॥ २४ ॥**

**वन्यः कश्चिदुपायातः कुतोऽपि नगरान्तरम् । भृङ्गैर्गीतयशा लुब्धैर्दानवारिणि वारणः ॥२५॥च. कलाप.**

अन्वयः—(हे) स्वामिन्! गगनस्य समासः इव, विंध्य गिरेः व्यासः इव, पितृ पतेः क्रूरत्व दीक्षा आदि गुरुः इव, ॥ २२ ॥ शुंडा आवलित दंत अग्रः, गर्जि तर्जित दिग्गजः, दृग् गोचरस्य गात्र घट्टनैः नाम अपि नाशयन् ॥ २३ ॥ पुर अट्ट श्रेणिका युग्म कुलंकष महारयः, हिंसा महापगा पुरः इव दूर समुन्नतः, ॥ २४ ॥ दान वारिणि लुब्धैः भृंगैः गीत यशाः, कश्चित् वन्यः वारणः कुतः अपि नगरांतरं उपायातः ॥ २५ ॥ चतुर्भिः कलापकं ॥

अर्थः–हे स्वामी! आकाशना संकोच सरखो, विंध्याचलना विस्तार जेवो, क्रूरताथी यमना दीक्षागुरु सरखो, ॥ २२ ॥ सुंढवडे वींटेला दांतोना अग्रभागवाळो गर्जारवथी दिग्हस्तिओनो तिरस्कार करतो, नजरे पडेला प्राणीना शरीरना टुकडेटुकडा करी तेना नामनिशाननो पण नाश करतो, ॥ २३ ॥ नगरनी दुकानोनी बन्ने बाजुनी हाररूपी बन्ने किनाराओने तोडी पाडता अति वेगवाळा हिंसारूपी म्होटी नदीना पूरनी पेठे अत्यंत उछळतो, ॥ २४ ॥ झरता मदना झरणामां लालचु थयेला भमराओ वडे गवायेलो छे यश जेनो, एवो कोइक जंगली हाथी क्यांकथी नगरनी अंदर आवेलो छे. ॥ २५ ॥ चतुर्भिः कलापकं ॥

**तद्भिया स्तम्भमुन्मूल्य गजा गर्वमिवात्मनः। पलायांचक्रिरे न्यस्य कर्णेभ्योऽङ्घ्रिषु चापलम् ॥२६॥**

अन्वयः—तद्भिया गजाः आत्मनः गर्वं इव स्तंभं उन्मूल्य कर्णेभ्यः अंघ्रिषु चापलं न्यस्य पलायां चक्रिरे. ॥ २६ ॥

अर्थः–ते हाथीना भयथी (आपणा) हाथीओ पोताना गर्वनीपेठे आलानस्तंभोने जडमूळथी उखेडीने, (पोताना) कर्णोनी चपलताने पगोमां धारण करीने नाशी गया छे. ॥ २६ ॥

**पलायमाना हरयो रयोपहतमारुताः । ललङ्घिरे मिथो मार्गरोधं क्रोधसमुद्धुराः ॥ २७ ॥**

अन्वयः—रय उपहत मारुताः, पलायमानाः हरयः क्रोध समुध्धुराः मिथः मार्ग रोधं ललंघिरे. ॥ २७ ॥

अर्थः—वेगथी वायुने पण हरावता, एवा नाशी जता घोडाओ क्रोधथी उद्धत थइने परस्पर थयेला मार्गना अटकावने पण उ-ल्लंघी गया छे. ॥ २७ ॥

**क्षणत्करोत्यपि जगन्न येषां पतितं दृशि । वीरैस्तैरप्यहो हस्तस्रस्तशस्त्रैः पलायितम् ॥ २८ ॥**

अन्वयः-येषां दृशि पतितं जगत् अपि न क्षणत्करोति, अहो ! हस्त स्रस्त शस्त्रैः तैः वीरैः अपि पलायितं. ॥ २८ ॥

अर्थः—जेओनी नजरे पडेलुं (समस्त) जगत पण खणकार करी शकतुं नथी एवा, तथा अहो ! जेओना हाथमांथी हथीयारो (पण भयने लीधे) सरी पडेलां छे, एवा ते महाशूरवीर सुभटो पण नाशी गया छे. ॥ २८ ॥

**किं वा बहु वदाम्येष प्राप्त एवेक्ष्यतां स्वयम् । नदन्नकालकल्पान्तकालमेघ इव द्विपः ॥ २९ ॥**

अन्वयः-वा बहु किं वदामि ? ईक्ष्यतां ? अकाल कल्पांत काल मेघः इव नदन् एषः द्विपः स्वयं प्राप्तः एव. ॥ २९ ॥

अर्थः-अथवा वधारे शुं कहुं ? जुओ ? अकाले कल्पांत काळना मेघनीपेठे गर्जारव करतो ते हाथी पोतेज (अहीं) आवीज पहोंच्यो.

**इत्युक्त्या सपरीवारौ तौ कुमारधरापती । रभसाभ्युत्थितौ नागमैक्षेतां कथिताधिकम् ॥ ३० ॥**

अन्वयः-इति उक्त्वा सपरीवारौ रभसा अभ्युत्थितौ तौ कुमार धरापती कथित अधिकं नागं ऐक्षेतां. ॥ ३० ॥

अर्थः—( ते माणसना ) एवां वचनथी परिवारसहित एकदम उठीने उभा थयेला, एवा ते चंद्रोदर कुमार तथा राजाए ( करेलां वर्णनथी पण ) अधिक ( भयंकर ) हाथीने जोयो. ॥ ३० ॥

**यावत्पश्यति भूजानिस्तावद्वातात्तृणैरिव । द्विपात्त्रस्तैर्जनैः शून्यं कृतं भूतलमग्रतः ॥ ३१ ॥**

अन्वयः-यावत् भूजानिः पश्यति, तावत् वातात् तृणैः इव, द्विपात् त्रस्तैः तैः जनैः अग्रतः भूतलं शून्यं कृतं. ॥ ३१ ॥

अर्थः—( पछी ) जेवामां राजा जुए छे, तेवामां वायुथी ( उडी गयेलां ) घासथी जेम, तेम ते हाथीथी डरीने नाशी गयेला ते लोकोए आगला भागना पृथ्वीतलने शून्य करी मेल्युं. ॥ ३१ ॥

**द्विपेऽस्मिन्दलयत्यट्टजालाट्टालकमालिकाः । पुरस्य कृपया कम्पमानो भूपतिरभ्यधात् ॥ ३२ ॥**

अन्वयः—अस्मिन् द्विपे अट्ट जाल अट्टालक मालिकाः दलयति पुरस्य कृपया कंपमानः भूपतिः अभ्यधात्. ॥ ३२ ॥

अर्थः—आ हाथीए दुकानोनो समूह, तथा झरुखाओनी श्रेणिओने भांगीने तोडी पाडवाथी, नगरनी दयाथी कंपतो राजा कहेवा लाग्यो के, ॥ ३२ ॥

**कोऽप्यस्ति क्षत्रियापुत्रः कुत्रचिन्मच्चमूचये । दोर्बलेन पुरं पाति पात्यमानं द्विपेन यः ॥ ३३ ॥**

अन्वयः-कुत्रचित् मत् चमू चये कः अपि क्षत्रिया पुत्रः अस्ति ? यः दोर्बलेन द्विपेन पात्यमानं पुरं पाति. ॥ ३३ ॥

अर्थः—क्यांयें मारां सैन्यना समूहमां (एवो) कोइ पण क्षत्रियाणीनो पुत्र छे? के जे (पोताना) भुज बलवडे (आ) हाथीथी तोडीपडातां नगरनुं रक्षण करे! ॥ ३३ ॥

**इत्युक्त्वा पार्थिवः चक्षुर्यस्य यस्य मुखे ददौ। वीरः सद्यो नवोढेव स स न्यग्मुखतां दधौ ॥ ३४ ॥**

अन्वयः–इति उक्त्वा पार्थिवः यस्य यस्य मुखे चक्षु ददौ, सः सः वीरः नवोढा इव सद्यः न्यग्मुखतां दधौ. ॥ ३४ ॥

अर्थः–एम कहीने राजाए जेना जेना मुखतरफ नजर करी, ते ते सुभट नवी परणेली वहुनीपेठे तुरतज नीचा मुखवाळो थयो.

**ततः कृतमहाक्रन्दे तस्मिन्नत्यातुरे पुरे। बद्धं वधूत्तरीयेणोत्तरीयं प्रोज्झ्य रंहसा ॥ ३५ ॥**

**पर्युत्प्लुत्योच्चरोमाञ्चकंचुको रामनन्दनः। रे रे मा मेति मातंगं कण्ठीरवरवोऽगदत् ॥ ३६ ॥ युग्मम्**

अन्वयः—ततः कृत महा आक्रंदे तस्मिन् पुरे अति आतुरे वधू उत्तरीयेण बद्धं उत्तरीयं रंहसा प्रोज्झ्य, ॥ ३५ ॥ उच्च रोमांच कंचुकः रामनंदनः पर्युत्प्लुत्य, कंठीरव रवः, रे रे! मा मा? इति मातंगं अगदत्. ॥ ३६ ॥ युग्मं ॥

अर्थः–पछी अति विलाप करतुं ते नगर अत्यंत दुःखी होते छते, वहूनी चुंदडी साथे बांधेलो (पोतानो) दुपट्टो एकदम (त्यांज) छोडीने, ॥ ३५ ॥ उभां थयेलां रोमांचवाळो ते चंद्रोदरकुमार कुदको मारीने, तथा सिंहनाद करीने अरे! अरे! मा मा! एम कही ते हाथीनो तिरस्कार करवा लाग्यो. ॥ ३६ ॥ युग्मं ॥

**तन्नादभयसंभ्रान्तः स्थित्वा स्तब्ध इव क्षणम् । स्वं चेतः पर्यवस्थाप्य क्रुधा तं प्रत्यधावत ॥ ३७ ॥**

अन्वयः–तत् नाद भय संभ्रांतः क्षणं स्तब्धः इव स्थित्वा, स्वं चेतः पर्यवस्थाप्य क्रुधा तंप्रति अधावत. ॥ ३७ ॥

**अर्थः**—ते कुमारना सिंहनादथी भयभीत थयेलो ते हाथी क्षणवार स्तब्धनीपेठे उभो रही, तथा पोतानुं मन स्थिर करी क्रोधथी ते कुमारतरफ दोड्यो. ॥ ३७ ॥

**न कुम्भी वामभोगेन शक्नोति वलितुं जवात् । इत्यस्याश्रित्य तत्पार्श्वे कुमारः पेचकं गतः ॥३८॥**

अन्वयः–कुंभी वामभागेन जवात् वलितुं न शक्नोति, इति अस्य तत्पार्श्वे आश्रित्य कुमारः पेचकं गतः. ॥ ३८ ॥

**अर्थः**—हाथी ( तेनी ) डाबी बाजुथी तुरत वळी शकतो नथी, एम विचारी ते हाथीना डाबे पडखेथी ते कुमार तेना पुंछडां पासे गयो. ॥ ३८ ॥

**तमन्वचलत क्रोधाद्बलेन प्रबलो गजः । पुच्छमूलस्थ एवामुं व्यथयन्नभ्रमद्भटः ॥ ३९ ॥**

अन्वयः–प्रबलः गजः क्रोधात् तं अन्वचलत्. भटः पुच्छ मूलस्थः एव अमुं व्यथयन् अभ्रमत्. ॥ ३९ ॥

**अर्थः**—ते बलवान हाथी क्रोधथी तेनी पाछळ चाल्यो, त्यारे ते शूरवीर कुमार तेना पुंछडांना मूळनेज वळगीने तेने दुःख उपजावतोथको भमाववा लाग्यो. ॥ ३९ ॥

इत्यभ्रामि चिरं कौतूहलाद्वीरेण वारणः । क्रोधद्वेषादिदोषाढ्यः क्षेत्रज्ञ इव कर्मणा ॥ ४० ॥

अन्वयः-इति क्रोध द्वेष आदि दोष आढ्यः क्षेत्रज्ञः कर्मणा इव, कौतूहलात् वीरेण वारणः चिरं अभ्रामि. ॥ ४० ॥

अर्थः—ए रीते क्रोध तथा द्वेषआदिक दोषोवाळा जीवने कर्म जेम (संसारमां) भमावे छे, तेम कुतूहलथी ते शूरवीर चंद्रोदर कुमारे ते हाथीने घणा काळसुधी भमाव्यो. ॥ ४० ॥

उद्दामवामपार्श्वातिभ्रान्तिश्रान्तिस्फुटद्वपुः । क्रुद्ध एव तदा तस्थौ स कृत्रिम इव द्विपः ॥ ४१ ॥

अन्वयः—उद्दाम वाम पार्श्व अतिभ्रांति श्रांति स्फुटत् वपुः सः द्विपः तदा कृत्रिम इव क्रुद्ध एव तस्थौ. ॥ ४१ ॥

अर्थः—मुश्केल एवां डाबा पडखांना अत्यंत भ्रमणना थाकथी त्रुटीजतुं छे शरीर जेनुं, एवो ते हाथी ते वखते (पत्थरना) बनावटी हाथीनीपेठे क्रोधातुर थयोथको स्थिर थइ गयो. ॥ ४१ ॥

खेदाच्छुष्यन्मदं प्रोद्यन्निःश्वासं मीलदीक्षणम् । उपेत्याग्रे कुमारस्तं करेणाताडयत्करे ॥ ४२ ॥

अन्वयः-खेदात् शुष्यत् मदं, प्रोद्यत् निःश्वासं, मीलत् ईक्षणं तं कुमारः अग्रे उपेत्य करेण करे अताडयत्. ॥ ४२ ॥

अर्थः—थाकथी सूकातो छे मद जेनो, वेगथी निःश्वास मूकतो, तथा मीचाती आंखोवाळा ते हाथीने ते चंद्रोदर कुमारे आगळ आवीने (पोताना) हाथवडे (तेनी) सुंढपर थापड मारी. ॥ ४२ ॥

क्रोधतापाद्गलद्रक्ते इव रक्ते दधद्दृशौ । चिक्षेपास्मिन्करं कुम्भी दुष्टः फणमिवोरगः ॥ ४३ ॥

अन्वयः—क्रोध तापात् गलत् रक्ते इव रक्ते दृशौ दधत्, दुष्टः कुंभी, उरगः फणं इव अस्मिन् करं चिक्षेप, ॥ ४३ ॥
अर्थः—क्रोध अने खेदथी जाणे रुधिर झरती होय नही ! एवी लाल आंखोने धारण करता ते दुष्ट हाथीए, सर्प जेम फणने, तेम ते कुमारतरफ (पोतानी) सुंढ उगामी. ॥ ४३ ॥

**नश्यंस्तिष्ठन्पतन्नुद्यन्नृपजन्मा तमग्रहः । गजमाकुलयद्दुष्ट ऋणिको धनिकं यथा ॥ ४४ ॥**

अन्वयः—यथा दुष्टः ऋणिकः धनिकं, (तथा) अग्रहः, नश्यन्, तिष्टन्, पतन्, उद्यत् नृप जन्मा तं गजं आकुलयत्. ॥४४॥
अर्थः-(पछी) जेम दुष्ट करजदार लेणदारने पजवे, तेम (पोते) नही पकडाय, ए रीते नाशतो, उभतो, पडतो, तथा कुदतो एवो ते चंद्रोदर राजकुमार ते हाथीने पजववा लाग्यो. ॥ ४४ ॥

**वेगाददृष्टोत्पतनः स्थिरं किल शिलामयम् ।कुमारोऽथ तमारोहल्लोकाग्रमिव योगवित् ॥ ४५ ॥**

अन्वयः—अथ योगवित् लोक अग्रं इव, अदृष्ट उत्पतनः कुमारः, किल शिलामयं स्थिरं तं वेगात् आरोहत्. ॥ ४५ ॥
अर्थः-पछी योगी जेम लोकना अग्र भागपर (सिद्धशिलापर) चडी जाय, तेम नथी जणायेल उंचे उडवुं जेनुं, एवो ते कुमार पत्थर सरखा ते स्थिर थइ उभेला हाथीपर वेगथी (एकदम) चडी गयो. ॥ ४५ ॥

**तद्वीक्षाकौतुकोत्ताले जाते जालेऽङ्गिनां ततः । पक्षीवोदपतत्पृथ्वीभागान्नागाग्रणीर्दिवि ॥ ४६ ॥**

अन्वयः—ततः तत् वीक्षा कौतुक उत्ताले अंगिनां जाले जाते नाग अग्रणीः पक्षी इव पृथ्वी भागात् दिवि उदपतत्. ॥४६॥

अर्थः–पछी ते देखावना आश्चर्यथी लोकोनो समूह (जेवामां) तालीओ वगाडतो हतो, एवामां ते हस्तिराज पक्षीपेठे पृथ्वीपरथी आकाशमां उडी गयो. ॥ ४६ ॥

**तैरदर्शि दिवि श्यामधामश्रीः सामजो लसन् । कुमारद्युतिभिस्तारतडित्वानिव तोयदः ॥ ४७ ॥**

अन्वयः—दिवि लसन् श्याम धाम श्रीः सामजः, कुमार द्युतिभिः तार तडित्वान् तोयदः इव तैः अदर्शि. ॥ ४७ ॥

अर्थः–आकाशमां उडतो, श्याम कांतिनी शोभावाळो ते हाथी, कुमारना तेजथी झबुकती वीजळीवाळा मेघनीपेठे ते लोकोए जोयो.

**एष यात्येष यातीति जने जाग्रद्घनस्वने । करी कुमारमाणिक्यतस्करोऽयं तिरोऽभवत् ॥ ४८ ॥**

अन्वयः–एषः याति, एषः याति, इति जने जाग्रत् घन स्वने कुमार माणिक्य तस्करः अयं करी तिरः अभवत्. ॥ ४८ ॥

अर्थः—आ जाय, आ जाय, एम लोको घणो कोलाहल करते छते कुमाररूपी माणिक्यने चोरनारो ते हाथी अदृश्य थइ गयो.

**किमेतदिति चिन्तार्तिनिश्चलैश्चित्रगैरिव । जनैरजनि दुःखस्य चित्रशालेव सा पुरी ॥ ४९ ॥**

अन्वयः–एतत् किं ? इति चिंता अर्ति निश्चलैः चित्रगैः इव जनैः दुःखस्य चित्र शाला इव सा पुरी अजनि. ॥ ४९ ॥

अर्थः—आ शुं थयुं ? एम चिंतानी पीडाथी स्थिर थइ जवाथी जाणे चित्रेला होय नही ! एवा ते लोकोवडे करीने, जाणे दुःखनी चित्रशाला होय नही ! एवी ते नगरी थइ गइ. ॥ ४९ ॥

**नयनैकप्रिये तत्र कुमारे करिणा हृते । स्वसर्वस्वमिवामोचि जनानां नयनैः पयः ॥ ५० ॥**

अन्वयः–नयन एक प्रिये तत्र कुमारे करिणा हृते, स्व सर्वस्वं इव जनानां नयनैः पयः अमोचि. ॥ ५० ॥

अर्थः–आंखोने एक प्रिय एवा ते कुमारने हाथीए हरी जवाथी, जाणे पोताना सर्वस्वने छोडी देता होय नही ! तेम लोकोनी आंखोए अश्रु छोडवा मांड्यां. ॥ ५० ॥

**तद्दन्तिगमनाद् द्वेष्यं न्यग्मुखो निःश्वसञ्जनः । आकाशसावकाशत्वं हन्तुं धूलिमुदक्षिपत् ॥ ५१ ॥**

अन्वयः—तद् दंति गमनात् न्यग्मुखः निःश्वसन् जनः द्वेष्यं आकाश सावकाशत्वं हंतुं धूलिं उदक्षिपत्. ॥ ५१ ॥

अर्थः–ते हाथीना जवाथी नीचुं मुख करीने निःश्वास मूकता लोको, शत्रुसरखी आकाशनी पोलाणने हणवामाटे (जाणे) धूडने उंचे उडाडवा लाग्या. ॥ ५१ ॥

**आयूरुद्धदशद्वारे देहे गेहेऽभितोऽभ्रमि । प्रियं कुमारमन्वेतुमाकुलैरसुभिर्नृणाम् ॥ ५२ ॥**

अन्वयः—आयुः रुद्ध दश द्वारे देहे गेहे, प्रियं कुमारं अन्वेतुं नृणां आकुलैः असुभिः अभितः अभ्रमि. ॥ ५२ ॥

अर्थः–आयुवडे रोकायेला छे दशे द्वारो जेनां एवां शरीररूपी घरमां ते प्रिय कुमारने शोधवामाटे माणसोनां व्याकुल प्राणो चोतरफ भमवा लाग्यां ॥ ५२ ॥

**तदा तेन कुमारेण सममेव गते हृदि । मूर्छामगच्छदुचित्तं नन्दिनी मेदिनीपतेः ॥ ५३ ॥**

अन्वयः—तदा तेन कुमारेण समं एव हृदि गते, मेदिनीपतेः नंदिनी मूर्छा अगच्छत्, उचितं. ॥ ५३ ॥

अर्थः—ते वखते ते कुमारनी साथेज हृदय चाल्युं जवाथी ते राजपुत्री (जे) मूर्छा पामी, ते उचितज छे. ॥ ५३ ॥

**विलोक्य पिटकोद्भेदं दग्धस्योपरि तं नृपः । मज्जन्दुःखभराम्भोधौ किंकर्तव्यजडोऽजनि ॥ ५४ ॥**

अन्वयः—दग्धस्य उपरि पिटक उद्भेदं तं विलोक्य, दुःख भर अंभोधौ मज्जन् नृपः किंकर्तव्य जडः अजनि. ॥ ५४ ॥

अर्थः—दाझ्यापर फोडलो उपडवा सरखा ते बनावने जोइने दुःखना समूहरूपी महासागरमां डूबतो राजा, हवे शुं करवुं? (एवा विचारमांज) जडजेवो थइ गयो. ॥ ५४ ॥

**पुनश्चैतन्यमापन्ना तद्दन्तिपथदत्तदृक् । हा जीवेश क यातोऽसीत्युक्तिगर्भं रुरोद सा ॥ ५५ ॥**

अन्वयः—पुनः चैतन्यं आपन्ना, तत् दंति पथ दत्त दृक्, सा हा! जीवेश! क यातः असि? इति उक्ति गर्भं रुरोद. ॥ ५५ ॥

अर्थः—पाछुं चैतन्य पामेली, तथा ते हाथीना ( जवाना ) मार्गपर राखेली छे नजर जेणीए, एवी ते कन्या, हा! जीवितेश! तमो क्यां गया छो? एरीतनां वचनो सहित रडवा लागी. ॥ ५५ ॥

**तदा वदामः किं दुःखं महोदग्रमहो जने । तस्यां रुदत्यां जज्ञेऽर्तिर्यद्द्रुमेषूपलेष्वपि ॥ ५६ ॥**

अन्वयः—अहो ! तदा जने महोदग्रं दुःखं किं वदामः ? यत् तस्यां रुदत्यां द्रुमेषु उपलेषु अपि अर्तिः जज्ञे. ॥ ५६ ॥

अर्थः—अहो ! ते वखते माणसोने जे अत्यंत दुःख थयुं, तेनी तो वातज शुं कहीयें ? केमके ते राजकन्याना रुदनथी वृक्षोने तथा पत्थरोने पण दुःख थवा लाग्युं. ॥ ५६ ॥

**तया हातातहामातर्हादैवेत्यादिशब्दितः । चक्रन्द विस्मृताक्रन्दकारणोऽपि जनोऽथ सः ॥ ५७ ॥**

अन्वयः—अथ विस्मृत आक्रंद कारणः अपि सः जनः, तया हा ! तात ! हा ! मातः ! हा दैव ! इत्यादि शब्दितः चक्रंद.

अर्थः-पछी (ते हाथीरूपी) दुःखनी बूमोनुं कारण भूलाइ गया छतां पण ते लोको, ते कन्याना हा ! तात ! हा ! माता ! हा दैव ! इत्यादिक विलापोवडे बोलाववाथी रडवा लाग्या. ॥ ५७ ॥

**शुचा रसीभवन्त्याथ समं विलसतः सतः । तज्जनस्य जगामाहस्त्रुटिमाहात्म्यभृत्तदा ॥ ५८ ॥**

अन्वयः-अथ रसीभवंत्या शुचा समं तत् जनस्य विलसतः सतः, तदा त्रुटि माहात्म्यभृत् अहः जगाम. ॥ ५८ ॥

अर्थः—पछी रसरूप थती दिलगिरिनी साथे ते लोको विलास करते छते, ते वखते खलास थवाना महिमावाळो दिवस व्यतीत थयो. ( अर्थात् लोकोनो ते आखो दिवस शोकमांज व्यतीत थयो.) ॥ ५८ ॥

**चक्राह्वनादैः क्रन्दन्ती ताराभिर्बाष्पबिन्दुभृत् । तमोभिर्मुक्तकेशा च दुःखिनीव निशाप्यभूत् ॥ ५९ ॥**

अन्वयः-चक्र आह्व नादैः क्रंदंती, ताराभिः बाष्प बिंदु भृत्, च तमोभिः मुक्त केशा निशा अपि दुःखिनी इव अभूत्. ॥५९॥

अर्थः—चक्रवाकोना परस्पर बोलाववाना शब्दोवडे रडती, ताराओवडे आंसुओना बिंदुवाळी, अने अंधकारवडे छूटा मूकेला केशोवाळी रात्रि पण ( विलाप करती स्त्रीनीपेठे ) दुःखवाळी थइ. ॥ ५९ ॥

**चन्द्रेऽप्युदयमानेऽथ कुमारमुखशङ्कया । जनस्य हृष्यतो विघ्नं लक्ष्मलेखैव निर्ममे ॥ ६० ॥**

अन्वयः— अथ चंद्रे अपि उदयमाने कुमार मुख शंकया हृष्यतः जनस्य लक्ष्म लेखा एव विघ्नं निर्ममे. ॥ ६० ॥

अर्थः—पछी चंद्र पण उगते छते (ते) चंद्रोदर कुमारना मुखनी शंकाथी खुशी थता लोकोने ( तेमां देखाती ) लांछननी रेखा-एज (तेओना हर्षमां) विघ्न कर्युं. ॥ ६० ॥

**चक्षुष्याकलयन्कण्ठविलग्नां रोदनक्रियाम् । मोहसुप्तो जनो यान्तीमजानीत निशां न सः ॥ ६१ ॥**

अन्वयः—कंठ विलग्नां रोदन क्रियां चक्षुषि आकलयन् मोह सुप्तः सः जनः यांतीं निशां न अजानीत. ॥ ६१ ॥

अर्थः—कंठमां वळगेली रुदननी क्रियाने चक्षुमां अनुभवता, तथा मोहनिद्रामां सूतेला एवा ते लोको चाली जती रात्रिने (पण) जाणी शक्या नही. ॥ ६१ ॥

**ततो गतसिताभीशुजीवितेशवियोगिनीः । रविच्छविचिताचक्रे पतन्तीर्वीक्ष्य तारकाः ॥ ६२ ॥**

**चित्तप्रियवियोगार्ता सापि भूपालकन्यका । दुःखौषधं ममास्त्वग्निरित्युच्चैरादद्दे वचः ॥६३॥ युग्मम् ॥**

अन्वयः—ततः रवि च्छवि चिता चक्रे, गत सित अभीशु जीवित ईश वियोगिनीः तारकाः पतंतीः वीक्ष्य, ॥ ६२ ॥ चित्त प्रिय वियोग आर्ता सा भूपाल कन्यका अपि, मम दुःख औषधं अग्निः अस्तु, इति उच्चैः वचः आददे. ॥ ६३ ॥ युग्मं ॥

अर्थः—सूर्यना तेजरूपी चिताना समूहमां, अस्त पामेला चंद्ररूपी पोताना स्वामिना वियोगवाळी ताराओने पडती जोइने, ॥ हृदयंगम स्वामीना वियोगथी पीडित थयेली ते राजपुत्री पण, मारां दुःखनुं औषध ( पण ) अग्निज थाओ ? एम म्होटे स्वरे

बोलवा लागी. ॥ ६३ ॥ युग्मं ॥

**आभूपरङ्कपर्यन्तं जनानां मरणार्थिनाम् । तदा तदेव वचनं समं वक्त्रेष्वजायत ॥ ६४ ॥**

अन्वयः—तदा आ भूप रंक पर्यंतं मरण अर्थिनां जनानां वक्त्रेषु समं तत् एव वचनं अजायत. ॥ ६४ ॥

अर्थः—ते वखते राजाथी मांडीने छेक रंकसुधी मृत्युने इच्छता लोकोना मुखथी एकीहारे तेज वचन निकळवा मांड्युं. ॥६४॥

**इत्येकमतमाश्रित्य प्रत्यक्षे कर्मसाक्षिणि । जनो ययौ चितातीर्थं नदीतीरमहीतलम् ॥ ६५ ॥**

अन्वयः—इति एक मतं आश्रित्य कर्म साक्षिणि प्रत्यक्षे जनः नदी तीर मही तलं चिता तीर्थं ययौ. ॥ ६५ ॥

अर्थः—ए रीते एकमत थइने सूर्य उगते छते (सर्व) लोको नदीकिनारानी जमीनपर आवेलां श्मशानमां गया. ॥ ६५ ॥

**व्यभज्यत जनैर्दूरादिह स्वस्य चिताकृते । खण्डं खण्डं भुवः खड्गाकर्षणैर्मितमङ्गुलैः ॥ ६६ ॥**

अन्वयः—इह स्वस्य चिताकृते जनैः दूरात् अंगुलैः मितं भुवः खंडं खंडं खड्ग आकर्षणैः व्यभज्यत. ॥ ६६ ॥

अर्थः—अहीं पोतपोतानी चितामाटे लोकोए चडसाचडसीथी आंगळोवडे मापीने जमीननो टुकडे टुकडो तलवार खेंचीने (पण) वहेंची लीधो. ॥ ६६ ॥

**कल्याणतुल्यमूल्यात्तैः काष्ठखण्डकदम्बकैः । अहम्पूर्विकया तत्र व्यरच्यन्त जनैश्चिताः ॥ ६७ ॥**

अन्वयः—तत्र जनैः अहं पूर्विकया कल्याण तुल्य मूल्य आत्तैः काष्ठ खंड कदंबकैः चिताः व्यरच्यंत. ॥ ६७ ॥

अर्थः-त्यां (ते) लोकोए "हुं पहेलां, हुं पहेलां" ए रीते सोनाने मूल्ये खरीदेला काष्टोना टुकडाओना समूहोवडे चिताओ खडकवा मांडी. ॥ ६७ ॥

**तच्चिताजालमालोक्य भविष्यत्तापशङ्कया । समकम्पन्त तत्सीमद्युजलस्थलदेवताः ॥ ६८ ॥**

अन्वयः—तत् चिता जालं आलोक्य भविष्यत् ताप शंकया तत् सीम द्यु जल स्थल देवताः समकंपंत. ॥ ६८ ॥

अर्थः-ते चिताओनो समूह जोइने थनारा तापनी शंकाथी ते हदमां रहेला आकाशना, जलना तथा स्थलना देवो कंपवा लाग्या.

**विन्यस्य तृणपूलेषु वह्निं तस्मिञ्जनस्ततः । जीवितस्येव नासीरं समीरं मुखतोऽक्षिपत् ॥ ६९ ॥**

अन्वयः—ततः तृण पूलेषु वह्निं विन्यस्य जनः जीवितस्य नासीरं इव समीरं तस्मिन् मुखतः अक्षिपत्. ॥ ६९ ॥

अर्थः—पछी घासना पूलाओमां अग्नि मूकीने लोको (पोताना) जीवनना अग्रेसरसरखा वायुने ते अग्निमां मुखथी (फूंको मारी) प्रेरवा लाग्या. ॥ ६९ ॥

**मुखमारुतवीचीभिः प्रेरिताभिर्मुहुर्मुहुः । विलक्षोऽजनि लोकोऽयं नाज्वलज्ज्वलनः पुनः ॥ ७० ॥**

अन्वयः-मुहुः मुहुः प्रेरिताभिः मुख मारुत वीचीभिः पुनः ज्वलनः न अज्वलत्, अयं लोकः विलक्षः अजनि. ॥ ७० ॥

अर्थः—वारंवार प्रेरेला मुखवायुना मोजांओथी पण अग्नि सळग्यो नही, (त्यारे) ते सर्व लोको विलखा पडी गया. ॥७०॥

**जनितज्ज्वालनोपायव्रजेनापि जनेन सः । नाग्निर्ज्वालयितुं शेके कुतुकीवानिलैर्हसन् ॥ ७१ ॥**

अन्वयः—जनित ज्वलन उपाय व्रजेन अपि जनेन, कुतुकी इव अनिलैः हसन् सः अग्निः ज्वालयितुं न शेके. ॥ ७१ ॥

अर्थः—तेने सळगाववामाटे अनेक उपायो अजमाव्या छतां पण लोको, रमुजीनीपेठे वायुनी साथे हसता ते अग्निने सळगावी शक्या नही. ॥ ७१ ॥

**विलक्षा दिक्षु विक्षिप्तचक्षुः क्ष्मापसुता ततः । ददर्श दूरतः कायोत्सर्गसंवर्गितं यतिम् ॥ ७२ ॥**

अन्वयः—ततः विलक्षा क्ष्माप सुता दिक्षु विक्षिप्त चक्षुः दूरतः कायोत्सर्ग संवर्गितं यतिं ददर्श. ॥ ७२ ॥

अर्थः—पछी विलखी पडेली ते राजकुमारीए दिशाओतरफ नजर करतां दूर कायोत्सर्ग ध्यानमां रहेला (कोइएक) मुनिने जोया.

**दध्यौ च युक्तं कारुण्यसुधाब्धेरस्य संनिधौ । एतावज्जनतामृत्युहेतुर्ज्वलति नानलः ॥ ७३ ॥**

अन्वयः—च दध्यौ कारुण्य सुधा अब्धेः अस्य संनिधौ एतावत् जनता मृत्यु हेतुः अनलः न ज्वलति, युक्तं. ॥ ७३ ॥

अर्थः—पछी (तेणीए) विचार्यु के, दयारूपी अमृतना महासागरसरखा एवा आ मुनिराजनी नजीकमां, आटलाबधा लोकोना संहारना कारणरूप अग्नि जे सलगतो नथी, ते युक्तज छे. ॥ ७३ ॥

**तद्वन्देऽहमसंदेहं स्वार्थसिद्ध्यै जवादमुम् । भान्तीच्छाकल्पतरवो गुरवो भृशमीदृशाः ॥ ७४ ॥**

अन्वयः—तत् अहं असंदेहं स्वार्थ सिध्ध्यै जवात् अमुं वंदे, ईदृशाः गुरवः भृशं इच्छा कल्पतरवः भांति ॥ ७४ ॥

अर्थः—माटे हुं कंई पण संशयविना (मारो) स्वार्थ साधवामाटे तुरत तेमने वंदन करुं, केमके आवा गुरुमहाराजो सारीरीते वांछित पूरवामाटे कल्पवृक्ष सरखा होय छे. ॥ ७४ ॥

**इत्यगच्छदियं स्वच्छमतिर्यतिनतिस्पृहा । साधुदर्शनसानन्दैर्जनैरनुगताखिलैः ॥ ७५ ॥**

अन्वयः—इति स्वच्छ मतिः, यति नति स्पृहा इयं साधु दर्शन सानंदैः अखिलैः जनैः अनुगता अगच्छत्. ॥ ७५ ॥

अर्थः—एम विचारीने निर्मल बुद्धिवाळी, तथा मुनिने वांदवानी इच्छावाळी ते राजकुमारी, मुनिना दर्शनथी आनंद पामेला एवा ते सर्व लोकोसहित (त्यां) गइ. ॥ ७५ ॥

**तं नत्वाथ मुनिं व्यक्तभक्तिभासुरमानसा । जगाद जगतीनाथसुता दुःखोचितं वचः ॥ ७६ ॥**

अन्वयः—अथ व्यक्त भक्ति भासुर मानसा जगती नाथ सुता तं मुनिं नत्वा दुःखोचितं वचः जगाद. ॥ ७६ ॥

अर्थः—पछी प्रगट रीते भक्तिथी देदीप्यमान हृदयवाळी ते राजकुमारी ते मुनिराजने नमीने (पोताना) दुःखने सूचवनारुं वचन बोली के, ॥ ७६ ॥

**किं कृपाब्धे त्वयारोधि तपःशक्त्या ज्वलन्शिखी । शिखिजित्वरतापार्तं न किं जानास्यमुं जनम् ॥७७॥**

अन्वयः—हे ! कृपाब्धे ! त्वया तपः शक्त्या ज्वलन् शिखी किं अरोधि ? शिखि जित्वर ताप आर्तं अमुं जनं किं न जानासि?

अर्थः—हे! दयासागर मुनिराज! आपे (आपनी) तपशक्तिवडे अग्निने प्रगट थतो केम रोक्यो? अग्निने पण जीतनारा संतापथी पीडित थयेला आ माणसने शुं (आप) नथी जाणी शकता? ॥ ७७ ॥

**ईदृक्तापातुरं तर्हि संयमामृतसागरे । इमं निमज्जय जनं भगवञ्जगतां हित ॥ ७८ ॥**

अन्वयः—(हे) भगवन्! (हे) जगतां हित! तर्हि ईदृक् ताप आतुरं इमं जनं संयम अमृत सागरे निमज्जय? ॥ ७८ ॥

अर्थः—हे भगवन्! हे जगतना हितकारी मुनिराज! तो पछी आवा संतापथी पीडायेला एवा आ मनुष्यने (मने) आप संयमरूपी अमृतना महासागरमां स्नान करावो? ॥ ७८ ॥

**पारयित्वाथ संसारपारदृश्वा मुनीश्वरः । जगौ साक्षादवज्ञातद्राक्षावल्लीफलं वचः ॥ ७९ ॥**

अन्वयः—अथ संसार पार दृश्वा मुनि ईश्वरः पारयित्वा साक्षात् अवज्ञात द्राक्षा वल्ली फलं वचः जगौ. ॥ ७९ ॥

अर्थः—पछी संसारनो पार जोनारा ते मुनिराज (कायोत्सर्ग) पारीने साक्षात दाक्षवल्लीना फलनी पण अवज्ञा करनारुं (मिष्ट) वचन बोल्या के, ॥ ७९ ॥

**दानशीलतपोभावजित्वरी पुण्यसंपदा । गार्हस्थ्ये भाविनी त्वत्तः शासनस्य प्रभावना ॥ ८० ॥**

अन्वयः—गार्हस्थ्ये पुण्य संपदा दान शील तपः भाव जित्वरी शासनस्य प्रभावना त्वत्तः भाविनी, ॥ ८० ॥

अर्थः—गृहस्थपणामांज पुण्यनी संपत्तिथी दान, शील, तप तथा भावने पण जीतनारी शासननी प्रभावना (उन्नति) ताराथी थवानी छे.

तत्कल्याणिनि मा कार्षीरिदानीं संयमोद्यमम् । भूरिभोगफलं कर्म त्वयि किंचिच्च चञ्चति ॥ ८१ ॥

अन्वयः–तत् (हे) कल्याणिनि ! इदानीं संयम उद्यमं मा कार्षीः ? च त्वयि किंचित् भूरि भोग फलं कर्म चंचति. ॥ ८१ ॥

अर्थः–माटे हे कल्याणि ! हमणा (तारे) संयममाटे उद्यम करवो नही, केमके तारुं कंइंक विशेषप्रकारनुं भोग फलवाळुं कर्म चळकी रह्युं छे. ॥ ८१ ॥

उद्यमोऽयं यदर्थं स चतुर्थेऽह्नि समेष्यति । राजपुत्रः स तु यथा विद्यते श्रूयतां तथा ॥ ८२ ॥

अन्वयः–यदर्थं अयं उद्यमः सः चतुर्थे अह्नि समेष्यति, तु सः राजपुत्रः यथा विद्यते, तथा श्रूयतां ? ॥ ८२ ॥

अर्थः—(वळी) जेने माटे आ प्रयास थइ रह्यो छे, ते चोथे दिवसे (अहीं) आवशे, तथा ते चंद्रोदर राजकुमारनी (हालमां) शुं हालत छे ? (ते वृत्तांत) तुं सांभळ ? ॥ ८२ ॥

अस्ति पूः स्वस्तिपूर्णश्रीर्वैताढ्याचलमण्डनम् । विदिता मल्लिका नाम्ना पुरचक्रमतल्लिका ॥ ८३ ॥

अन्वयः—स्वस्ति पूर्ण श्रीः, वैताढ्य अचल मंडनं, पुर चक्र मतल्लिका मल्लिका नाम्ना विदिता पूः अस्ति. ॥ ८३ ॥

अर्थः—कल्याण सहित भरेली लक्ष्मीवाळी, वैताढ्यपर्वतना अलंकाररूप, तथा नगरोना समूहमां शिरोमणि सरखी मल्लिका नामनी प्रख्यात नगरी छे ॥ ८३ ॥

नयी रत्नाङ्गदो नाम महोद्दामपराक्रमः । विद्याधरवरस्तारविद्याशक्तिर्भुनक्ति ताम् ॥ ८४ ॥

अन्वयः—नयी, महोद्दाम पराक्रमः, तारविद्या शक्तिः, रत्नांगदः नाम विद्याधर वरः तां भुनक्ति. ॥ ८४ ॥
अर्थः—न्यायी, विशाल पराक्रमवाळो, मनोहर विद्याओनी शक्तिवाळो रत्नांगद नामनो उत्तम विद्याधर ते नगरनुं राज्य करे छे.

**तस्य लीलावतीकुक्षिनलिनैकमरालिका । सुतास्ति रुक्मिणी नाम रूपश्रीरिव रूपिणी ॥ ८५ ॥**

अन्वयः—तस्य लीलावती कुक्षि नलिन एक मरालिका, रूपिणी रूप श्रीः इव रुक्मिणी नाम सुता अस्ति ! ॥ ८५ ॥
अर्थः—ते राजाने लीलावती ( नामनी राणीनी ) कुक्षिरूपी कमलपर एक हंसीसरखी, तथा देहधारी रूपनी लक्ष्मीसरखी रुक्मिणीनामनी पुत्री छे. ॥ ८५ ॥

**तां क्रोडे क्रीडयन्सभ्यानुवाच ह्यस्तनेऽह्नि सः । वरोऽस्ति कश्चिदप्येतदनुरूपः क्षिताविति ॥ ८६ ॥**

अन्वयः—ह्यस्तने अह्नि तां क्रोडे क्रीडयन् सः सभ्यान् इति उवाच, क्षितौ एतत् अनुरूपः कश्चित् अपि वरः अस्ति. ॥८६॥
अर्थः—गइ काले ते पुत्रीने खोळामां रमाडता एवा ते राजाए सभासदोने एम कह्युं के, पृथ्वीपर आ कन्यासरखा रूपवाळो (शुं) कोइ वर छे ? ॥ ८६ ॥

**ततः खेचरवक्त्रेभ्यः श्रुत्वा तदधिकश्रियम् । त्वत्प्रियं खेचराधीशः स कुमारमहारयत् ॥ ८७ ॥**

अन्वयः—ततः खेचर वक्त्रेभ्यः त्वत् प्रियं तदधिक श्रियं श्रुत्वा सः खेचर अधीशः कुमारं अहारयत्. ॥ ८७ ॥
अर्थः—पछी विद्याधरोना मुखथी तारा स्वामीने तेथी पण अधिक शोभावाळो सांभळीने ते खेचरेंद्रे ते चंद्रोदर कुमारनुं हरण कर्युं छे.

तेन कन्याविवाहार्थं कुमारोऽभ्यर्थितस्ततः । नयधर्मसदाचारसत्यधीरभ्यधादिदम् ॥ ८८ ॥

अन्वयः—ततः कन्या विवाह अर्थं तेन अभ्यर्थितः, नय धर्म सदाचार सत्य धीः कुमारः इदं अभ्यधात्. ॥ ८८ ॥

अर्थः—पछी (पोतानी) पुत्रीना विवाहमाटे ते विद्याधरे प्रार्थना करेला, न्याय, धर्म, सदाचार तथा सत्यनी बुद्धिवाळा ते चंद्रोदरकुमारे एम कह्युं के ॥ ८८ ॥

अद्यैव दैवमर्यादोल्लङ्घिरूपमयश्रियम् । दृग्लीलाख्यातशीलादिगुणां पर्यणयं वधूम् ॥ ८९ ॥

अन्वयः-दैव मर्यादा उल्लंघि रूपमय श्रियं, दृग् लीला आख्यात शील आदि गुणां वधूं अद्य एव पर्यणयं. ॥ ८९ ॥

अर्थः-दैविक हदने पण उल्लंघी जनारां रूपयुक्त शोभावाळी, तथा नयनोना विलासथी शील आदिक गुणोने सूचवनारी स्त्रीने आजेज हुं परण्यो छुं. ॥ ८९ ॥

सतीं रूपवतीं चैकामङ्गीकृत्य मृगीदृशम् । कस्मै सुखाय सुमुखी द्वितीया परिणीयते ॥ ९० ॥

अन्वयः—सतीं च रूपवतीं एकां मृगीदृशं अंगीकृत्य द्वितीया सुमुखी कस्मै सुखाय परिणीयते. ॥ ९० ॥

अर्थः-सती तथा सुरूपवाळी एक स्त्रीने स्वीकार्याबाद, बीजी उत्तम मुखवाळी स्त्रीने कया सुखमाटे परणवी. ?

वरं कारागृहक्षिप्तो वरं देशान्तरभ्रमी । वरं नरकसंचारी न द्विभार्यः पुनः पुमान् ॥ ९१ ॥

अन्वयः–कारागृह क्षिप्तः वरं, देशांतर भ्रमी वरं, नरक संचारी वरं, पुनः द्विभार्यः पुमान् न. ॥ ९१ ॥
अर्थः–केदखानामां नाखेला पुरुषने सुखी जाणवो, देशांतरमां भमनारने पण सुखी जाणवो, तथा नरकमां जनारने पण सुखी जाणवो, परंतु बे स्त्रीवाळा पुरुषने सुखी जाणवो नहीं. ॥ ९१ ॥

**अभूषितो गृहाद्याति नाप्नोत्यम्बुच्छटामपि । अक्षालितपदः शेते भार्याद्वयवरो नरः ॥ ९२ ॥**

अन्वयः–भार्या द्वय वरः नरः अभूषितः गृहात् याति, अंबु च्छटां अपि न आप्नोति, अक्षालित पदः शेते. ॥ ९२ ॥
अर्थः—बे स्त्रीनो स्वामी एवो पुरुष अलंकाररहित ( तिरस्कार सहित ) घरमांथी ( बहार ) जाय छे, पाणीनो छांटो पण पामतो नथी, तथा तेने पग धोयाविनाज सूवुं पडे छे. ॥ ९२ ॥

**दुर्भगापि विरूपापि सपत्नी सुभ्रुवामपि । गात्रमात्रं सदा ह्यन्तस्तप्तायःशल्यवल्लसेत् ॥ ९३ ॥**

अन्वयः–दुर्भगा अपि, विरूपा अपि सपत्नी, सुभ्रुवां अपि सदा हि अंतः तप्त अयः शल्यवत् गात्रमात्रं लसेत्. ॥ ९३ ॥
अर्थः—दुर्भागिणी तथा कदरूपी, एवी पण शोक्य, स्त्रीओने पण हमेशां खरेखर अंदर खूचेली तपावेली लोखंडनी सूइनीपेठे आखा शरीरमां खुंच्या करे छे, ॥ ९३ ॥

**तत्तादृक्प्रेयसीप्रेमरसव्यसनिना मया । पुत्रीसंबन्धबन्धस्ते रुचितोऽप्युचितोऽपि न ॥ ९४ ॥**

अन्वयः–तत् तादृक् प्रेयसी प्रेम रस व्यसनिना मया, ते पुत्री संबंध बंधः रुचितः अपि उचितः अपि न. ॥ ९४ ॥

अर्थः—माटे ते तेवी स्त्रीना प्रेमरसमां आसक्त थयेलो एवो जे हुं, तेनी साथे तारी पुत्रीनो संबंध बांधवो, ए तने मनगमतो होवा छतां उचित पण नथी. ॥ ९४ ॥

**इत्युक्त्वा विरते धर्मनिरते नृपजन्मनि । विद्याधराधिपो जिह्वादोलयान्दोलयद्गिरम् ॥ ९५ ॥**

अन्वयः—इति उक्त्वा धर्म निरते नृप जन्मनि विरते, विद्याधर अधिपः जिह्वा दोलया गिरं आंदोलयत्. ॥ ९७ ॥

अर्थ–एम कहीने धर्ममां आसक्त एवो ते राजकुमार मौन रह्याबाद ते विद्याधरपति (पोतानी) जिह्वारूपी हींचोळापर वाणीने झुलाववा लाग्यो. (अर्थात् बोल्यो.) ॥ ९५ ॥

**मत्पुत्री परिणीयासौ द्रष्टव्यापि कदापि न । किं तूद्वह महाभाग भाग्यमेतावतापि मे ॥ ९६ ॥**

अन्वयः—(हे) महाभाग! असौम त्पुत्री परिणीय कदापि द्रष्टव्या अपि न, किंतु उद्वह? एतावता अपि मे भाग्यं. ॥ ९६ ॥

अर्थः—हे महाभाग्यशाली कुमार! आ मारी पुत्रीने परणीने (तारे) कदापि (तेनी) सामे पण जोवुं नही, परंतु (तुं तेणीने) परणी ले? एटलाथी पण (हुं) मारुं सुभाग्य समजीश. ॥ ९६ ॥

**इत्यादिभिर्गिरां भारैरुपरोध्य विवाहितः । कृत्वा मण्डपरात्रिं स सकलत्रः समेष्यति ॥९७॥ त्रिभिर्विशेषकम्**

अन्वयः–इत्यादिभिः गिरां भारैः उपरोध्य विवाहितः सः मंडपरात्रिं कृत्वा सकलत्रः समेष्यति. ॥ ९७ ॥ त्रिभिर्विशेषकं ॥

अर्थः–इत्यादिक वचनोना भारथी पराणे परणावेलो ते चंद्रोदर कुमार मांडवानी रात्रि करीने ते स्त्रीसहित (अहीं) आवशे.

**इति तत्कृपयादिश्य सोऽग्निस्तम्भं कथां च ताम् । चचार चारणमुनिर्मनुष्याप्रहते पथि ॥ ९८ ॥**

अन्वयः—इति तत् कृपया अग्नि स्तंभं, च तां कथां आदिश्य सः चारण मुनिः मनुष्य अप्रहते पथि चचार. ॥ ९८ ॥

अर्थः—एरीते तेणीनी दयाथी अग्निने अटकावीने, तथा ते कथा कहीने ते चारणमुनि मनुष्योना प्रचारविनाना आकाशमार्गमां चाल्या गया. ॥ ९८ ॥

**इहैव हि स्थितैः पाल्यः कुमारागमनोत्सवः । इत्यालोच्य जनैस्तस्थे तटिनीतट एव तैः ॥ ९९ ॥**

अन्वयः–इह एव स्थितैः कुमार आगमन उत्सवः पाल्यः, इति आलोच्य तैः जनैः तटिनी तटे एव तस्थे. ॥ ९९ ॥

अर्थः—अहींज रहीने (आपणे) कुमारना आगमननो महोत्सव उजववो, एम विचारीने ते (सघळा) लोको त्यां नदीकिनारेज मुकाम करी रह्या. ॥ ९९ ॥

**एष्यत्यद्य कुमारेन्दुर्नान्यथा मुनिवागिति । चतुर्थाहर्निशीथेऽपि स जनो जागरी स्थितः ॥ २००० ॥**

अन्वय —अद्य कुमार इंदुः एष्यति, मुनि वाक् अन्यथा न, इति चतुर्थ अहः निशीथे अपि सः जनः जागरी स्थितः. ॥२०००॥

अर्थः—आजे ते कुमाररूपी चंद्र आवशे, केमके मुनिराजनी वाणी मिथ्या थाय नही, एवा विचारथी चोथा दिवसनी मध्यरात्रिए पण ते सर्व माणसो जागता रह्या. ॥ २००० ॥

**रे रे मया हृतां कन्यां व्यूह्य नीत्वा क यास्यसि । अयं न भवसि क्षिप्रमस्त्रमस्त्रज्ञ सज्जय ॥ १ ॥**

रे रे वधूं मया व्यूढामेतामाच्छेत्तुमिच्छसि । एभिरेव पदैरेहि पातयामि शिरस्तव ॥ २ ॥
एवं वधूविरोधेन क्रोधेन व्योम्नि धावतोः । कयोश्चन जनेनोच्चैरुक्तिप्रत्युक्तयः श्रुताः ॥ ३ ॥

अन्वयः-रेरे! मया हृतां कन्यां व्यूह्य नीत्वा क्व यास्यसि? अयं न भवसि, हे! अस्त्रज्ञ! अस्त्रं क्षिप्रं सज्जय? ॥ १ ॥ रेरे! मया व्यूढां एतां वधं आच्छेत्तुं इच्छसि? एहि? एभिः एव पदैः तव शिरः पातयामि, ॥ २ ॥ एवं वधू विरोधेन क्रोधेन व्योम्नि धावतोः कयोश्चन उच्चैः उक्ति प्रत्युक्तयः जनेन श्रुताः. ॥ ३ ॥ त्रिभिर्विशेषकं ॥

अर्थः—अरे! अरे! में हरेली कन्याने परणीलेइने तुं क्यां जाय छे? आ (हमणाज) तुं हतो न हतो थवानो छुं, हे शस्त्रनी तालीम जाणनारा! (तुं) शस्त्र तुरत तैयार कर? ॥ १ ॥ अरे रे! में परणेली आ स्त्रीने तुं उंचकावी जवाने शुं इच्छे छे? चाल्यो आव? आ पगलेज तारुं मस्तक तोडी पाडुं छुं, ॥ २ ॥ ए रीते स्त्रीना कलहथी क्रोधवडे आकाशमां दोडता कोइक बे माणसोना म्होटा शब्दोथी थता प्रश्नोत्तरो लोकोए सांभळ्या. ॥ ३ ॥ त्रिभिर्विशेषकं ॥

किमेतदिति संभ्रान्तः स जनो दिवि दत्तदृक् । खड्गप्रहारखाट्कारान्सहुंकारानकर्णयत् ॥ ४ ॥

अन्वयः-एतत् किं? इति संभ्रांतः सः जनः दिवि दत्तदृक् सहुंकारान् खड्ग प्रहार खाट्कारान् अकर्णयत्. ॥ ४ ॥

अर्थः-आ शुं? एरीते भ्रांतिमां पडेला ते लोकोए आकाशमां नजर करतां हुंकारसहित तलवारना खडखडाट सांभळ्या. ॥ ४ ॥

मा भूदिह कुमारेन्दुः स्याच्चेत्तज्जयतादसौ । इत्यासन्नुक्तयोऽन्योयं जनस्याकुलचेतसः ॥ ५ ॥

अन्वयः-इह कुमार इंदुः माभूत्, चेत् स्यात् तत् असौ जयतात्, इति आकुल चेतसः जनस्य अन्योन्यं उक्तयः आसन्. ॥५॥

अर्थः—आ आकाशी विग्रहमां ते चंद्रोदर कुमार न होय तो ठीक, अने कदाच ते होय तो ते जय पामो? एम ते व्याकुल थयेला लोको परस्पर बोलवा लाग्या. ॥ ५ ॥

**एतस्मिन्नन्तरे खड्गक्षतक्षतजवृष्टिकृत् । पपात पुरुषः कोऽपि दिवो दीप्तवपुर्व्यसुः ॥ ६ ॥**

अन्वयः—एतस्मिन् अवसरे खड्ग क्षत क्षतज वृष्टिकृत्, दीप्त वपुः कः अपि व्यसुः पुरुषः दिवः पपात. ॥ ६ ॥

अर्थः-एटलामां तलवारना प्रहारथी निकळतां रुधिरनी वृष्टिवाळो, तेजस्वी शरीरवाळो कोइक मृत्यु पामेलो पुरुष आकाशमांथी पड्यो.

**हा नाथ मां द्विषानेन ह्रियमाणां न पासि किम् । रणाग्ररमणो ध्यानसिद्धसिद्धः सुरोऽसि यत् ॥७॥**

अन्वयः-हा! नाथ! यत् रण अग्र रमणः, ध्यानसिद्ध सिद्धिः सुरः असि, अनेन द्विषा ह्रियमाणां मां किं न पासि ? ॥ ७ ॥

अर्थः—अरे! स्वामी! ज्यारे रणसंग्राम करवामां अग्रेसर, तथा फक्त ध्यान धरतांज मळेली छे सिद्धि जेने, एवो तुं देव छो, तो पछी आ शत्रुवडे हरण करातो एवी जे हुं, तेनुं रक्षण केम करतो नथी ? ॥ ७ ॥

**एवं रुदत्याः कस्याश्चिद्दूरं दूरं मृगीदृशः । शुश्रुवे ह्रियमाणाया इव व्योमाध्वनि ध्वनिः ॥ ८ ॥**

अन्वयः—एवं दूरं रुदंत्याः कस्याश्चित् ह्रियमाणायाः इव मृगीदृशः व्योम अध्वनि ध्वनिः शुश्रुवे. ॥ ८ ॥

अर्थः-एरीते दूर विलाप करती कोइक जाणे हरण कराती होय नही! एवी स्त्रीनो आकाशनी अंदर अवाज संभळावा लाग्यो.

पुमांसं पतितं यावद्दीपेनैक्षत भूपतिः । उपालक्षत तावत्तं कुमारं पूच्चकार च ॥ ९ ॥

अन्वयः—भूपतिः यावत् पतितं पुमांसं दीपेन अैक्षत, तावत् तं कुमारं उपालक्षत, च पूच्चकार. ॥ ९ ॥

अर्थ —(पछी) राजाए जेवामां ते पडेला पुरुषने दीवो धरीने जोयो, तेवामां तेणे ते चंद्रोदर कुमारने ओळखी कहाड्यो, अने पोकार कर्यो. ॥ ९ ॥

निन्दन्तस्तामहर्षेण महर्षेरपि भारतीम् । कुमारमरणं वीक्ष्य प्रापुः पौराः परां शुचम् ॥ १० ॥

अन्वयः—अहर्षेण महर्षेः अपि तां भारतीं निंदंतः पौराः कुमार मरणं वीक्ष्य परां शुचं मापुः. ॥ १० ॥

अर्थः—( पछी ) शोकथी ते महामुनिराजनी ते वाणीने ( पण ) निंदता एवा ते नगरना लोको, ते राजकुमारनुं मृत्यु जोइने अत्यंत दिलगिरि पामवा लाग्या. ॥ १० ॥

रराज राजपुत्री तु बहिःस्था शोकहर्षयोः । रचयन्ती चितामेवोपचितामिन्धनैर्घनैः ॥ ११ ॥

अन्वयः—राजपुत्री तु घनैः इंधनैः चितां उपचितां रचयंती शोक हर्षयोः बहिःस्था रराज. ॥ ११ ॥

अर्थः—परंतु ते राजपुत्री तो घणां काष्टोवडे चिताने म्होटी करतीथकी, शोक तथा हर्ष, बन्नेथी अलगी रहीथकी शोभवा लागी.

मृत्युव्यवसितिव्यग्रां क्ष्मापमुख्या निरीक्ष्य ताम् । सर्वे तत्कर्मनिर्माणसरसास्तरसाभवन् ॥ १२ ॥

अन्वयः—तां मृत्यु व्यवसिति व्यग्रां निरीक्ष्य क्ष्माप मुख्याः सर्वे तरसा तत्कर्म निर्माण सरसाः अभवन्. ॥ १२ ॥

अर्थः—ते राजकुमारीने मृत्युमाटेनी सामग्रीमां उद्यमवंत जोइने, राजा आदिक सघळा लोको (पण) तुरत पोतानुं मरण साधवामांज रसिक थया. ॥ १२ ॥

**चितां कुमारमारोप्य प्रज्वाल्य ज्वलनं ततः । स्नात्वा नृपतिभूस्त्यक्तकम्पा झम्पाकृते स्थिता ॥ १३ ॥**

अन्वयः—ततः चितां कुमारं आरोप्य, ज्वलनं प्रज्वाल्य, त्यक्त कंपा नृपति भूः झंपाकृते स्थिता. ॥ १३ ॥

अर्थः—पछी ते चितापर कुमारना शबने मेलीने, तथा (तेमां) अग्नि प्रगटावीने निष्कंपपणे ते राजकुमारी तेमां झंपापात करवामाटे तैयार थइ. ॥ १३ ॥

**सत्त्वेन केचिदौचित्याचरणेनापरेपरे । लज्जया सज्जयामासुश्चितामाशु निजां निजाम् ॥ १४ ॥**

अन्वयः—केचित् सत्त्वेन, अपरे औचित्य आचरणेन, परे लज्जया, आशु निजां निजां चितां सज्जयामासुः. ॥ १४ ॥

अर्थः—(ते वखते) केटलाक हिम्मतथी, बीजा उचित आचार मानीने, तथा बीजा केटलाक लाजना मार्या तुरत पोतपोतानी चिता खडकवा लाग्या. ॥ १४ ॥

**क्षणे सत्त्वस्य निकषे तत्र सत्रासचेतसः । सिन्धुस्नानविधानादिच्छलात्केऽपि पलायिताः ॥ १५ ॥**

अन्वयः—सत्त्वस्य निकषे तत्र क्षणे सत्रास चेतसः के अपि सिंधु स्नान विधान आदि च्छलात् पलायिताः. ॥ १५ ॥

अर्थः—हिम्मतनी कसोटी सरखा ते समये भयभीत हृदयवाळा केटलाक मनुष्यो नदीए न्हावा जवा आदिकनो मिष करी

पलायन करी गया. ॥ १५ ॥

त्रपाभयद्वयीकूलंकषया चिन्तयाकुलाः । मन्दं मन्दं परे चक्रुश्चिताचक्रप्रपञ्चनम् ॥ १६ ॥

अन्वयः—परे त्रपा भयद्वयी कूलंकषया चिंतया आकुलाः मंदं मंदं चिता चक्र प्रपंचनं चक्रुः. ॥ १६ ॥

अर्थः-बीजा केटलाक लज्जा अने भयनी नदीसरखी चिंताथी व्याकुल थया थका धीमे धीमे चिताओनो समूह खडकवा लाग्या.

दधुः सत्त्वभृतः केऽपि कपोलपुलकोत्तरम् । द्विगुणं राजपुत्रीतः प्रीतचित्ताश्चितारसम् ॥ १७ ॥

अन्वयः—के अपि सत्त्व भृतः कपोल पुलक उत्तरं प्रीत चित्ताः राज पुत्रीतः द्विगुणं चितारसं दधुः ॥ १७ ॥

अर्थः—केटलाक हिम्मती लोको ( पोताना ) गालोपर रोमांच धारण करीने, तथा मनमां हर्ष धरीने राजपुत्रीथी पण बेवडो चिता खडकवानो उत्साह धरवा लाग्या. ॥ १७ ॥

धूमं क्रौर्यजिताद्दण्डमिवाच्छिन्नं कृतान्ततः । भ्रमयन्तः शिरस्युच्चैर्ज्वलन्ति स्म चिताग्नयः ॥ १८ ॥

अन्वयः-क्रौर्य जितात् कृतांततः आच्छिन्नं दंडं इव धूमं शिरसि उच्चैः भ्रमयंतः चिता अग्नयः ज्वलंतिस्म. ॥ १८ ॥

अर्थः—(पोतानी) क्रूरताथी जितेला यमराज पासेथी झूंटवी लीधेला ( तेना ) दंडसरखा धूमाडाने मथाळापर उंचे भमावतो चिताओनो अग्नि सळगवा लाग्यो. ॥ १८ ॥

तापयन्तस्तलैरुर्वीं ज्वालाजालैर्नभस्तलम् । दिशः स्फुलिङ्गैरप्यासन्नामी कस्य भियेऽग्नयः ॥ १९ ॥

अन्वयः—तलैः उर्वीं, ज्वाला जालैः नभः तलं, स्फुलिंगैः दिशः अपि तापयंतः अमी अग्नयः कस्य भिये न आसन्? ॥ १९ ॥

अर्थः—तलीएथी पृथ्वीने, शिखाओना समूहोथी गगनतलने, तथा ( उडता ) तणखाओथी दिशाओने पण तपावता ते अग्निओ कोने भयानक न थया? ॥ १९ ॥

**ततश्चित्तस्फुरत्पञ्चपरमेष्ठिनमस्कृतिः । रोमाञ्चिताङ्गी तत्राग्नौ यावज्झम्पति भूपभूः ॥ २० ॥**

**तावदायात एवाहं हव्यवाहं भजस्व मा । प्रिये त्वमेव मे प्राणाश्चित्तं चेत्युदभूद्वचः ॥ २१ ॥ युग्मम्॥**

अन्वयः— ततः चित्त स्फुरत् पंच परमेष्ठि नमस्कृतिः, रोमांचित अंगी भूपभूः यावत् तत्र अग्नौ झंपति, ॥ २० ॥ तावत् (हे) प्रिये! अहं आयातः एव, हव्य वाहं मा भजस्व? त्वं एव मे प्राणाः च चित्तं, इति वचः उदभूत्. ॥ २१ ॥ युग्मं ॥

अर्थः—पछी हृदयमां स्फुरायमान छे पंच परमेष्ठिनो नमस्कार जेणीने, तथा रोमांचित शरीरवाळी, एवी ते राजकन्या जेवामां ते अग्निमां झंपापात करवा जायछे, ॥ २० ॥ तेवामां हे! प्रिये! हुं आवीज पहोंच्यो छुं, तुं अग्निमां न पड? तुंज मारा प्राण तथा हृदयरूप छो, एवी रीतनी वाणी ( उंचे आकाशमां ) प्रगट थइ. ॥ २१ ॥ युग्मं ॥

**ततः खे दत्तनयना नयनानन्दकं प्रियम् । समायान्तं विमानेन सापश्यत्प्रेयसीयुतम् ॥ २२ ॥**

अन्वयः—ततः खे दत्त नयना सा नयन आनंदकं, प्रेयसीयुतं विमानेन समायांतं प्रियं अपश्यत् ॥ २२ ॥

अर्थः–पछी आकाशमां नजर करतां तेणीए आंखोने हर्ष उपजावनारा, प्रिया सहित विमान मारफते आवता (पोताना) स्वामीने जोया.

प्रियासौ मत्प्रियस्यापि तन्ममातिप्रिया ध्रुवम् । इति सा प्रीतिसरसां सपत्न्यामप्यदादृशम् ॥ २३ ॥

अन्वयः—मत्प्रियस्य अपि असौ प्रिया, तत् ध्रुवं मम अतिप्रिया, इति सा सपत्न्यां अपि प्रीति सरसां दृशं अदात्. ॥ २३ ॥

अर्थः—मारा स्वामीने पण आ प्यारीछे, तो खरेखर मने (ते) वधारे प्रिय थइ पडवी जोइये, एम विचारी तेणीए ते शोक्य उपर पण प्रेमरसवाळी दृष्टि करी. ॥ २३ ॥

किं जीवितं किमानन्दः किमुल्लासः किमुत्सवः । आयात्यसाविति स्मेरदृशा केनैष नैक्ष्यत ॥ २४ ॥

अन्वयः—किं जीवितं? किं आनंदः? किं उल्लासः? किं उत्सवः? असौ आयाति? इति स्मेर दृशा केन एषः न ऐक्ष्यत?

अर्थः—शुं जीवनरूप ? शुं आनंदरूप ? शुं उल्लासरूप ? के शुं उत्सवरूप आ आवे छे ? एम विचारी विकस्वर दृष्टिवाळा एवा कोणे ते चंद्रोदर कुमारने न जोयो ? ॥ २४ ॥

पादन्यासैः कुमारोऽयमथ भूमिमभूषयत् । स्मेरयञ्जनवक्त्राणि कमलानीव भास्करः ॥ २५ ॥

अन्वयः—अथ भास्करः कमलानि इव, अयं कुमारः जन वक्त्राणि स्मेरयन् पाद न्यासैः भूमिं अभूषयत्. ॥ २५ ॥

अर्थः—पछी सूर्य जेम कमलोने, तेम आ कुमार लोकोना मुखोने विकस्वर करतो थको (पोताना) चरणन्यासोथी (पक्षे-किरणोना विस्तारथी) पृथ्वीने शोभाववा लाग्यो. ॥ २५ ॥

प्रणमन्व्योमयुद्धादि पृष्टो राज्ञा जगाद सः । अभूत्कस्याप्यसौ मायाप्रपञ्चो वञ्चनाय वः ॥ २६ ॥

अन्वयः—प्रणमन् सः राज्ञा व्योम युद्ध आदि पृष्टः जगाद, असौ वः वंचनाय कस्य अपि माया प्रपंचः अभूत्. ॥ २६ ॥

अर्थः—प्रणाम करता एवा ते चंद्रोदरकुमारने राजाए आकाशमां थयेलां युद्ध आदिकनो वृत्तांत पूछवाथी तेणे कह्युं के, ते तो तमोने ठगवामाटे कोइकनी कपटजाळ होवी जोइये ॥ २६ ॥

**ततः क्षितिपतिः क्लृप्तकुमारागमनोत्सवः । दानैरानन्दयन्नर्थिप्रकरान्प्राविशत्पुरीम् ॥ २७ ॥**

अन्वयः—ततः क्लृप्त कुमार आगमन उत्सवः क्षितिपतिः दानैः अर्थि प्रकरान् आनंदयन् पुरीं प्राविशत्. ॥ २७ ॥

अर्थः—पछी करेल छे कुमारनी पधरामणीनो महोत्सव जेणे एवो ते राजा दानवडे याचकोना समूहोने खुशी करतो थको नगरमां दाखल थयो. ॥ २७ ॥

**चिरं विरचितोद्दामतमजामातृगौरवः । ततः कृती कृतार्थं स पार्थिवः स्वममन्यत ॥ २८ ॥**

अन्वयः—ततः चिरं विरचित उद्दामतम जामातृ गौरवः सः कृती पार्थिवः स्वं कृतार्थं अमन्यत. ॥ २८ ॥

अर्थः—पछी घणा काळसुधी करेल छे अति विशेष प्रकारे जमाइनुं गौरव जेणे एवो ते चतुर राजा पोताने कृतार्थ मानवा लाग्यो.

**मुहुरापृच्छमानोऽथ पृथ्वीशेन स भूपभूः । बद्धबाष्पेण सत्कृत्य प्रेषितः प्रेयसीयुतः ॥ २९ ॥**

अन्वयः—अथ मुहुः आपृच्छमानः सः भूपभूः बद्ध बाष्पेण पृथ्वी ईशेन सत्कृत्य प्रेयसी युतः प्रेषितः. ॥ २९ ॥

अर्थः—पछी वारंवार रजा मागता एवा ते चंद्रोदरकुमारने राजाए (आंखोमां) आंसुओ लावीने सत्कारपूर्वक (तेनी) स्त्री सहित

( जवामाटे ) रजा आपी. ॥ २९ ॥

**यान्ती पत्या समं पादौ प्रणिपत्य पितुस्ततः । विनयेन विराजन्ती राजपुत्रीदमब्रवीत् ॥ ३० ॥**

अन्वयः—ततः पत्या समं यांती राजपुत्री पितुः पादौ प्रणिपत्य विनयेन विराजंती इदं अब्रवीत्. ॥ ३० ॥

अर्थः—पछी पतिनी साथे जती ते राजकुमारी (पोताना) पिताना चरणोमां नमीने विनयथी शोभती थकी एम कहेवा लागी के,

**यो धर्मरुचिनामा वो धर्मामात्योऽस्ति धर्मवित् । स प्रेष्यतां धर्मकथासंवादाय मया समम् ॥ ३१ ॥**

अन्वयः—धर्मवित् यः वः धर्मरुचि नामा धर्म अमात्यः अस्ति, सः धर्म कथा संवादाय मया समं प्रेष्यतां? ॥ ३१ ॥

अर्थः—धर्मने जाणनारो जे आपनो धर्मरुचिनामे धार्मिक मंत्री छे, तेने धर्म कथा संभळाववा माटे मारी साथे मोकलो? ॥३१॥

**निवेद्याथ कुमाराय कुमारब्रह्मचार्यसौ । प्रैषि धर्मशुचिर्धर्मरुचिः पुत्र्या सहामुना ॥ ३२ ॥**

अन्वयः—अथ अमुना कुमाराय निवेद्य, धर्म शुचिः, कुमार ब्रह्मचारी असौ धर्मरुचिः पुत्र्या सह प्रैषि. ॥ ३२ ॥

अर्थः—पछी ते राजाए चंद्रोदर कुमारने ते हकीकतथी वाकेफ करीने धर्मथी पवित्र, तथा कुमारपणाथीज ब्रह्मचारी एवा ते धर्मरुची मंत्रीने (पोतानी) पुत्री साथे मोकल्यो. ॥ ३२ ॥

**संत्यक्तान्दुःखयन्देशानादृतानेष हर्षयन् । ततः कलत्रद्वयवानवाप स्वां पुरीं वरः ॥ ३३ ॥**

अन्वयः—ततः वरः एषः संत्यक्तान् देशान् दुःखयन्, आदृतान् हर्षयन् कलत्र द्वयवान् स्वां पुरीं अवाप. ॥ ३३ ॥

अर्थः—पछी ते उत्तम राजकुमार छोडता देशोने (पोताना विरहथी) दुःखी करतो, तथा प्राप्त करेलाने हर्षित करतो थको बन्ने स्त्रीओ सहित पोतानी नगरीमां आव्यो. ॥ ३३ ॥

**समायातं तमालोक्य पुत्रं प्रीतोऽथ पार्थिवः । राज्ये बलेन योग्यत्वादभिषिच्यादितव्रतम् ॥ ३४ ॥**

अन्वयः-अथ तं पुत्रं समायातं आलोक्य प्रीतः पार्थिवः, योग्यत्वात् बलेन राज्ये अभिषिच्य व्रतं आदित ॥ ३४ ॥

अर्थः-पछी ते पुत्रने आवेलो जोइने खुशी थयेला राजाए (तेने) योग्य जाणीने पराणे राज्यपर बेसाडी चारित्र ग्रहण कर्युं. ३४

**मन्त्रिन्यस्तमहीभारो महीपालसुतावशः । विद्याधराधिपसुतां स नाचष्टे न चेक्षते ॥ ३५ ॥**

अन्वयः—मंत्रि न्यस्त मही भारः, महीपाल सुता वशः सः विद्याधर अधिप सुतां न आचष्टे च न ईक्षते. ॥ ३५ ॥

अर्थः—पृथ्वीनो भार मंत्रीने सोंपी देइने (फक्त) ते राजपुत्रीनेज वश थयेलो ते चंद्रोदर कुमार विद्याधरेशनी पुत्रीने बोलावतो पण नथी, तथा (तेणीनी) सामुं पण जोतो नथी. ॥ ३५ ॥

**महीपातुः सुता सा तु शीलशीलनशालिनी । दध्यौ सद्धर्मकर्मैकविचारविशदा तदा ॥ ३६ ॥**

अन्वयः—तु शील शीलन शालिनी, सद्धर्म कर्म एक विचार विशदा सा मही पातुः सुता तदा दध्यौ. ॥ ३६ ॥

अर्थः-परंतु शीलव्रतना पालनथी शोभिती, अने उत्तम धार्मिक कार्यनाज एक चिंतवनथी निर्मल एवी ते राजपुत्री ते वखते एम विचारती हती के, ॥ ३६ ॥

पत्युर्भवन्ति यावत्यो युवत्यः पाणिपीडिताः । पतिर्वारक्रमात्तासां सोऽह्नि तावद्दिनान्तरे ॥ ३७ ॥

अन्वयः—यावत्यः युवतयः पत्युः पाणि पीडिताः भवंति, तावत् दिनांतरे अह्नि वार क्रमात् तासां सः पतिः. ॥ ३७ ॥

अर्थः—जेटली स्त्रीओने स्वामी परणेलो होय, तेटला दिवसोना अंतरवाळे दिवसे अनुक्रमे वारामुजब ते स्त्रीओनो ते भर्तार थइ शके.

विलुप्य वारमन्यस्या रागादागामुकः स्वयम् । स्पृश्योऽपि शीलवत्या न स्त्रियोपपतिवत्पतिः ॥ ३८ ॥

अन्वयः—रागात् अन्यस्याः वारं विलुप्य स्वयं आगामुकः पतिः शीलवत्या स्त्रिया उपपतिवत् स्पृश्यः अपि न. ॥ ३८ ॥

अर्थः— (परंतु) रागथी बीजीनो वारो तजीने पोतानी मेळे आवेला स्वामीने शीलवती स्त्रीए जारतुल्य मानीने, तेनो स्पर्श पण करवो जोइए नही. ॥ ३८ ॥

ततो विद्याधराधीशसुतावारनिवारणः । मामयं कामयन्नुर्वीपतिः पापाय जायते ॥ ३९ ॥

अन्वयः—ततः विद्याधर अधीश सुता वार निवारणः अयं उर्वी पतिः मां कामयन् पापाय जायते. ॥ ३९ ॥

अर्थः—माटे विद्याधरेंद्रनी पुत्रीनो वारो अटकावनार आ राजा मारी साथे विलास करतोथको पापदायी थाय छे. ॥ ३९ ॥

केनाप्ययमुपायेन न्यायेन च बलेन च । तद्वारे वार्य आगच्छन्नागतो नेक्ष्यतेऽपि सः ॥ ४० ॥

अन्वयः—केन अपि उपायेन, च न्यायेन, च बलेन तद्वारे आगच्छन् अयं वार्यः, आगतः सः ईक्ष्यते अपि न. ॥ ४० ॥

अर्थः—(माटे) कोइक उपायथी न्यायवडे अथवा बलवडे तेणीना वाराने दिवसे (मारी पासे) आवता ते राजाने (मारे) अटकाववो जोइये, अने तेम छतां कदाच आवे, तो तेनी सामुं पण मारे जोवुं नही. ॥ ४० ॥

**इति चेतसि निश्चित्य शीललीलावती नृपम्। सावदद्विनयानम्रवदना सदनागतम् ॥ ४१ ॥**

अन्वयः—चेतसि इति निश्चित्य शील लीलावती सा विनय आनम्र वदना सदन आगतं नृपं अवदत्. ॥ ४१ ॥

अर्थः—मनमां एवो निश्चय करीने शीलनी लीलावाळी ते राजकुमारी, विनयथी (पोतानुं) मुख नमावीने (पोताने) घेर आवेला ते राजाने कहेवा लागी के, ॥ ४१ ॥

**कुलीना निष्कलङ्का च कनिष्ठा सा मम स्वसा। निरूप्यतेऽपि नो भूपरत्न किं रूपवत्यपि ॥ ४२ ॥**

अन्वयः—(हे) भूपरत्न! सा मम कनिष्ठा स्वसा कुलीना, निष्कलंका, च रूपवती अपि, किं निरूप्यते अपि नो? ॥४२॥

अर्थः—हे नरेंद्रोमां रत्नसरखा राजन्! ते म्हारी न्हानी व्हेन कुलीन, कलंकविनानी अने स्वरूपवाळी पण छे, छतां आप तेनी सामे पण केम जोता नथी? ॥ ४२ ॥

**धर्मोऽप्यसौ न धर्मज्ञ नयज्ञ न नयोऽप्ययम्। गोत्राचारज्ञ नो गोत्राचारोऽप्येष करोषि यम् ॥ ४३ ॥**

अन्वयः—(हे) धर्मज्ञ! असौ धर्मः अपि न, (हे) नयज्ञ! अयं नयः अपि न, (हे) गोत्र आचारज्ञ! एषः गोत्र आचारः अपि न, यं करोषि. ॥ ४३ ॥

अर्थः—हे धर्मने जाणनारा राजन्! आवो कोइ धर्म पण नथी, हे न्यायने जाणनारा! एवो कोइ न्याय पण नथी, तथा हे गोत्राचारने जाणनारा! एवो कोइ गोत्राचार पण नथी, के जेने आप आचरी रह्या छो. ॥ ४३ ॥

**प्रभो पाणिगृहीतां तां युक्त्या युक्तिज्ञ पालय । शुद्धधर्मनयाचारविचारिषु यशः स्पृश ॥ ४४ ॥**

अन्वयः-(हे) प्रभो! (हे) युक्तिज्ञ! पाणि गृहीतां तां युक्त्या पालय? शुद्ध धर्म नय आचार विचारिषु यशः स्पृश? ॥४४॥

अर्थः-हे स्वामी! हे युक्तिना जाणकार राजन्! हाथथी स्वीकारेली एवी ते विद्याधरपुत्रीनुं ( आप ) रक्षण करो? अने निर्मल धर्म, न्याय, आचार तथा विचारवाळा मनुष्योमां यश मेळवो? ॥ ४४ ॥

**इतिप्रभृतिभिर्भाषाभङ्गीभिर्भाषितोऽभितः । नाङ्गीचकार तत्कर्म तद्गुणोर्मिवशो नृपः ॥ ४५ ॥**

अन्वयः—इति प्रभृतिभिः भाषा भंगीभिः अभितः भाषितः नृपः तद् गुण ऊर्मि वशः तत्कर्म न अंगीचकार. ॥ ४५ ॥

अर्थः—इत्यादिक वचनोनी युक्तिओवडे घणुं समजाव्या छतां पण ते राजाए तेणीना गुणोना अतिशयने वश थवाथी ते कार्य स्वीकार्यु नही. ॥ ४५ ॥

**अनन्यहृदया सेयममेयमहिमोज्ज्वला । दिनेनैकान्तरेणाथ महोनाथमसेवत ॥ ४६ ॥**

अन्वयः—अथ अनन्य हृदया, अमेय महिमा उज्ज्वला सा इयं एक अंतरेण दिनेन महीनाथं असेवत. ॥ ४६ ॥

अर्थः-पछी निश्चल मनवाळी, तथा अपरिमित महिमाथी निर्मल थयेली ते आ राजकन्या एकांतर दिवसे राजाने सेववा लागी.

रुक्मिणीवारयोग्ये तु वासरे सा नरेश्वरम् । आयातमपि नोऽपश्यद्धर्मवश्येन चेतसा ॥ ४७ ॥

अन्वयः—रुक्मिणी वार योग्ये वासरे तु सा धर्म वश्येन चेतसा आयातं अपि नर ईश्वरं नो अपश्यत् ॥ ४७ ॥

अर्थः—रुक्मिणीना वाराने दिवसे तो ते राजकुमारी धर्मने वश थयेलां मनथी (पोताने त्यां) आवेला राजानी सामुं पण जोती नही.

तादृग्धर्मकथालापकलापकलयैव सा । तां क्षिपां क्षिपयत्येषा प्रत्याख्यानविधायिनी ॥ ४८ ॥

अन्वयः—प्रत्याख्यान विधायिनी सा तादृक् धर्म कथा आलाप कलाप कलया एव तां क्षिपां क्षिपयति. ॥ ४८ ॥

अर्थः—शीलव्रतना पच्चखाण करनारी ते राजकुमारी तेवा प्रकारनी धार्मिक कथाओनां कथनोनां समूहनी कलाथीज ते रात्रिने निर्गमन करती हती. ॥ ४८ ॥

सपत्न्यामपि वात्सल्यं सतीत्वमपि तादृशम् । तां प्रति क्ष्मापतिर्ध्यायन्मुहुः पुलकितोऽभवत् ॥ ४९ ॥

अन्वयः—क्ष्मापतिः तांप्रति सपत्न्यां अपि वात्सल्यं तादृशं सतीत्वं अपि ध्यायन् मुहुः पुलकितः अभवत्. ॥ ४९ ॥

अर्थः—राजा ते राजकुमारीनुं शोक्यनेविषे पण वत्सलपणुं, तथा तेवीरीतनुं सतीपणुं पण विचारतोथको वारंवार रोमांचित थतो हतो.

प्रभावभाजनं भान्ति स्त्रियश्चारित्रदेवताः । वैमनस्यमहो तासां यः करोति स पातकी ॥ ५० ॥

अन्वयः—चारित्र देवताः स्त्रियः प्रभाव भाजनं भांति, अहो ! यः तासां वैमनस्यं करोति सः पातकी. ॥ ५० ॥

अर्थः—सदाचाररूपी दैविक शक्तिवाळी स्त्रीओ महिमाना पात्र सरखी होय छे, माटे अहो ! तेओप्रते जे बेदिली राखे छे, तेने

पापी (माणस जाणवो.) ॥ ५० ॥

**वयं मुदे तदेतस्याः कुर्मः कर्मेति भूपतिः। रुक्मिण्या अप्यदाद्वारमेकान्तरमनन्तरम् ॥ ५१ ॥**

अन्वयः—तत् वयं एतस्याः मुदे कर्म कुर्मः, इति भूपतिः रुक्मिण्याः अपि अनंतरं एकांतरं वारं अदात्. ॥ ५१ ॥

अर्थः—माटे मारे पण तेणीने आनंद उपजावनारुं कार्य करवुं, एम विचारी राजा रुक्मिणीने पण अंतररहित एकांतरे वारो आपवा लाग्यो. ॥ ५१ ॥

**ततः सतीनां मुख्येयं पुण्यलब्धानमन्यत। प्रदत्तधर्मावसरान् रुक्मिणीवारवासरान् ॥ ५२ ॥**

अन्वयः–ततः सतीनां मुख्या इयं रुक्मिणी वार वासरान् पुण्य लब्धान् प्रदत्त धर्म अवसरान् अमन्यत. ॥ ५२ ॥

अर्थः—पछी सतीओमां शिरोमणिसरखी एवी ते राजकुमारी रुक्मिणीना वाराना दिवसोने पुण्यथी प्राप्त थयेला धार्मिक कार्योनो अवकाश आपनारा मानवा लागी. ॥ ५२ ॥

**धन्यंमन्या पुनर्मेने पतिप्रीत्या पतिव्रता। घटितान्पुण्यसारेण स्ववारदिवसानसौ ॥ ५३ ॥**

अन्वयः—पुनः पति प्रीत्या धन्यंमन्या असौ पतिव्रता स्ववार दिवसान् पुण्य सारेण घटितान् मेने. ॥ ५३ ॥

अर्थः—वळी (पोताना) स्वामीना प्रेमथी (पोताने) धन्य मानती एवी ते पतिव्रता राजकुमारी पोताना वाराना दिवसोने पुण्यना सारथी घडेला मानवा लागी. ॥ ५३ ॥

निजवारेऽपि राजेन्द्रो राजकार्यक्षणेषु सा । आत्मानं सफलीचक्रे सुकृतस्यैव केलिभिः ॥ ५४ ॥

अन्वयः—निज वारे अपि राजेंद्रोः राज कार्य क्षणेषु सा सुकृतस्य केलिभिः एव आत्मानं सफलीचक्रे. ॥ ५४ ॥

अर्थः—पोताना वाराने दिवसे पण ते राजेंद्रना राजकार्योने अवसरे ते राजकुमारी पुण्यसंबंधि लीलाओवडेज पोताना आत्माने सफल करती हती. ॥ ५४ ॥

सा धर्मरुचिना तेन पूर्णोपकरणव्रजा । त्रिकालं जनयामास पूजनानि जिनेशितुः ॥ ५५ ॥

अन्वयः—तेन धर्मरुचिना पूर्ण उपकरण व्रजा सा त्रिकालं जिन ईशितुः पूजनानि जनयामास. ॥ ५५ ॥

अर्थः—(वळी) ते धर्मरुचिए पूरां पाडेलां साधनोनां समूहवाळी ते राजकन्या त्रिकाळ जिनेश्वरप्रभुनुं पूजन करती हती. ॥५५॥

जिनाधिनाथशेषाभिरेव द्रव्यैः सुगन्धिभिः । सा क्लृप्तसुकृताभोगानङ्गभोगानपि व्यधात् ॥ ५६ ॥

अन्वयः—जिन अधिनाथ शेषाभिः एव सुगंधिभिः द्रव्यैः सा भोगान् अपि क्लृप्त सुकृत आभोगान् व्यधात्. ॥ ५६ ॥

अर्थः—जिनेश्वर प्रभुनी पूजाना शेषरूपज सुगंधि द्रव्योवडे ते राजकुमारी पोताना भोगविलासोने पण पुण्योना विस्तारवाळा करती हती. ॥ ५६ ॥

यद्वस्तु कल्प्यमाहार्यं यतीन्द्रेषु वितीर्य तत् । आजह्रे च विजह्रे च पथा दृक्शुचिनैव सा ॥ ५७ ॥

अन्वयः—च यत् आहार्य वस्तु कल्प्यं, तत् यतींद्रेषु वितीर्य सा आजह्रे, च दृक् शुचिना एव पथा विजह्रे. ॥ ५७ ॥

अर्थः—वळी जे भोजनना पदार्थ (मुनिने) कल्पे एवा होय, ते मुनिराजोने व्होरावीने ते भोजन करती हती, तथा दृष्टिथी जोयेला निर्दोष मार्गमांज चालती हती. ॥ ५७ ॥

**सप्तक्षेत्रीमहादानवितानविधसैरसौ । धनैरन्यानि कार्याणि चकार न चकार वा ॥ ५८ ॥**

अन्वयः—सप्त क्षेत्री महादान वितान विधसैः धनैः असौ अन्यानि कार्याणि चकार, वा न चकार. ॥ ५८ ॥

अर्थः—साते क्षेत्रोमां अनुपम दान आपतां बाकी वधेलां धनवडे ते राजकुमारी बीजां कार्यो करती हती, अथवा न करती हती

**इति शीले च दाने च भवन्ती सा निदर्शनम् । दूरतोऽपि वयस्येव मुक्त्यालिङ्गितुमैच्छयत ॥ ५९ ॥**

अन्वयः—इति शीले च दाने च निदर्शनं भवंती सा दूरतः अपि वयस्या इव मुक्त्या आलिंगितुं ऐच्छयत. ॥ ५९ ॥

अर्थः—एरीते शीलपालनमां तथा दान आपवामां दृष्टांतरूप थती एवी ते राजकुमारीने दूरथी पण सखीनीपेठे मुक्ति आलिंगन आपवाने इच्छती हती, ॥ ५९ ॥

**तपोभिः शोषितस्वात्मा तुर्यषष्ठाष्टमादिभिः । तेषु धर्मेषु बन्धुत्वं तस्या धर्मरुचिर्दधौ ॥ ६० ॥**

अन्वयः—तुर्य षष्ठ अष्टम आदिभिः तपोभिः शोषित स्वात्मा, धर्मरुचिः तेषु धर्मेषु तस्याः बंधुत्वं दधौ. ॥ ६० ॥

अर्थः—उपवास, छठ, तथा अठ्ठम आदिकनी तपस्याओवडे शोषी नाखेल छे, पोतानो आत्मा जेणे एवो ते धर्मरुचि मंत्री ते ते धर्मकार्योमां तेणीने बंधुनीपेठे सहाय आपतो हतो. ॥ ६० ॥

**तया पितेव भ्रातेव स मेने मनसा शुचिः । सदामन्यत तेनापि मातेव भगिनीव सा ॥ ६१ ॥**

अन्वयः—मनसा शुचिः सः तया पिता इव, भ्राता इव मेने, तेन अपि सा सदा माता इव भगिनी इव अमन्यत. ॥ ६१ ॥

अर्थः—मनथी पवित्र एवा ते धर्मरुचिने ते राजकुमारी पितानी पेठे तथा भाइनी पेठे मानती हती, अने धर्मरुचि पण तेणीने हमेशां मातानी पेठे, तथा बेहेननी पेठे मानतो हतो. ॥ ६१ ॥

**स तस्यास्तस्य सा धर्मक्रियां पातुं प्रमादतः । दूरीबभूवतुर्नैव चिरकालं कदाचन ॥ ६२ ॥**

अन्वयः—सः तस्याः, सा तस्य धर्मक्रियां प्रमादतः पातुं कदाचन चिर कालं न एव दूरीबभूवतुः ॥ ६२ ॥

अर्थः—ते धर्मरुचि तेणीना, तथा ते राजकुमारी तेना, धर्मकार्य संबंधी प्रमादने निवारवा माटे कोइ पण समये ( तेओ बन्ने ) घणा समय सुधी दूर थताज नही. ॥ ६२ ॥

**इयं धर्मे धियं शुद्धामतीव दधती सती । स्ववारलुप्तये प्रेम रुक्मिण्यां पत्युरैहत ॥ ६३ ॥**

अन्वयः—धर्मे अतीव शुद्धां धियं दधती इयं सती स्व वार लुप्तये रुक्मिण्यां पत्युः प्रेम ऐहत. ॥ ६३ ॥

अर्थः—धर्ममां अत्यंत शुद्धबुद्धिने धारण करती एवी ते सती, पोताना वाराने भोगे पण रुक्मिणी प्रते (पोताना) स्वामीना प्रेमनी इच्छा करती हती. ॥ ६३ ॥

**रुक्मिणी तु सदा दध्यौ कदा वध्या सपत्न्यसौ । दोषं दत्वानृतमपि च्छलादपि बलादपि ॥६४॥**

अन्वयः—रुक्मिणी तु सदा दध्यौ, छलात् अपि, बलात् अपि, अनृतं अपि दोषं दत्वा, कदा असौ सपत्नी वध्या ? ॥६४॥

अर्थः—रुक्मिणी तो हमेशां एम विचारती हती के, छलथी पण, अथवा बलथी पण जूठो आरोप मूकीने पण क्यारे आ शोक्यने हुं मारी नाखुं ? ॥ ६४ ॥

**सा नित्यमित्यसद्ध्यानद्दासीोरासीनमत्सरा । तत्कलङ्कच्छलं कर्तुमूचे धिगसतां धियम् ॥ ६५ ॥**

अन्वयः—इति नित्यं असध्ध्याना, आसीन मत्सरा सा तत्कलंक च्छलं कर्तुं दासीः ऊचे, असतां धियं धिक्. ॥ ६५ ॥

अर्थः—एरीते हमेशां दुर्ध्यानवाळी, तथा अदेखाइने धारण करती ते रुक्मिणी ते राजकुमारीपर कलंक चडाववानो प्रपंच करवामाटे (पोतानी) दासीओने कहेती हती, (अरेरे!) दुर्जनोनी बुद्धिने धिक्कार छे! ॥ ६५ ॥

**रुक्मिणीपार्श्वगोऽन्येद्युर्भूपालो जालवर्त्मना । दृष्ट्वा धर्मरुचिं चैत्यपरिपाटीविहारिणम् ॥६६॥**

**उवाच व्यक्तरोमाञ्चो धर्माधानेऽस्ति कोऽपि न । अस्य पट्टमहादेवीधर्मबन्धोः समः पुमान् ॥ ६७ ॥**

अन्वयः–अन्येद्युः रुक्मिणी पार्श्वगः भूपालः जाल वर्त्मना धर्मरुचिं चैत्य परिपाटी विहारिणं दृष्ट्वा, ॥ ६६ ॥ व्यक्त रोमांचः उवाच पट्ट महादेवी धर्म बंधोः अस्य समः धर्म आधाने कः अपि पुमान् न अस्ति. ॥ ६७ ॥ युग्मं ॥

अर्थः—एक दिवसे रुक्मिणीनी पासे बेठेला राजाए झरुखामांथी धर्मरुचिने जिनमंदिरोनां दर्शनमाटे चाल्यो जतो जोइने, ॥ ६६ ॥ प्रगटपणे रोमांचित थइ कह्युं के, पट्टराणीनो धर्मबंधु एवो जे आ धर्मरुचि, तेना सरखो धर्मना कार्यो करवामां कोइ-

पण (बीजो) पुरुष (जोवामां) आवतो नथी. ॥ ६७ ॥ युग्मं ॥

**इत्युक्तिभाजि निर्व्याजं राजनि व्याजनिश्चला । मुखं सखीनां वीक्ष्याधोमुखास्मयत रुक्मिणी ॥६८॥**

अन्वयः—इति राजनि निर्व्याजं उक्ति भाजि व्याज निश्चला रुक्मिणी सखीनां मुखं वीक्ष्य अधोमुखा अस्मयत् . ॥ ६८ ॥

अर्थः—एरीते राजाए निष्कपटपणे बोलते छते, कपट क्रियामां निश्चल एवी ते रुक्मिणी (पोतानी) सखीओना मुख तरफ जोइने (पोते) नीचुं मुख राखी हसवा लागी. ॥ ६८ ॥

**तासां मुखे विकारं स वीक्ष्य व्याचष्ट विस्मितः । किं व्यलोकि क्वचिद्धर्मलोपो धर्मरुचेरपि ॥ ६९ ॥**

अन्वयः—तासां मुखे विकारं वीक्ष्य विस्मितः सः व्याचष्ट, किं धर्मरुचेः अपि क्वचित् धर्मलोपः व्यलोकि ? ॥ ६९ ॥

अर्थः—तेओना मुखपर विकृतपणुं जोइने आश्चर्य पामेलो ते राजा बोल्यो के, शुं धर्मरुचिनो पण क्यांय धर्मविलोप (तमारा) जोवामां आव्यो छे ? ॥ ६९ ॥

**ततः सस्मितमैक्षन्त तद्वयस्याः परस्परम् । किंचिद्विवक्षव इव क्षणकम्प्रोत्तराधराः ॥ ७ ॥**

अन्वयः—ततः किंचित् विवक्षवः इव क्षण कंप्र उत्तर अधराः तद्वयस्याः परस्परं सस्मितं ऐक्षंत. ॥ ७० ॥

अर्थः—पछी जाणे कंइक बोलवानी इच्छा करती होय नही ! तेम क्षणवार कंपता मनोहर होठवाळी तेणीनी (ते) सखीओ हास्य करतीथकी एक बीजा सामे जोवा लागी. ॥ ७० ॥

एका तासु जगौ ज्ञाता धर्मे धर्मरुचे रुचिः । यत्ते पट्टमहादेवीं ख्यात्येष भगिनीं जने ॥ ७१ ॥

अन्वयः—तासु एका जगौ, धर्मरुचेः धर्मे रुचिः ज्ञाता, यत् एषः पट्ट महादेवीं जने भगिनीं ख्याति. ॥ ७१ ॥

अर्थः—(पछी) ते सखीओमांथी एक बोली के, धर्मरुचिनी धर्मनी अंदर जे रुचि (श्रद्धा) छे, तेने अमो ( सारीरीते ) जाणीये छीये, केमके ते पट्टराणीने जगतमां बहेन कही बोलावे छे! ॥ ७१ ॥

विजने त्विति जल्पन्ती रुक्मिण्या भङ्गुरभ्रुवा । भ्रमयन्त्या दृशौ मौलिप्रकम्पेन न्यषेधि सा ॥७२॥

अन्वयः—तु इति जल्पंती सा रुक्मिण्या विजने भंगुर भ्रुवा, दृशौ भ्रमयंत्या मौलि प्रकंपेन न्यषेधि. ॥ ७२ ॥

अर्थः—पछी एम बोलती एवी ते सखीने रुक्मिणीए एकांतमां भृकुटी चडावीने, तथा आंखो भमावीने, अने मस्तक धुणावीने (बोलती) अटकावी. ॥ ७२ ॥

अर्धोक्त्यैतदभिप्रायं जानन्राजा तु संजगौ ।धिक्तत्र दोषप्रथनं धिगर्के लक्ष्मभाषणम् ॥ ७३ ॥

अन्वयः—तु अर्ध उक्त्या एतद् अभिप्रायं जानन् राजा संजगौ, धिक् धिक् तत्र दोष प्रथनं अर्के लक्ष्म भाषणं. ॥ ७३ ॥

अर्थः—पछी अर्धा वचनथीज तेणीना बोलवानो अभिप्राय जाणीने राजा बोल्यो के, (अरे!) धिकार छे! धिकार छे! ते धर्मरुचिमां दोष बोलवो, तो सूर्यमां लांछन बोलवा जेवुं छे. ॥ ७३ ॥

सतां गुणोऽपि दोषत्वं प्रयात्यसहने जने। सुधारुचेरपि रुचिश्चक्राह्वे दहनायते ॥ ७४ ॥

अन्वयः–सतां गुणः अपि असहने जने दोषत्वं प्रयाति, सुधा रुचेः रुचिः अपि चक्राह्वे दहनायते. ॥ ७४ ॥

अर्थः—सज्जनोनो गुण पण ईर्ष्यालु लोकोमां दोषपणाने प्राप्त थाय छे, (केमके) चंद्रनी (शीतल) चांदनी पण चक्रवाकने अग्निसरखी संतापकारक थाय छे. ॥ ७४ ॥

**अथाह रुक्मिणी कोपकपिशोद्भ्रान्तलोचना । सत्या यो यत्र लीनः स क्षीणस्तत्रेति लोकवाक् ॥७५॥**

अन्वयः–अथ कोप कपिश उद्भ्रांत लोचना रुक्मिणी आह, यो यत्र लीनः, सः तत्र क्षीणः, इति लोक वाक् सत्या. ॥७५॥

अर्थः—पछी क्रोधथी लाल तथा चंचल आंखोवाळी ते रुक्मिणी बोली के, "जे जेमां आसक्त होय, ते तेमांज मरी फीटे छे" ए रीतनी लोकवाणी सत्यज छे. ॥ ७५ ॥

**असतां हन्त दोषोऽपि गुणः स्यात्तत्प्रिये जने । अन्धकारोऽपि घूके हि वहत्यालोककारिताम् ॥ ७६ ॥**

अन्वयः–हंत असतां दोषः अपि तत्प्रिये जने गुणः स्यात्, हि अंधकारः अपि घूके आलोक कारितां वहति. ॥ ७६ ॥

अर्थः—अरेरे! दुर्जनोनो दोष पण तेना प्रेमी माणसमां गुणरूपे परिणमे छे. केमके अंधकार पण घूवडपासे प्रकाश करनार-तरीके खपे छे. ॥ ७६ ॥

**यदुक्तमनया तच्चेत्प्रत्यक्षं दर्शयामि ते । प्रत्येषि न तथापीष्टरागलुप्तविवेकदृक् ॥ ७७ ॥**

अन्वयः—अनया यत् उक्तं, तत् चेत् ते प्रत्यक्षं दर्शयामि, तथापि, इष्ट राग लुप्त विवेक दृक् न प्रत्येषि. ॥ ७७ ॥

अर्थः–आ मारी सखीए जे (कंई) कह्युं छे, ते आपने कदाच प्रत्यक्ष देखाडुं तोपण ते प्राणप्रिय राजपुत्रीना रागे आपना विवेक चक्षुपर पाटा बांधेला होवाथी, आपने खातरी थाय नही. ॥ ७७ ॥

**युक्तियत्र घटामेति तत्र प्रत्येति कः सुधीः । खे वीक्ष्य पुष्पितां वल्लीमिन्द्रजालं न वक्ति कः ॥७८॥**

**तथापि तत्र प्रत्यक्षीकुरुषे यदि दूषणम् । तद्विचार्य किमप्युच्चै रचयिष्यामि तौ प्रति ॥ ७९ ॥**

**एवमुक्तवति क्षोणिसुश्रोणिहृदयाधिपे । सायं तच्चरितं तेऽद्य दर्शयामीति सावदत् ॥८०॥त्रिभिर्विशेषकं.**

अन्वयः—यत्र युक्तिः घटां एति, तत्र कः सुधीः प्रत्येति? खे पुष्पितां वल्लीं वीक्ष्य कः इंद्र जालं न वक्ति? ॥ ७८ ॥ तथापि यदि तत्र दूषण प्रत्यक्षी कुरुषे, तत् विचार्य तौ प्रति किं अपि उच्चैः रचयिष्यामि, ॥ ७९ ॥ एवं क्षोणि सुश्रोणि हृदय अधिपे उक्तवति, अद्य सायं तत् चरित्रं ते दर्शयामि, इति सा अवदत्. ॥ ८० ॥ त्रिभिर्विशेषकं ॥

अर्थः–ज्यां (जूठी) बनावटी गोठवण करवामां आवे, तेमां कयो उत्तम बुद्धिवाळो माणस प्रतीति राखे? केमके आकाशमां प्रफुल्लित थयेली वेलडीने जोइने कोण तेने इंद्रजाळ न कहे? ॥ ७८ ॥ तोपण जो ते धर्मरुचिनुं दूषण मने (तुं) प्रत्यक्ष देखाडीश, तो तेमाटे विचार करीने तेओ बन्नेने कंइक म्होटो दंड करीश, ॥ ७९ ॥ ए रीते पृथ्वीरूपी स्त्रीना स्वामी, एवा ते राजाए कहेवाथी आजे संध्याकाळे तेमनुं चरित्र आपने देखाडीश, एम ते रुक्मिणीए (राजाने) कह्युं. ॥ ८० ॥ त्रिभिर्विशेषकं ॥

**इतश्च पश्चिमामौलिमणीभूते विभाविभौ । भेजे पट्टमहादेवी जिनपूजनसज्जताम् ॥ ८१ ॥**

अन्वयः—इतश्च विभा विभौ पश्चिमा मौलि मणीभूते पट्टमहादेवी जिन पूजन सज्जतां भेजे. ॥ ८१ ॥

अर्थः—एवामां सूर्य पश्चिम दिशाना मुकुटमां मणिरूप होते छते ( अर्थात् सूर्य अस्त पामते छते ) ते पट्टराणी जिनेश्वरप्रभुनी पूजामाटे तैयारी करवा लागी. ॥ ८१ ॥

**सा धर्मरुचिसंक्लृप्तसर्वोपकरणक्रमाम् । पूजां तृतीयकालार्हामर्हति व्यतनोत्ततः ॥ ८२ ॥**

अन्वयः—ततः सा धर्मरुचि संक्लृप्त सर्व उपकरण क्रमां, तृतीय काल अर्हां अर्हति पूजां व्यतनोत्. ॥ ८२ ॥

अर्थः—पछी ते पट्टराणी, धर्मरुचिए तैयार करेली छे सर्व सामग्रीनी गोठवण जेमां, एवी त्रीजे काळे एटले संध्याकाळे करवानी श्रीअरिहंत प्रभुनी पूजा करवा लागी. ॥ ८२ ॥

**पूजां समाप्य तीर्थेशशेषाकुसुममालया । धम्मिल्ले धर्मरुचिना साथ मूर्धन्यबन्धयत् ॥ ८३ ॥**

अन्वयः—अथ पूजां समाप्य तीर्थेश शेषा कुसुम मालया धर्मरुचिना सा मूर्धनि धम्मिल्ले अबंधयत्. ॥ ८३ ॥

अर्थः—पछी पूजा समाप्त करीने, जिनेश्वरप्रभुनी शेषारूप पुष्पोनी मालाने धर्मरुचिने हाथे ते पट्टराणी (पोताना) मस्तकपरना अंबोडामां बंधाववा लागी. ॥ ८३ ॥

**देवीमूर्धनि धम्मिल्लवैचित्र्यं रचयन्नयम् । सायं नृपाय रुक्मिण्या जालद्वारेण दर्शितः ॥ ८४ ॥**

अन्वयः—देवी मूर्धनि धम्मिल्ल वैचित्र्यं रचयन् अयं, सायं रुक्मिण्या जाल द्वारेण नृपाय दर्शितः ॥ ८४ ॥

अर्थः—(एरीते) ते पट्टराणीना मस्तकपर अंबोडानी शोभा करता एवा ते धर्मरुचिने संध्याकाळे रुक्मिणीए जाळीना छिद्रोमांथी राजाने देखाड्यो. ॥ ८४ ॥

**चण्डेऽथ कोपचण्डाले विवेकवृषखण्डिनि । रक्तच्छटाभिरिव दृग्युगलं पाटलं दधत् ॥ ८५ ॥**

**नृपः कृपाणीमाकृष्य प्रविश्यान्तर्निकेतनम् । धम्मिल्लमच्छिनद्देव्यास्तौ च धर्मरुचेः करौ ॥ ८६ ॥**

अन्वयः–अथ चंडे कोप चंडाले विवेक वृषखंडिनि, रक्त च्छटाभिः इव पाटलं दृग् युगलं दधत्, ॥८५॥ नृपः कृपाणीं आकृष्य अंतः निकेतनं प्रविश्य देव्याः धम्मिल्लं अच्छिनत्, च धर्मरुचेः तौ करौ, ॥ ८६ ॥ युग्मं ॥

अर्थः—पछी भयंकर कोपरूपी चांडाले विवेकरूपी धर्मनो विनाश करवाथी, जाणे रुधिरना छटकावथी लाल थयेली बन्ने आंखोने धारण करता ॥ ८५ ॥ एवा ते राजाए कटारी कहाडीने, ते कलावतीना मेहेलमां जइ तेणीनो चोटलो कापी नाख्यो, तथा धर्मरुचिना ते बन्ने हाथो पण कापी नाख्या. ॥ ८६ ॥ युग्मं ॥

**रे रे सतीत्वधर्मित्वच्छद्मना मम सद्मनि । धिगकारि विकारोऽयमिति जल्पंश्च निर्ययौ ॥ ८७ ॥**

अन्वयः—च रे! रे! सतीत्व धर्मित्व च्छद्मना मम सद्मनि अयं विकारः अकारि! धिक् इति जल्पन् निर्ययौ. ॥ ८७ ॥

अर्थः—पछी अरे रे! सतीपणाना तथा धर्मीपणाना ढोंगथी मारा घरमां (तमोए) आवो विकार कर्यो! धिक्कार छे (तमोने)! एम बोलतो ते चंद्रोदर राजा (त्यांथी बहार) निकळ्यो. ॥ ८७ ॥

**कोपाग्निं चाटुपीयूषै रुक्मिणी शमयन्त्यथ । निनाय नायकं तं स्वे सद्मनि च्छद्मनिर्वृता ॥ ८८ ॥**

अन्वयः—अथ च्छद्म निर्वृता रुक्मिणी चाटु पीयूषैः कोप अग्निं शमयंती तं नायकं स्वे सद्मनि निनाय. ॥ ८८ ॥

अर्थः—पछी (पोतानी ते) कपटक्रियाने पार पहोंचेली, एवी ते रुक्मिणी मीठां वचनोरूपी अमृतथी (राजाना) क्रोधरूपी अग्निने शांत करतीथकी तेने पोताना मेहेलमां तेडी गइ. ॥ ८८ ॥

**ततः कलावती दध्यौ दुःखनीरौघदीर्घिका । धिग्धिक्पुरा कृतं कर्म कथं परिणतिं गतम् ॥ ८९ ॥**

अन्वयः—ततः दुःख नीर ओघ दीर्घिका कलावती दध्यौ, धिक् धिक् पुराकृतं कर्म कथं परिणतिं गतं ? ॥ ८९ ॥

अर्थः—पछी दुःखरूपी जलना समूहनी वावडीसरखी ते कलावती विचारवा लागी के, अरे ! धिक्कार छे ! धिक्कार छे ! पूर्वे करेलुं (मारुं) कर्म केम परिपाकने प्राप्त थयुं ? ॥ ८९ ॥

**तन्मे मुदे शिरःकेशा यच्छिन्ना दुरितद्युतः । व्रतस्य मुक्तिद्वारस्य पिधानवृतितां गताः ॥ ९० ॥**

अन्वयः—दुरित द्युतः, मुक्ति द्वारस्य व्रतस्य पिधान वृतितां गताः शिरः केशाः यत् छिन्नाः, तत् मे मुदे. ॥ ९० ॥

अर्थः—पापोने पोषनारा, तथा मोक्षना द्वाररूप चारित्र ग्रहण करवामां अटकायत करनारा (मारा) मस्तकना केशो जे कपाया, तेथी तो मने आनंद थाय छे. ॥ ९० ॥

**जिनांह्रिनखविद्योतविमलं मलिनीकृतम् । कुलं मृषाकलङ्केन यद्दुःखाय तदेव मे ॥ ९१ ॥**

अन्वयः-जिन अंह्रि नख विद्योत विमलं कुलं मृषा कलंकेन यत् मलिनीकृतं तत् एव मे दुःखाय. ॥ ९१ ॥

अर्थः-(परंतु) जिनेश्वर प्रभुना चरणोना नखनी कांतिसरखुं निर्मल एवुं (मारुं) कुल जुठा कलंकथी जे मलीन थयुं, तेज मने दुःख आपे छे. ॥ ९१ ॥

**हा हा धिग्धग्जिनाधीशपदद्वन्द्वार्चनोचितौ । धर्मामृतसरोम्भोजरुचौ धर्मरुचेः करौ ॥ ९२ ॥**
**तस्य शासनदेवीनां पश्यन्तीनामपि क्षणात् । उद्दामसामर्थ्यभृता दुःकर्मकरिणा हृतौ ॥ ९३ ॥युग्मम्॥**

अन्वयः-हा! हा! धिक् धिक्! जिन अधीश पद द्वंद्व अर्चन उचितौ, धर्म अमृत सरः अंभोज रुचौ तस्य धर्मरुचेः करौ, शासन देवीनां पश्यंतीनां अपि क्षणात् उद्दाम सामर्थ्यभृता दुःकर्म करिणा हृतौ, ! ॥ ९२ ॥ ९३ ॥ युग्मं ॥

अर्थः-अरेरे! धिकार छे! धिकार छे! जिनेश्वरप्रभुना बन्ने चरणोनुं पूजन करवाने लायक, तथा धर्मरूपी अमृतना सरोवरमां कमल सरखी शोभावाळा, एवा ते धर्मरुचिना बन्ने हाथो, शासनदेवीओना देखतां छतां पण क्षणवारमां अत्यंत बलवान एवा दुष्कर्मरूपी हाथीए उखेडी नाख्या! ॥ ९२ ॥ ९३ ॥ युग्मं ॥

**नेरेन्द्रोऽपि कर्मसु बलीत्यशोचन्करविच्युतिम् । चञ्चत्पञ्चनमस्कारध्यानो धर्मरुचिस्त्वभूत् ॥ ९४ ॥**

अन्वयः—कर्मसु इन्द्रः अपि बली न, इति कर विच्युतिं अशोचन् धर्मरुचिः तु चंचत् पंच नमस्कार ध्यानः अभूत्. ॥ ९४ ॥

अर्थः—कर्मोपासे इन्द्र पण बलवान थइ शकतो नथी, एम विचारी ( पोताना ) हाथना विनाशनो शोक नही करतां, धर्मरुचि

तो महिमावंत पंच परमेष्ठिना नमस्कारनुं ध्यान धरवा लाग्यो. ॥ ९४ ॥

**गृहगर्भेऽतिपुष्टानि दुःखश्यामैर्मुखांशुभिः । तमीतमांसि पुष्णन्ती सा तु तापवती सती ॥ ९५ ॥**

**किं करोमीति चिन्तार्ता पुरोऽकस्मात्परिस्फुरत् । मार्तण्डमण्डलमिव द्युतिमण्डलमैक्षत ॥९६॥ युग्मम् ॥**

अन्वयः—सा तापवती सती तु गृह गर्भे अति पुष्टानि तमी तमांसि दुःख श्यामैः मुख अंशुभिः पुष्णंती, ॥ ९५ ॥ किं करोमि? इति चिंता आर्ता पुरः अकस्मात् मार्तंड मंडलं इव परिस्फुरत् द्युति मंडलं ऐक्षत. ॥ ९६ ॥ युग्मं ॥

अर्थ —(पछी) ते खेद पामती कलावती सती तो मेहेलना ओरडानी अंदर, अति जामेला रात्रिना अंधकारने, दुःखवडे श्याम थयेला (पोताना) मुखना किरणोवडे वधारती थकी, ॥ ९५ ॥ (हवे) शुं करुं? एम चिंताथी दुःख पामती हती, (एवामां तेणीए पोतानी) आगळ अकस्मात् सूर्यना मंडलनी पेठे विस्तार पामतो कांतिनो समूह जोयो. ॥ ९६ ॥ युग्मं ॥

**किमेतदितिसंभ्रान्तां नृपकान्तामथावदत् । प्रभागर्भगता कापि स्त्री दिव्याकारधारिणी ॥ ९७ ॥**

अन्वयः—अथ एतत् किं? इति संभ्रांतां नृप कांतां प्रभा गर्भ गता, दिव्य आकार धारिणी का अपि स्त्री अवदत्. ॥ ९७ ॥

अर्थ —पछी आ शुं ? एम संशयमां पडेली एवी ते राणीने तेजनी अंदर रहेली, तथा मनोहर आकृतिने धारण करनारी कोइक स्त्रीए कह्युं के, ॥ ९७ ॥

**नाम्ना पद्मावतीं तीर्थेशितुः शासनदेवताम् । तद्भक्तभक्तां जानीहि मां हिमांशुसमानने ॥ ९८ ॥**

अन्वयः-(हे) हिमांशु सम आनने ! तीर्थ ईशितुः शासन देवतां, तद् भक्त भक्तां मां पद्मावतीं नाम्ना जानीहि ? ॥ ९८ ॥

अर्थः—हे चंद्रसरखा मुखवाळी कलावती ! तीर्थंकर प्रभुना शासननुं रक्षण करनारी तथा तेमना भक्तोनी भक्ति करनारी, एवी मने (तारे) पद्मावती नामनी देवी जाणवी. ॥ ९८ ॥

**ये जिनैकरसास्तेषां पुण्यश्रीरिव संनिधिम् । न मुञ्चे दुरितानीव व्यसनानि निरासितुम् ॥ ९९ ॥**

अन्वयः—पुण्य श्रीः दुरितानि इव, ये जिन एक रसाः तेषां व्यसनानि निरासितुं संनिधिं न मुंचे. ॥ ९९ ॥

अर्थः—पुण्योनी लक्ष्मी जेम पापोनो नाश करे छे, तेम जेओ फक्त जिनेश्वरप्रभुनी (भक्तिना) रसवाळा छे, तेओनां कष्टो दूर करवाने हुं नजीकपणुं छोडती नथी, (अर्थात् तेओने हुं तुरत सहाय करुं छुं.) ॥ ९९ ॥

**मयि सत्यां तवेदृक्स्यान्निबिडं न विडम्बनम् । मया तु सोढमिच्छन्त्या शासनस्य प्रभावनाम् ॥२१००॥**

अन्वयः—मयि सत्यां तव ईदृक् निबिडं विडंबनं न स्यात्, तु मया शासनस्य प्रभावानां इच्छंत्या सोढं. ॥ २१०० ॥

अर्थः—मारी हयाती छतां तने आवी भयंकर विडंबना न थवी जोइये, परंतु जिनशासननी प्रभावना करवानी इच्छाथी में आ (सघळुं) सहन कर्युं छे. ॥ २१०० ॥

**धर्मप्रभावनाम्भोभिः कलङ्कः पङ्कवत्तव । इदानीं क्षालनीयोऽयमप्रक्षालितनिर्मले ॥ १ ॥**

अन्वयः—(हे) अप्रक्षालित निर्मले! इदानीं अयं तव कलंकः धर्म प्रभावना अंभोभिः पंकवत् क्षालनीयः. ॥ १ ॥

अर्थः—प्रक्षालन कर्याविना पण निर्मल, एवी हे कलावती! हमणाज आ तारां कलंकने धर्मनी प्रभावनारूपी जलवडे कादवनी पेठे धोइने साफ करी आपीश. ॥ १ ॥

**तस्या हृत्तापमित्युक्त्वा हृत्वा देवी तिरोऽभवत् । भूमेर्ग्रीष्मजमूष्माणं वृष्ट्येव जलदावलिः ॥ २ ॥**

अन्वयः—जलद आवलिः वृष्ट्या ग्रीष्मजं भूमेः ऊष्माणं इव, इति उक्त्वा तस्याः हृत् तापं हृत्वा देवी तिरः अभवत्. ॥ २ ॥

अर्थः—मेघनी श्रेणि वृष्टिवडे उनाळाथी उत्पन्न थयेली गरमीने जेम दूर करे छे, तेम ए रीते कहीने तेणीना हृदयना तापने दूर करीने ते देवी अदृश्य थइ. ॥ २ ॥

**प्रतिरोमभ्रमत्तप्ततर्कुस्तोमविजित्वरी । अर्तिराकस्मिकी काचिदितश्चाभूदिलाविभोः ॥ ३ ॥**

अन्वयः—इतः च प्रतिरोम भ्रमत् तप्त तर्कु स्तोम विजित्वरी, इला विभोः काचित् आकस्मिकी अर्तिः अभूत्. ॥ ३ ॥

अर्थः—एवामां रोमेरोमे फरती तपावेली (लोखंडनी) ताकर्डीना समूहने पण जीतनारी, एवी राजाना (शरीरमां) कोइक अचानक वेदना उत्पन्न थइ ॥ ३ ॥

**पराक्रमैकशक्रोऽयं बाढं संक्रन्दनीभवन् । स्वं जीवितं तयाप्यर्त्या मेने दुश्च्यवनं नृपः ॥ ४ ॥**

अन्वयः—पराक्रम एक शक्रः अपि तया अर्त्या बाढं संक्रंदनी भवन् अयं नृपः स्वं जीवितं दुश्च्यवनं मेने ॥ ४ ॥

अर्थः—पराक्रमवडे करीने इंद्र सरखो होवा छतां पण ते वेदनाथी अत्यंत रडतो एवो ते चंद्रोदर राजा पोतानो जीव निकळी

जवानी क्रियाने मुश्केल मानवा लाग्यो. ॥ ४ ॥

**तस्यार्तोऽन्तर्विशन्तीभिर्व्यथ्यमान इवार्तिभिः । शब्दौघः कण्ठकूलानि कषन्वक्त्रेण निर्ययौ ॥ ५ ॥**

अन्वयः—अंतः विशंतीभिः अर्तिभिः व्यथ्यमानः इव तस्य आर्तः शब्द ओघः कंठ कूलानि कषन् वक्त्रेण निर्ययौ. ॥ ५ ॥

अर्थः—हृदयमां पेसती वेदनाओवडे जाणे व्याकुल थयो होय नही ! तेम ते राजाना आर्तनादनो समूह कंठरूपी किनाराने तोडीने मुखद्वारथी बहार निकळवा लाग्यो. ॥ ५ ॥

**स्वयं मुखेन प्रहितो राज्ञः शब्दः स दूतवत् । दुरौकसोऽपि सचिवानाह्वयत्प्रथितव्यथः ॥ ६ ॥**

अन्वयः—स्वयं मुखेन प्रहितः राज्ञः सः शब्दः दूतवत् प्रथित व्यथः दूर ओकसः अपि सचिवान् आह्वयत्. ॥ ६ ॥

अर्थः—पोताना मुखथी मोकलेलो राजानो ते शब्द दूतनीपेठे कष्टने विस्तारतोथको, दूर घरवाळा मंत्रिओने पण बोलावी लाग्यो.

**विदधुर्वैद्यकं वैद्या मन्त्रवादं च मान्त्रिकाः । यथा यथास्य पृथ्वीन्दोर्व्यथापुष्यत्तथा तथा ॥ ७ ॥**

अन्वयः—वैद्याः यथा यथा वैद्यकं, च मांत्रिकाः मंत्रवादं विदधुः, तथा तथा अस्य पृथ्वी इंदोः व्यथा अपुष्यत्. ॥ ७ ॥

अर्थः—वैद्यो जेम जेम औषधोनो उपचार करता गया, तथा मंत्रवादीओ जेम जेम मंत्रोनो उपचार करता गया, तेम तेम ते राजानी वेदना वृद्धि पामवा लागी. ॥ ७ ॥

**अद्वैतवादिवादैकजयालम्बनभूतया । आकुल्यभूदथ क्ष्मापव्यथया व्यथितो जनः ॥ ८ ॥**

अन्वयः—अथ अद्वैत वादि वाद एक जय आलंबन भूतया, क्ष्माप व्यथया व्यथितः जनः आकुली अभूत्. ॥ ८ ॥

अर्थः—पछी अद्वैत वादिना वादनाज एक विजयना आलंबनरूप थयेली एवी ते राजानी वेदनाथी दुःखी थयेला लोको व्याकुल थवा लाग्या. ॥ ८ ॥

**न शय्यायां न च क्ष्मायां न हिमैरहिमैर्न च । स न मृष्टान्न चामृष्टान्निर्वृतिं नृपतिर्ययौ ॥ ९ ॥**

अन्वयः—स नृपतिः न शय्यायां, च न क्ष्मायां, न हिमैः, च न अहिमैः, न मृष्टात्, च न अमृष्टात् निर्वृतिं ययौ. ॥ ९ ॥

अर्थः—ते राजा नही बिछानामां, के नही जमीनपर, नही ठंडा उपचारोथी, के नही गरम उपचारोथी, नही मर्दनथी, के नही अमर्दनथी सुख पाम्यो. ॥ ९ ॥

**जनैरसाध्ये रोगेऽस्मिन्दैवात्किंचन दैवतम् । ख्याति यद्यौषधं किंचित्तज्जीवति महीपतिः ॥ १० ॥**

**इत्यादिध्यायिनं पूर्वमपूर्वध्वनिना जनम् । सावधानं विधायाभूदेषाम्बरसरस्वती ॥ ११ ॥ युग्मम् ॥**

अन्वयः—जनैः असाध्ये अस्मिन् रोगे दैवात् यदि किंचन दैवतं किंचित् औषधं ख्याति, तत् महीपतिः जीवति, ॥ १० ॥ इत्यादि ध्यायिनं जनं पूर्वं अपूर्व ध्वनिना सावधानं विधाय एषा अंबर सरस्वती अभूत्. ॥ ११ ॥ युग्मं ॥

अर्थः—माणसोथी असाध्य एवा आ रोगमाटे दैवयोगे कदाच कोइ देवता कंइक औषध बतावे, तो राजा जीवे, ॥ १० ॥ इत्यादि विचारता एवा लोकोने प्रथम अलौकिक अवाजथी सावधान करीने नीचेमुजब आकाशवाणी थइ. ॥ ११ ॥ युग्मं ॥

**कस्याश्चन जिनस्वामिभक्तिकेतनचेतसः । सतीशतनमस्यायाः केशस्नपनवारिभिः ॥ १२ ॥**
**जिनार्चकस्य कस्यापि कुमारब्रह्मचारिणः । हस्तात्तैः स्नपयित्वास्तरुजं कुरुत भूभुजम् ॥ १३ ॥ युग्मम्॥**

अन्वयः—जिन स्वामि भक्ति केतन चेतसः, सती शत नमस्यायाः कस्याश्चन केश स्नपन वारिभिः, ॥ १२॥ जिन अर्चकस्य कुमार ब्रह्मचारिणः कस्य अपि हस्त आत्तैः भूभुजं स्नपयित्वा अस्त रुजं कुरुत ? ॥ १३ ॥ युग्मं ॥

अर्थः—जिनेश्वरप्रभु तथा पोताना स्वामिनी भक्तिना स्थानरूप हृदयवाळी, तथा सेंकडोगमे सतीओने नमवालायक, एवी कोइक स्त्रीना केशोना स्नाननु जल, ॥ १२ ॥ जिनपूजन करनार, तथा बालब्रह्मचारी, एवा कोइक पुरुषना हाथमां आपीने, ते जलवडे राजाने स्नान करावीने रोगरहित करो ? ॥ १३ ॥ युग्मं ॥

**श्रुत्वेति सचिवैः प्रीतैरानीतः पुरविश्रुतः । अर्हद्भक्तः सतीवर्गो गणश्च ब्रह्मचारिणाम् ॥ १४ ॥**

अन्वयः—इति श्रुत्वा प्रीतैः सचिवैः पुरविश्रुतः अर्हद् भक्तः सती वर्गः, च ब्रह्मचारिणां गणः आनीतः. ॥ १४ ॥

अर्थः—ते सांभळीने खुशीथयेला मंत्रिओ, नगरमां प्रसिद्ध पामेला, अने जिनेश्वरप्रभुनी भक्ति करनारा सतीओना समूहने, तथा ब्रह्मचारीओना टोळांने पण (त्यां) लाव्या. ॥ १४ ॥

**तस्मिन्कर्मणि राज्ञोऽथ कार्यमाणे क्रमेण तैः । प्रत्येकं नरकव्रीडाकरी पीडा व्यवर्धत ॥ १५ ॥**

अन्वयः—अथ तैः प्रत्येकं क्रमेण तस्मिन् कर्मणि कार्यमाणे, राज्ञः पीडा नरक व्रीडाकरी व्यवर्धत. ॥ १५ ॥

अर्थः–पछी तेओमाना दरेक पासे अनुक्रमे ते कार्य कराववाथी राजानी वेदना, नरकनी वेदनाने पण शरमावे, एवी ते (उलटी) वधवा लागी. ॥ १५ ॥

**अथाह भूपः पीडाया मूर्तैरवयवैरिव । दीनमन्दातुरैर्वर्णैः पीडयद्भिः परिच्छदम् ॥ १६ ॥**

अन्वयः—अथ पीडयद्भिः पीडायाः मूर्तैः अवयवैः इव, दीन मंद आतुरैः वर्णैः भूपः परिच्छदं आह. ॥ १६ ॥

अर्थः—पछी दुःख उपजावता, एवा ते वेदनाना जाणे देहधारी अवयवो होय नही! एवा दीन, धीमा अने रांकडा शब्दोवडे राजा (पोताना) ते परिवारने कहेवा लाग्यो के, ॥ १६ ॥

**उपचारचयैरेभिः शमाय प्रथितैर्व्यथा । वर्धते प्रत्युतैवासौ लोभो लाभवतामिव ॥ १७ ॥**

अन्वयः—शमाय प्रथितैः एभिः उपचारैः, लाभवतां लोभः इव, प्रत्युत असौ वर्धते एव. ॥ १७ ॥

अर्थः—शांतिमाटे अजमावेला आ उपायोथी तो, लाभ मेळवनाराओना लोभनीपेठे उलटी (मारी) आ वेदना वृद्धिज पामे छे.

**तदेवमेव स्थातव्यं यद्भविष्यतयाधुना । असावहमियं पीडा क्रीडावः किं भवेदिति ॥ १८ ॥**

अन्वयः–तत् अधुना यद्भविष्यतया एवं एव स्थातव्यं, असौ अहं, इयं पीडा क्रीडावः, इति किं भवेत् ? ॥ १८ ॥

अर्थः–माटे हवे तो जे थवानु हशे ते थशे, एम विचारी आमज (कंइं पण उपाय कर्याविना) मारे रहेवुं छे, आ हुं, अने आ वेदना, (एम अमो बन्ने) दाव खेलीयें, (अने जोइयें के) शुं थाय छे ? ॥ १८ ॥

उदासे जिनदासेन वागथो वृद्धमन्त्रिणा । खजल्पः क्वापि नासत्यः सत्यस्तु भुवि दुर्लभाः ॥ १९ ॥

अन्वयः–अथो जिनदासेन वृद्ध मंत्रिणा वाग् उदासे, ख जल्पः क्व अपि असत्यः न, तु सत्यः भुवि दुर्लभाः ॥ १९ ॥

अर्थः—पछी जिनदासनामे वृद्ध मंत्री वाणी बोल्यो के, आकाशवाणी क्यांयें पण जूठी पडे नही, परंतु पृथ्वीपर सती स्त्रीओ मळवी मुश्केल छे. ॥ १९ ॥

पुनस्ताश्चिन्तयामीति क्षणं स्तब्धीकृताकृतिः । अभिनीय स्मृतिं चैष सचिवः प्रोचिवान्नृपम् ॥२०॥

अन्वयः–पुनः ताः चिंतयामि, इति क्षणं स्तब्धीकृत आकृतिः एषः सचिवः स्मृतिं अभिनीय नृपं प्रोचिवान्. ॥ २० ॥

अर्थः—फरीने तेवी सतीओमाटे विचारुं, एम चिंतवीने क्षणवार शरीरने स्थिर करी, ते मंत्रीश्वरे याद लावीने राजाने कह्युं के,

महासती महादेवी जिनधर्मधुरंधरा । कुमारब्रह्मचारी च स धर्मरुचिरुच्चकैः ॥ २१ ॥

अन्वयः—महादेवी महासती, जिन धर्म धुरंधरा, च सः धर्मरुचिः उच्चकैः कुमार ब्रह्मचारी. ॥ २१ ॥

अर्थः–(आपनी) पट्टराणी महासती, तथा ते जैनधर्ममां शिरोमणि छे. तथा धर्मरुचि (पण) उमदा प्रकारनो बालब्रह्मचारी छे. ॥

तयोर्गृहजुषोर्यन्नस्तद्गुणालोकनं बहिः । सा भिक्षा सद्मगतयोः कामधुक्कल्पवृक्षयोः ॥ २२ ॥

अन्वयः—तयोः गृहजुषोः यत् नः तद्गुण आलोकनं बहिः, सा सद्मगतयोः कामधुक् कल्पवृक्षयोः भिक्षा ॥ २२ ॥

अर्थः—तेओ बन्ने घरमां होवा छतां आपणे जे तेवा गुणोमाटे बहार जोवा जवुं ! ते तो घरमां कामधेनु अने कल्पवृक्षनी हया-

ति होवा छतां (बहार) भिक्षा मागवा जवा जेवुं कहेवाय. ॥ २२ ॥

**अथ व्यथावशोऽप्यूचे हा सहासमुखो नृपः । तयोर्मन्त्रिन् कृथा मैवं मिथो विप्लुतयोः कथाम् ॥ २३ ॥**

अन्वयः—अथ व्यथा वशः अपि सहास मुखः नृपः ऊचे, हा! मंत्रिन्! मिथः विप्लुतयोः तयोः एवं कथां मा कृथाः? ॥२३॥

अर्थः—पछी वेदनाथी पीडित छतां पण, मुखपर हास्य लावीने राजाए कह्युं के, अरे! मंत्री! परस्पर लंपट थयेला एवा तेओ बन्नेनी एवी वात नही कर? ॥ २३ ॥

**इति श्रुत्वा बहिर्गेहाद्गत्वा वीक्ष्य सुधाकरम् । एत्यान्तः पाणिना दीपं स्पृष्ट्वा च सचिवोऽब्रवीत् ॥ २४ ॥**

अन्वयः—इति श्रुत्वा सचिवः गेहात् बहिः गत्वा, सुधाकरं वीक्ष्य, अंतः एत्य, च पाणिना दीपं स्पृष्ट्वा अब्रवीत्. ॥ २४ ॥

अर्थः–एम सांभळी ते मंत्रीए मेहेलनी बहार जइ, चंद्रने जोइ, तथा पछी अंदर आवीने, अने हाथथी दीपकने स्पर्श करी कह्युं के,

**विधुः सुधामयोऽद्यापि दहत्यद्यापि पावकः । तत्कथं भाषसे गोप शुद्धयोर्विप्लवं तयोः ॥ २५ ॥**

अन्वयः–(हे) गोप! अद्य अपि विधुः सुधामयः, अद्य अपि पावकः दहति, तत् शुद्धयोः तयोः विप्लवं कथं भाषसे? ॥२५॥

अर्थः–हे राजन्! हजु पण चंद्र अमृतमय प्रकाशे छे, तथा अग्नि पण हजु सळगया करे छे, तो पछी निर्मल एवा तेओ बन्नेवच्चे आप लंपटपणानो आरोप केम मूको छो? ॥ २५ ॥

**दर्शयाम्यधुनैवाहं तयोर्व्रतमविप्लुतम् । उक्तेन नीरयोगेन नीरोगं त्वां सृजन्नवात् ॥२६॥**

अन्वयः—उक्तेन नीर योगेन त्वां जवात् नीरोगं सृजन्, अधुना एव अहं तयोः अविप्लुतं व्रतं दर्शयामि. ॥ २६ ॥

अर्थः—कह्या मुजब जलना योगथी आपने तुरत रोगरहित करीने, हमणाज हुं तेओ बन्नेना निर्लेपटपणानुं आचरण देखाडी आपुं छुं. ॥ २६ ॥

**राजाप्युवाच किं रच्यं यन्मया दोषशङ्कया । देव्याः केशोच्चयः कृत्तः कृत्तौ धर्मरुचेः करौ ॥ २७ ॥**

अन्वयः–राजा अपि उवाच, किं रच्यं? यत् मया दोष शंकया देव्याः केशोच्चयः कृत्तः, धर्मरुचेः करौ कृत्तौ. ॥ २७ ॥

अर्थः—( त्यारे ) राजाए पण कह्युं के, ( हे मंत्रीश्वर! ) हवे शुं बनवानुं छे.? केमके में दोषनी शंकाथी पट्टराणीना केशोनो समूह कापी नाख्यो छे, तेमज धर्मरुचिना पण बन्ने हाथो कापी नाख्या छे. ॥ २७ ॥

**उवाच सचिवोऽप्युच्चैर्हा महाराज किं कृतम् । तयोर्मुधासि शापेन पापेऽस्मिन्पतितो ध्रुवम् ॥ २८ ॥**

अन्वयः–सचिवः अपि उच्चैः उवाच, हा! महाराज! किं कृतं? ध्रुवं तयोः शापेन मुधा अस्मिन् पापे पतितः असि. ॥२८॥

अर्थः—( त्यारे ) ते मंत्रीश्वरे पण म्होटेथी कह्युं के, अरे! महाराजा! ( आ तमोए ) शुं कर्युं? खरेखर तेओना शापथी नाहक तमो आ पापमां संडोवाया छो. ॥ २८ ॥

**तत्तस्याः स्नानपानीयमुपानीय तथाप्यहम् । त्वां धर्मरुचिपाणिभ्यां छिन्नाभ्यामपि सेचये ॥ २९ ॥**

अन्वयः–तत् तथापि अहं तस्याः स्नान पानीयं उपानीय छिन्नाभ्यां अपि धर्मरुचि पाणिभ्यां त्वां सेचये. ॥ २९ ॥

अर्थः–माटे एम छतां पण हुं तेणीना स्नाननुं जल लावीने, ते धर्मरुचिना कपायेला हाथथी पण आपने स्नान करावुं. ॥२९॥

**इत्युक्त्वा त्वरितं गत्वा दीर्घदुःखोर्मिकल्मषाम् । स पट्टराज्ञीमाचष्ट मन्त्रो मधुरया गिरा ॥ ३० ॥**

अन्वयः—इति उक्त्वा सः मंत्री त्वरितं गत्वा दीर्घ दुःख उर्मि कल्मषां पट्टराज्ञीं मधुरया गिरा आचष्ट. ॥ ३० ॥

अर्थः—एम कहीने ते मंत्री तुरत जइ, अत्यंत दुःखना मोजांओथी खेद पामेली ते पट्टराणीने मधुर वचनोथी कहेवा लग्यो के,

**त्वद्विडम्बनपापेन देवि तापेऽपतन्नृपः । अस्तु त्वदीयस्नानाम्बुस्पर्शपुण्येन निर्व्यथः ॥ ३१ ॥**

अन्वयः—हे देवी ! त्वद् विडंबन पापेन नृपः तापे अपतत्, त्वदीय स्नान अंबु स्पर्श पुण्येन निर्व्यथः अस्तु. ॥ ३१ ॥

अर्थः–हे देवी ! तमोने दुःखी करवाना पापथी राजा (महाव्याधिरूप) तापमां पडेलो छे, ते तमारा स्नानजलना स्पर्शना पुण्यथी भले ते व्याधिथी मुक्त थाय. ॥ ३१ ॥

**इति क्षितिपतिक्लेशश्रुतिपुष्टमहाशुचः । पुत्र्याः पितेव स्नानाय देव्या मन्त्री शिरोञ्चलम् ॥ ३२ ॥**

**यावच्चकर्ष स प्राग्वत्तावद्धम्मिल्लमैक्षत । पूर्वच्युतं च धम्मिल्लं रत्नोर्व्यां तस्य बिम्बवत् ॥ ३३ ॥**

अन्वयः–इति क्षिति पति क्लेश श्रुति पुष्ट महा शुचः देव्याः, पुत्र्याः पिता इव, मंत्री स्नानाय शीरः अंचलं, ॥ ३२ ॥ यावत् चकर्ष, तावत् सः प्राग्वत् धम्मिलं ऐक्षत, च पूर्व च्युतं धम्मिलं तस्य प्रतिबिंबवत् रत्नउर्व्यां. ॥ ३३ ॥ युग्मं ॥

अर्थः—एम कही, राजानी वेदना सांभळवाथी वृद्धि पामेल छे अत्यंत दिलगिरि जेनी, एवी ते पट्टराणीने, पुत्रीप्रते जेम पिता,

तेम ते मंत्रीश्वरे स्नान करावावामाटे (तेणीना) मस्तकपरना (वस्त्रना) छेडाने, ॥ ३२ ॥ जेवामां खेंचीने दूर कर्यो, तेवामां तेणे पूर्वेनीपेठेज (तेणीना मस्तकपर) चोटलो जोयो, अने पूर्वे कापी नाखेला चोटलाने ते (मूळ चोटलाना) प्रतिबिंबनीपेठे रत्नजडित भूमिपर पडेलो जोयो. ॥ ३३ ॥ युग्मं ॥

**अहो शीलमहो शीलमिदं देवि तवाद्भुतम् । कृत्तोऽपि केशपाशः स्राग्येनाजनि पुनर्जनिः ॥ ३४ ॥**

अन्वयः—(हे) देवि ! इदं तव अहो ! शीलं, अहो ! शीलं, अद्भुतं ! येन कृत्तः अपि केश पाशः स्राग् पुनर्जनिः अजनि.

अर्थः—हे देवि ! आ तमारुं शील तो अहो ! अहो ! अति आश्चर्यकारक छे ! के जेना प्रभावथी कापी नाखेलो पण (तमारो) चोटलो तुरत फरीने उगी निकळ्यो छे! ॥ ३४ ॥

**इति स्तुतिं सृजन्देव्याः केशान्प्रक्षाल्य तज्जलम् । स्वर्णकुम्भस्थमादाय सोऽगाद्धर्मरुचेः पुरः ॥ ३५ ॥**

अन्वयः—इति देव्याः स्तुतिं सृजन्, केशात् प्रक्षाल्य तत् जलं स्वर्ण कुंभस्थं आदाय सः धर्मरुचेः पुरः अगात्. ॥ ३५ ॥

अर्थः—ए रीते ते पट्टराणीनी स्तुति करतोथको, तेणीना केश धोइने, तथा ते जलने सुवर्णना कुंभमां राखीने ते मंत्री धर्मरुचिनीपासे गयो. ॥ ३५ ॥

**अक्षतावेव तस्यापि मन्त्री हस्तौ व्यलोकयत् । निर्जितारुणपद्माभौ प्राग्हस्तौ च तयोरधः ॥ ३६ ॥**

अन्वयः—मंत्री तस्य अपि निर्जित अरुण पद्म आभौ अक्षतौ एव हस्तौ, च तयोः अधः प्राग् हस्तौ व्यलोकयत्. ॥ ३६ ॥

अर्थः—(त्यां) ते मंत्रीए तेना पण लाल कमलनी कांतिने जीतनारा अखंडित बन्ने हाथने, तथा तेनी नीचे प्रथमना ( पण ) बन्ने हाथने जोया. ॥ ३६ ॥

**अहो ते ब्रह्मचारित्वमहो ते निर्मलं तपः । यत्पुण्यामृतसेकेन सद्यः कन्दलितौ करौ ॥ ३७ ॥**

अन्वयः—अहो! ते ब्रह्मचारित्वं ! अहो! ते निर्मलं तपः ! यत्पुण्य अमृत सेकेन सद्यः करौ कंदलितौ. ॥ ३७ ॥

अर्थः—अहो ! तारुं ब्रह्मचारिपणुं ! अहो ! तारुं निर्मल तप ! के जेथी उत्पन्न थयेलां पुण्यरूपी अमृतना सींचावाथी तुरत तारा बन्ने हाथ (पाछा) उगी निकळ्या ! ॥ ३७ ॥

**स्नपयाशु स्वपाणिभ्यां देवीस्नानजलैर्नृपम् । त्वत्कलङ्कप्रदानोत्थव्यथं निर्व्यथय द्रुतम् ॥ ३८ ॥**

अन्वयः—देवी स्नान जलैः स्व पाणिभ्यां आशु नृपं स्नपय? त्वत् कलंक प्रदान उत्थ व्यथं (तं) द्रुतं निर्व्यथय? ॥ ३८ ॥

अर्थः—(हवे) तुं आ राणीना स्नान जलवडे, तारा हाथें तुरत राजाने स्नान कराव? तथा तारापर कलंक देवाथी उत्पन्न थयेली व्याधिवाळा ते राजाने तुरत व्याधि रहित कर? ॥ ३८ ॥

**इत्युक्ते सोऽचलद्यावज्जलकुम्भं सुधीर्दधत् । देवतातिशयात्तावदभिकुम्भजलं तदा ॥ ३९ ॥**

**अभूच्छत्रं निराधारं चारुचामरवीजनम् । पुष्पवृष्टिर्जयारावो गगने दुन्दुभिध्वनिः ॥ ४० ॥ युग्मम् ॥**

अन्वयः–इति उक्ते यावत् सः सुधीः जलकुंभं दधत् अचलत्, तावत् तदा देवता अतिशयात् तत् अभिकुंभजलं, ॥३९॥ गगने

निराधारं छत्रं, चारु चामर वीजनं, पुष्प वृष्टिः, जय आरावः, दुंदुभि ध्वनिः अभूत्. ॥ ४० ॥ युग्मं ॥

अर्थः—मंत्रीए एम कहेवाथी जेवामां ते उत्तम बुद्धिवाळो धर्मरुचि ते जलकुंभ लेइने चालवा लाग्यो, तेवामां ते शासनदेवीना अतिशयथी ते जलकुंभनी आसपास आकाशमां अधर छत्र, मनोहर चामरोनुं वींझावुं, पुष्पोनी वृष्टि, जयजय शब्दोनो अवाज, तथा दुंदुभिनो नाद प्रगट थयां. ॥ ४० ॥ युग्मं ॥

**इत्थं महोत्सवैर्गत्वा तैर्धर्मरुचिरम्बुभिः । असिञ्चद् भूपतिं चन्द्रः किरणैरिव कैरवम् ॥ ४१ ॥**

अन्वयः—इत्थं महोत्सवैः गत्वा, चंद्रः किरणैः कैरवं इव, धर्मरुचिः तैः अंबुभिः भूपतिं असिंचत् ॥ ४१ ॥

अर्थः—एरीते महोत्सवपूर्वक जइने, चंद्र (पोताना) किरणोथी जेम चंद्रविकासी कमलने सींचे, तेम ते धर्मरुचिए ते जलवडे करीने राजाने स्नान कराव्युं. ॥ ४१ ॥

**तेनाम्बुना ययौ भूपादभूत इव रुग्भरः । सद्यः पवनदीप्ताग्निज्वालयेवालयात्तमः ॥ ४२ ॥**

अन्वयः—पवन दीप्त अग्नि ज्वालया आलयात् तमः इव, तेन अंबुना अभूतः इव सद्यः भूपात् रुग्भरः ययौ. ॥ ४२ ॥

अर्थः—वायुथी प्रगटेली अग्निनी ज्वालावडे जेम घरमांथी अंधकार चाल्यो जाय, तेम ते जलवडे करीने, जाणे थयोज न होय, तेम तुरत राजापासेथी व्याधिनो समूह चाल्यो गयो. ॥ ४२ ॥

**तच्चरित्रचमत्कारवीचीनिचयलीलया । चिरं लोलमुखाम्भोजः सोऽजनिष्ट जनेश्वरः ॥ ४३ ॥**

अन्वयः—तत् चरित्र चमत्कार वीची निचय लीलया सः जनेश्वरः चिरं लोल मुख अंभोजः अजनिष्ट. ॥ ४३ ॥

अर्थः–तेओ बन्नेना चरित्रना आश्चर्यना मोजांओना समूहनी प्रेरणाथी ते चंद्रोदर राजा घणा काळसुधी चपल मुखरूपी कमलवाळो थयो, (अर्थात् ते आश्चर्यथी पोतानुं मस्तक धुणाववा लाग्यो.) ॥ ४३ ॥

**क्षमयित्वा क्षमाधीशो धीमान्धर्मरुचिं ततः । तां च क्षमयितुं देवीं स रुक्मिण्या समं ययौ ॥ ४४ ॥**

अन्वयः–ततः सः धीमान् क्षमा अधीशः धर्मरुचिं क्षमयित्वा, च तां देवीं क्षमयितुं रुक्मिण्या समं ययौ. ॥ ४४ ॥

अर्थः—पछी ते बुद्धिवान राजा धर्मरुचिनी क्षमा मागीने, ते राणीने खमाववामाटे रुक्मिणीने साथे लेइने गयो. ॥ ४४ ॥

**सर्वं मम क्षमस्वेति पाणिलग्ने महीभुजि । देव्याः पदद्वये लग्ना रुक्मिणी बाष्पदृग्जगौ ॥ ४५ ॥**

अन्वयः–मम सर्वस्वं क्षमस्व ? इति महीभुजि देव्याः पाणि लग्ने, रुक्मिणी बाष्पदृग् पद द्वये लग्ना जगौ. ॥ ४५ ॥

अर्थः–(हे प्रिये !) मारा (अपराधनी) तुं क्षमा कर ? एम कहीने राजाए ते राणीना ज्यारे हाथ झाल्या, त्यारे रुक्मिणी (पण) आंखोमां आंसु लावीने तेणीने पगे पडीने कहेवा लागी के, ॥ ४५ ॥

**यद्देवि पाणिग्रहणे हारितस्त्वत्पतिर्मया । त्वन्मृत्युकाङ्क्षयादर्शि व्योमयुद्धशवं च यत् ॥ ४६ ॥**

**अतुच्छमपि वात्सल्यं बिभ्रत्या मयि सर्वदा । मुधा कलङ्कमुत्पाद्य यत्तेऽकारि विडम्बनम् ॥ ४७ ॥**

**विप्रियं यच्च ते ध्यातं नित्यं दुश्चिन्तया मया । तन्मम क्षम्यतां सर्वं क्षमावति महासति ॥ ४८ ॥**

अन्वयः—(हे) देवि! पाणि ग्रहणे त्वत्पतिः यत् मया हारितः, च त्वत् मृत्यु कांक्षया यत् व्योम युद्ध शवं अदर्शि, ॥ ४६ ॥ मयि सर्वदा अतुच्छं वात्सल्यं बिभ्रत्या अपि ते मुधा कलंकं उत्पाद्य यत् विडंबनं अकारि, ॥ ४७ ॥ च नित्यं दुश्चिंतया मया यत् ते विप्रियं ध्यातं, तत् मम सर्वं (हे) क्षमावति! महासति! क्षम्यतां? ॥ ४८ ॥ त्रिभिर्विशेषकं ॥

अर्थ.—हे देवि! (तमारां) लग्न समये तमारा पतिनुं जे में हरण कराव्युं, तथा तमारां मृत्युनी इच्छाथी जे आकाशनुं युद्ध तथा शब देखाडयुं, ॥ ४६ ॥ (वळी) मारापर हमेशां अथाग प्रेम धरनारां, एवां पण तमारापर जूठुं कलंक चडावीने (तमोने) जे कष्ट उपजाव्युं, ॥ ४७ ॥ तेमज हमेशां दुर्ध्यानवडे में जे तमारुं बूरुं चिंतव्युं, ते मारा सर्व अपराधोमाटे हे क्षमावति महासति ! (तमो) क्षमा करो ? ॥ ४८ ॥ त्रिभिर्विशेषकं ॥

**तत्पृष्ठदत्तहस्ताह देवी किं मे त्वया कृतम् । सर्वः पूर्वकृतानां हि कर्मणां लभते फलम् ॥ ४९ ॥**

अन्वयः—तत्पृष्ठ दत्त हस्ता देवी आह, त्वया मे किं कृतं ? हि सर्वः पूर्व कृतानां कर्मणां फलं लभते. ॥ ४९ ॥

अर्थः—(त्यारे) तेणीनी पीठपर हाथ राखीने ते राणीए कह्युं के, तमोए मारुं शुं (बूरुं) कर्युं छे? केमके सर्व प्राणीओ (पोते) पूर्वे करेलां कर्मोनां फल भोगवे छे. ॥ ४९ ॥

**अथ बाहुधृतां देवीं सानुतापो नृपोऽवदत् । अहं ते मूर्तिमत्कर्म येनेदं दर्शितं फलम् ॥ ५० ॥**

अन्वयः—अथ स अनुतापः नृपः बाहु धृतां देवीं अवदत्, अहं ते मूर्तिमत् कर्म, येन इदं फलं दर्शितं. ॥ ५० ॥

अर्थ—पछी ते पश्चात्ताप करनारा चंद्रोदरराजाए ते राणीनो हाथ झालीने कह्युं के, (हे प्रिये!) हुंज (आ) तारुं देहधारी कर्म छुं, के जेणे (तने) आवुं फल चखाडयुं. ॥ ५० ॥

**सपत्नीमत्सराच्चक्रे वक्रतां रुक्मिणी वरम् । प्रिया प्रियेण मयका यद्दग्धासि हतोऽस्मि तत् ॥ ५१ ॥**

अन्वयः—सपत्नी मत्सरात् रुक्मिणी वक्रतां चक्रे, वरं, मयका प्रियेण प्रिया यत् दग्धा असि, तत् हतः अस्मि. ॥ ५१ ॥

अर्थ—शोक्यनी ईर्ष्याथी रुक्मिणीए जे अकार्यो कर्या, ते तो ठीक, परंतु में भर्तारे (उठीने पोतानी) प्राणप्रियाने जे कष्ट आप्युं, ते मने अत्यंत साल्या करे छे. ॥ ५१ ॥

**निःकृत्रिमप्रेमवतो सती हृदयवल्लभा । कथं मया विराद्धासि धिग्मां धर्मबहिर्मुखम् ॥ ५२ ॥**

अन्वयः—निःकृत्रिम प्रेमवती, हृदय वल्लभा, सती मया कथं विराद्धा असि? धर्म बहिर्मुखं मां धिक् ॥ ५२ ॥

अर्थः—हृदयना निखालस प्रेमने धरनारी, तथा मनोवल्लभ एवी तने सतीने में केम विडंबना करी? माटे धर्मरहित एवा मने धिक्कार छे.

**तस्य प्रेमानुबन्धस्य कोऽद्दगाचरितं मया । अश्रोतव्यचरित्रोऽहमद्रष्टव्यमुखोऽस्मि तत् ॥ ५३ ॥**

अन्वयः—तस्य प्रेम अनुबंधस्य मया कीदृक् आचरितं! तत् अहं अश्रोतव्य चरित्रः, अदृष्टव्य मुखः अस्मि. ॥ ५३ ॥

अर्थः—(अरे!) तेवां प्रेमपात्रप्रते में केवुं (अनिष्ट) आचरण कर्युं! माटे मारुं वृत्तांत पण सांभळवा लायक नथी, अने मारुं मुख पण जोवा लायक नथी! ॥ ५३ ॥

एवं जल्पत्यपि क्ष्मापे सा नैवोर्ध्वं शिरोऽकरोत् । प्रियापमानप्राग्भारभारितेव कलावती ॥ ५४ ॥

अन्वयः–क्ष्मापे एवं जल्पति अपि सा कलावती प्रिय अपमान प्राग्भार भारिता इव शिरः ऊर्ध्वं न एव अकरोत्. ॥५४॥

अर्थः—राजाए एरीते ( पश्चात्तापपूर्वक ) बोलतां छतां पण ते कलावती राणी, स्वामिए करेलां अपमानना अतिशय बोजाथी जाणे भारवाळी थइ होय नही! तेम तेणीए (पोतानुं) मस्तक उंचुं कर्युंज नही. ॥ ५४ ॥

ततश्चन्द्रोदरश्चक्रे चित्ते चिन्तामचञ्चले । यः स्यादस्या मयि क्रोधः सोऽल्पः कारणमानतः ॥ ५५ ॥

अन्वयः—ततः चंद्रोदरः अचंचले चित्ते चिंतां चक्रे, अस्याः मयि यः क्रोधः स्यात्, सः कारण मानतः अल्पः. ॥ ५५ ॥

अर्थः–पछी ते चंद्रोदरराजाए (पोताना) स्थिर मनमां विचार कर्यो के, आ राणीनो मारापर जे क्रोध छे, ते कारणनुं प्रमाण जोतां स्वल्प छे. ॥ ५५ ॥

तत्प्रसत्तिं प्रिया केनोपायेनासौ विधास्यति । यद्वा का मम चिन्तास्याः स्वं तावच्चिन्तयामि न ॥५६॥

अन्वयः—तत् असौ प्रिया केन उपायेन प्रसत्तिं विधास्यति ? यद्वा अस्याः मम का चिंता ? तावत् स्वं न चिंतयामि? ॥५६॥

अर्थः—माटे हवे आ प्राणप्रिया कया उपायथी मारापर प्रेम करशे ? अथवा तेणीनी मारे शामाटे फिकर करवी जोइये ? हवे तो हुं मारा पोताना आत्मानीज (शामाटे) फिकर न करुं ? ॥ ५६ ॥

**ममाप्रसत्तेरेषाभूदप्रसन्नाधुना ध्रुवम् । स्वयं दाहस्वरूपोऽग्निर्दहतीन्धनमन्तिके ॥ ५७ ॥**

अन्वयः-मम अप्रसत्तेः ध्रुवं एषा अधुना अप्रसन्ना अभूत्, दाह स्वरूपः अग्निः अंतिके इंधनं स्वयं दहति. ॥ ५७ ॥

अर्थः—मारी कमेहेरबानीथी खरेखर आ राणी हवे (माराप्रते) मेहेरबानीरहित थइ छे. केमके बाळवाना स्वभाववाळो अग्नि पासे रहेला बळतणने पोतानीमेळेज बाळे छे. ॥ ५७ ॥

**तत्किमात्मन्प्रसन्नत्वं न त्वं धत्से सदा हृदि । यतः प्रसन्ने त्वय्येव प्रसन्नमखिलं जगत् ॥ ५८ ॥**

अन्वयः—तत् (मे) आत्मन्! त्वं सदा हृदि प्रसन्नत्वं किं न धत्से? यतः त्वयि एव प्रसन्ने अखिलं जगत् प्रसन्नं. ॥ ५८ ॥

अर्थः-माटे हे आत्मा! तुं हमेशां मनमां आंनंदपणाने शामाटे धारण करतो नथी? केमके तनेज आनंद थवाथी समस्त जगत् आनंदित थवानुं छे. ॥ ५८ ॥

**न चिन्तयसि चिद्रूप यदि त्वं हितमात्मनः । ततस्ते कोऽस्ति यः पीडां धृत्वा तत्कथयिष्यति ॥५९॥**

अन्वयः—(हे) चिद्रूप! यदि त्वं आत्मनः हितं न चिंतयसि, ततः ते कः अस्ति? यः पीडां धृत्वा तत् कथयिष्यति. ॥ ५९ ॥

अर्थः—माटे हे चिदानंदरूप आत्मन्! ज्यारे तुं पोते पोतानुं हित नथी विचारतो, तो पछी तारो (एवो) कोण (हितचिंतक) छे? के जे दुभाइने (तने) ते हकीकत कहेशे? ॥ ५९ ॥

त्वमेकः कर्मणां कर्ता भोक्तैकस्तत्फलस्य च । अन्ये संयोगजाः सर्वे भावाः कर्मविनिर्मिताः ॥ ६० ॥

अन्वयः—त्वं एकः कर्मणां कर्ता, च तत्फलस्य एकः भोक्ता, अन्ये सर्वे संयोगजाः भावाः कर्म विनिर्मिताः. ॥ ६० ॥

अर्थः—तुं एकलोज कर्मोनो कर्ता छे, तथा तेना फलने ( पण ) तुं एकलोज भोगवनार छे, बीजा सघळा संयोगी भावो कर्मोए रचेला छे. ॥ ६० ॥

मातृपुत्रपितृभ्रातृकलत्रस्वजनादयः । सर्वे स्वार्थाय ताम्यन्ति त्वदर्थाय न कश्चन ॥ ६१ ॥

अन्वयः—मातृ पुत्र पितृ भ्रातृ कलत्र स्वजन आदयः सर्वे स्वार्थाय ताम्यंति, त्वदर्थाय कश्चन न. ॥ ६१ ॥

अर्थः—माता, पुत्र, पिता, भाइ, स्त्री तथा संबंधि आदिक सर्व कोइ ( पोतपोताना ) स्वार्थमाटे घमसाण मचावी रह्या छे, तारा पोतामाटे कोइ पण कंइ प्रयत्न करतो नथी. ॥ ६१ ॥

सर्वभूतहिता या तु सद्गुरोर्धर्मदेशना । संसारव्यवहाराधिबाधे त्वयि न सा स्थिता ॥ ६२ ॥

अन्वयः—तु सर्व भूतहिता या सद्गुरोः धर्म देशना, सा संसार व्यवहार आधि बाधे त्वयि स्थिता न. ॥ ६२ ॥

अर्थः—वळी सर्व जीवोने हितकारी एवी सद्गुरुनी जे धर्मदेशना छे, ते सांसारिक व्यवहारनी पीडाथी बाधा पामेलां तारा हृदयमां (हजु) स्थिर थइने रहेली नथी. ॥ ६२ ॥

तदावेद्य वेद्यज्ञ भवान्तं लप्स्यसे कथम् । त्वमद्यापि कियत्कर्मा किंस्वरूपः किमुद्यमः ॥ ६३ ॥

अन्वयः—तत् (हे) वेद्यज्ञ ! त्वं भव अंतं कथं लप्स्यसे ? अद्यापि कियत्कर्मा ? किं स्वरूपः ? किं उद्यमः ? आवेदय ? ॥६३॥

अर्थः—माटे हे ज्ञानी आत्मन् ! तुं संसारनो पार केम पामीश ? हजु पण (तारां) केटलां कर्मो (बाकी) छे ? तारुं स्वरूप शुं छे ? तथा तुं शुं प्रयत्न करी रह्यो छे ? (इत्यादि) तुं विचार ? ॥ ६३ ॥

**इति चिन्तयतस्तस्य प्रशस्तोज्ज्वलभावनाम् । चिक्रीड चेतने चित्तं चिरं वैराग्यरङ्गतः ॥ ६४ ॥**

अन्वयः—इति प्रशस्त उज्ज्वल भावनां चिंतयतः तस्य चित्तं वैराग्य रंगतः चिरं चेतने चिक्रीड. ॥ ६४ ॥ युग्मं ॥

अर्थः–एरीते उत्तम अने निर्मल भावना भावता एवा ते चंद्रोदर राजनुं मन वैराग्यना रंगथी घणा काळसुधी आत्मज्ञानमां रमवा लाग्युं. ॥ ६४ ॥

**यथा यथा स्थितं चित्तं ज्योतीरूपेऽस्य चेतने । तथा तथागाद्विलयमातपे करको यथा ॥ ६५ ॥**

अन्वयः—यथा यथा अस्य चित्तं ज्योतीरूपे चेतने स्थितं, तथा तथा आतपे यथा करकः, विलयं अगात्. ॥ ६५ ॥

अर्थः—(एरीते) जेम जेम तेनुं मन ज्योतिरूप चैतन्यमां स्थिर थतुं गयु, तेम तेम, सुर्यना तापमां करानीपेठे ( बरफनीपेठे ) पीगळवा लाग्युं. ॥ ६५ ॥

**विलीने मनसि क्षीणेष्वभितो घातिकर्मसु । दग्धरज्जुसमानेषु भवोपग्राहिकर्मसु ॥ ६६ ॥**

**सद्ध्यानामृतसिक्ताया भावनाव्रततेः फलम् । चन्द्रोदरोऽवनीपालः केवलज्ञानमासदत् ॥ ६७ ॥युग्मम्॥**

अन्वयः—मनसि विलीने, अभितः घाति कर्मसु क्षीणेषु, भव उपग्राहि कर्मसु दग्ध रज्जु समानेषु, ॥ ६६ ॥ चंद्रोदरः अवनीपालः सध्ध्यान अमृत सिक्तायाः भावना व्रततेः फलं केवलज्ञानं आसदत्. ॥ ६७ ॥ युग्मं ॥

अर्थः—हृदय पीगळवाथी, चोतरफथी घातिकर्मोनो विनाश थये छते, अने भवोपग्राही कर्मो बळी गयेली दोरीसरखां होते छते, ॥ ६६ ॥ ते चंद्रोदर राजा उत्तम ध्यानरूपी अमृतरसथी सींचायेली भावनारूपी वेडलीना फलसरखुं केवलज्ञान पाम्या. ॥ ६७ ॥

ततः कृते महोत्साहे पुष्पवृष्टिपुरःसरे । पद्मावत्या वितीर्णे च मुनिवेषे यथाविधि ॥ ६८ ॥
कलावत्या धर्मरुचेर्जिनदासस्य मन्त्रिणः । दत्वा दीक्षां विहृत्योर्व्यां कृत्वा तत्त्वप्रकाशनम् ॥ ६९ ॥
विधायानशनं मासपर्यन्ते पुण्यभूतले । देहं त्यक्त्वा ययौ मुक्तिं चन्द्रोदरमहामुनिः ॥ ७० ॥

अन्वयः—ततः पद्मावत्या पुष्पवृष्टि पुरःसरे महोत्साहे कृते, च यथाविधि मुनि वेषे वितीर्णे, ॥ ६८ ॥ कलावत्याः, धर्मरुचेः, जिनदासस्य मंत्रिणः दीक्षां दत्वा, उर्व्यां विहृत्य, तत्त्व प्रकाशनं कृत्वा, ॥ ६९ ॥ अनशनं विधाय, मास पर्यंते पुण्य भूतले देहं त्यक्त्वा, चंद्रोदर महामुनिः मुक्तिं ययौ. ॥ ७० ॥ त्रिभिर्विशेषकं ॥

अर्थः—पछी पद्मावतीदेवीए पुष्पोनी वृष्टि करवापूर्वक महोत्सव करते छते, तथा विधिपूर्वक मुनिनो वेष आपते छते, ॥ ६८ ॥ कलावती, धर्मरुचि तथा ते जिनदास मंत्रीश्वरने दीक्षा आपीने, पृथ्वीपर विहार करीने, तत्त्वोनो उपदेश देइने, ॥ ६९ ॥ अनशन करी एक मासबाद पवित्र पृथ्वीतलपर देहनो त्याग करीने ते चंद्रोदर महामुनि मोक्षे गया. ॥ ७० ॥ त्रिभिर्विशेषकं ॥

दानशीलतपोधर्मरहितोऽपि शिवं पुमान् । चन्द्रोदर इवाप्नोति भावनायाः प्रभावतः ॥ ७१ ॥

अन्वयः—दान शील तपः धर्म रहितः अपि पुमान् भावनायाः प्रभावतः चंद्रोदरः इव शिवं आप्नोति. ॥ ७१ ॥

अर्थः–दान शील तथा तपरूपी धर्म विनानो पुरुष पण भावनाना प्रभावथी चंद्रोदर राजानी पेठे मोक्ष पामे छे. ॥ ७१ ॥

॥ इति भावनायां चन्द्रोदरनृपतिकथा ॥

॥ ए रीते भावनाना संबंधमां चंद्रोदर राजानी कथा कही. ॥

तं चिद्रूपश्चतूरूपं धर्मं सम्यग्निशम्य सः । अथ पद्मोत्तरो राजा व्याजहार मुनीश्वरम् ॥ ७२ ॥

अन्वयः—अथ सः चिद्रूपः पद्मोत्तरः राजा चतूरूपं धर्मं सम्यग् निशम्य तं मुनि ईश्वरं व्याजहार. ॥ ७२ ॥

अर्थः—पछी ते अध्यात्मज्ञानी पद्मोत्तर राजा (दान, शील, तप, तथा भावरूप) चार प्रकारना धर्मने सारीरीते सांभळीने ते मुनिराजने कहेवा लाग्या के, ॥ ७२ ॥

धर्मेश धन्य एवास्मि यस्य भाग्योदयैर्भवान् । धर्ममीदृशमाचख्यौ मोक्षश्रीसौख्यकारणम् ॥ ७३ ॥

अन्वयः—(हे) धर्म ईश! धन्यः एव अस्मि, यस्य भाग्य उदयैः भवान् मोक्ष श्री सौख्य कारणं ईदृशं धर्मं आचख्यौ. ॥७३॥

अर्थः–हे धर्माधीश मुनीश्वर! (खरेखर) हुं धन्यज छुं, के जेना भाग्यना उदयथी आपे मुक्तिरूपी लक्ष्मीना सुखनो हेतुरूप (आ) आवो धर्म (मने) कही संभळाव्यो. ॥ ७३ ॥

**मच्चेतसि चमत्कारं विचारस्त्वकृतोऽकृत । स्वामिन्नेकस्तु संदेहः प्ररोहं कुरुते हृदि ॥ ७४ ॥**

अन्वयः-(हे) स्वामिन्! अकृतः विचारः तु मत् चेतसि चमत्कारं अकृत, तु एकः संदेहः हृदि प्ररोहं कुरुते. ॥ ७४ ॥

अर्थः—हे स्वामी! (कोइ समये पण) नही करेला एवा (आ) अपूर्व विचारे तो मारा हृदयमां आश्चर्य उपजाव्युं छे, परंतु (तेमां) एक संशय (मारा) हृदयमां उत्पन्न थयो छे के, ॥ ७४ ॥

**व्रतं हि गृह्यते सद्भिर्भेत्तुं दुःकर्मणां गणम् । ध्यानतः केवलज्ञाने संपन्ने किं फलं व्रतात् ॥ ७५ ॥**

अन्वयः—सद्भिः हि दुःकर्मणां गणं भेत्तुं व्रतं गृह्यते, ध्यानतः केवलज्ञाने संपन्ने व्रतात् किं फलं? ॥ ७५ ॥

अर्थः—उत्तम माणसो खरेखर दुष्कर्मोना समूहने भेदी नाखवामाटे चारित्र ले छे, परंतु ध्यानथीज केवलज्ञान प्राप्त थयाबाद चारित्र लेवाथी शुं फायदो छे? ॥ ७५ ॥

**आलोकाय गृहे लोका दीपयन्ति हि दीपकम् । स चेच्चण्डांशुतो जातः किं कार्यं तेन तद्दिने ॥ ७६ ॥**

अन्वयः—लोकाः हि आलोकाय गृहे दीपकं दीपयंति, सः चेत् दिने चंडांशुतः जातः, तत् तेन किं कार्यं? ॥ ७६ ॥

अर्थः—लोको खरेखर उजासमाटे घरमां दीपक प्रगटावे छे, परंतु ते उजास ज्यारे दिवसे सूर्यथी उत्पन्न थयो, तो पछी ते दीवानी शी जरुर छे? ॥ ७६ ॥

**ततः प्रत्युत्तरं प्राह पृथ्वीनाथार्थितो मुनिः । उक्तं युक्तं त्वया राजन्किं तु तत्कारणं शृणु ॥ ७७ ॥**

अन्वयः–ततः पृथ्वी नाथ अर्थितः मुनिः प्रत्युत्तरं प्राह, (हे) राजन्! त्वया युक्तं उक्तं, किंतु तत्कारणं शृणु ? ॥ ७७ ॥

अर्थः—पछी (एरीते) राजाथी प्रार्थना करायेला ते मुनिराजे उत्तर आप्यो के, हे राजन्! तमोए युक्तियुक्त कह्युं, परंतु तेनुं कारण सांभळो ? ॥ ७७ ॥

**गोत्रवृद्धैर्नरैर्नैव सद्गुणोऽपि प्रणम्यते । अलंकृतनृपश्रीस्तु वन्द्यते नम्रमौलिभिः ॥ ७८ ॥**

अन्वयः–सद्गुणः अपि गोत्र वृद्धैः नरैः न एव प्रणम्यते, तु अलंकृत नृप श्रीः नम्र मौलिभिः वंद्यते. ॥ ७८ ॥

अर्थः—सद्गुणी कुमारने पण कुटुंबना वृद्ध पुरुषो नथीज नमता, परंतु राज्यलक्ष्मी मळ्याबाद (ते वृद्धो पण) मस्तक नमावीने तेने नमस्कार करे छे. ॥ ७८ ॥

**एवं न केवलज्ञानी गृहस्थो नम्यते जनैः । गृहीतचारुचारित्रः शक्रैरपि स पूज्यते ॥ ७९ ॥**

अन्वयः—एवं केवलज्ञानी गृहस्थः जनैः न नम्यते, गृहीत चारु चारित्रः सः शक्रैः अपि पूज्यते. ॥ ७९ ॥

अर्थः—ए रीते केवलज्ञानी जो गृहस्थीपणे रहे, तो तेने लोको नमता नथी, परंतु मनोहर चारित्र लीधाबाद तेने इन्द्रो पण पूजे छे. ॥ ७९ ॥

**अतो दिशन्ति चारित्रं केवलज्ञानतोऽधिकम् । तस्मिँल्लब्धेऽपि तल्लब्धुं तेन धावन्ति धीधनाः ॥ ८० ॥**

अन्वयः—अतः चारित्रं केवल ज्ञानतः अधिकं दिशंति, तेन धीधनाः तस्मिन् लब्धे अपि तत् लब्धुं धावंति. ॥ ८० ॥

अर्थः—माटे चारित्रने केवलज्ञानथी ( पण ) अधिक कहेलुं छे, अने तेथीज बुद्धिवानो केवलज्ञान प्राप्त थये छते पण ते चारित्र लेवामाटे उत्सुक थाय छे. ॥ ८० ॥

**एवं निशम्य सम्यक्त्वतत्त्वगौरीं गुरोर्गिरम् । अप्रमत्ते चिरं चित्ते धत्ते स्मेति नृपस्तदा ॥ ८१ ॥**

अन्वयः—एवं सम्यक्त्व तत्व गौरीं गुरोः गिरं निशम्य नृपः तदा अप्रमत्ते चित्ते चिरं इति धत्तेस्म. ॥ ८१ ॥

अर्थः–एरीते सम्यक्त्वना सारथी निर्मल, एवी गुरुमहाराजनी वाणी सांभळीने राजा ते वखते ( पोताना ) सावधान मनमां घणा समय सुधी एम विचारवा लाग्यो के, ॥ ८१ ॥

**आचख्यौ चतुरो धर्मान् श्रीमान्यानेष मे गुरुः । संपूर्णमेकमप्येषु न कर्तुमहमीश्वरः ॥ ८२ ॥**

अन्वयः—एष मे श्रीमान् गुरुः यान् चतुरः धर्मान् आचख्यौ, एषु एकं अपि संपूर्णं कर्तुं अहं ईश्वरः न. ॥ ८२ ॥

अर्थः—आ मारा श्रीमान् गुरुए जे चार प्रकारना धर्मो कह्या, तेमांथी एक धर्मने पण संपूर्ण रीते करवाने हुं समर्थ नथी. ॥

**पात्रे क्षेत्रेऽनुकंप्ये च देयं दानमिति स्थितिः । महाव्रतधरा राज्ञो मम दानं न गृह्णते ॥ ८३ ॥**

अन्वयः—पात्रे च अनुकंप्ये क्षेत्रे दानं देयं, इति स्थितिः, महाव्रतधराः मम राज्ञः दानं न गृह्णते. ॥ ८३ ॥

अर्थः—सुपात्रप्रते तथा अनुकंपा करवालायक क्षेत्रप्रत्ये दान देवुं, एवो व्यवहार छे, (परंतु) महाव्रतधारी मुनिओ तो मारुं राजानुं दान लेता नथी. ॥ ८३ ॥

विषयायत्तचित्तस्य प्रियायामवनीपतेः । क्व मे सर्वोत्तमं शीलमजिह्मब्रह्मजीवितम् ॥ ८४ ॥

अन्वयः—प्रियायां विषय आयत्त चित्तस्य अवनी पतेः मे अजिह्म ब्रह्म जीवितं सर्व उत्तमं शीलं क्व? ॥ ८४ ॥

अर्थः—स्त्रीमां विषयासक्त हृदयवाळो तथा वळी राजगादी भोगवतो एवो जे हुं, तेने अखंडित ब्रह्मचर्यपणे जीवन गाळवारूप सर्व प्रकारे उमदुं शीलपालन क्यांथी संभवे ? ॥ ८४ ॥

उपवासकृतावासमङ्गभङ्गकरं तपः । धरोद्धरणधुर्यस्य धवलस्येव मे कुतः ॥ ८५ ॥

अन्वयः—धवलस्य इव धरा उद्धरण धुर्यस्य मे उपवास कृत आवासं, अंग भंग करं तपः कुतः ॥ ८५ ॥

अर्थः—वृषभनीपेठे पृथ्वीनो बोजो उपाडवामां अग्रेसर एवा मने, उपवासोए जेमां निवास करेलो छे एवो, तथा शरीरने तोडी पाडनारो, एवो तप ( पण ) क्यांथी संभवे ? ॥ ८५ ॥

निरन्तरचरच्चिन्ताचान्तस्वान्तस्य सर्वतः । मम संयमलीनाया भावनायाः कथा कुतः ॥ ८६ ॥

अन्वयः—सर्वतः निरंतर चरत् चिंता आचांत स्वांतस्य मम संयम लीनायाः भावनायाः कथा कुतः ? ॥ ८६ ॥

अर्थः-चोतरफथी हमेशां आवीपडती चिंताथी व्याकुल हृदयवाळा एवा मने, संयमने आधीन एवी भावनानी तो वातज क्यांथी संभवे ?

यदि राज्यं परित्यज्य द्रुतं गृह्णे महाव्रतम् । शुद्धं चतुर्विधं धर्मं कर्तुं स्यां तदहं क्षमः ॥ ८७ ॥

अन्वयः—यदि राज्यं परित्यज्य द्रुतं महाव्रतं गृह्णे, तत् चतुर्विधं शुद्धं धर्मं कर्तु अहं क्षमः स्यां. ॥ ८७ ॥

अर्थः—माटे जो राज्यनो त्याग करीने तुरत महाव्रतोने स्वीकारुं, तो ते चारे प्रकारनो निर्मल धर्म करवाने हुं समर्थ थाउं.

**एवमुद्वेलसंवेगः संप्रधार्य बुधार्यमा । स व्यजिज्ञपदिष्टार्थदायकं मुनिनायकम् ॥ ८८ ॥**

अन्वयः—उद्वेल संवेगः, बुध अर्यमा सः एवं संप्रधार्य इष्ट अर्थ दायकं मुनि नायकं व्यजिज्ञपत्. ॥ ८८ ॥

अर्थः–वैराग्यना उभरावाळा तथा विद्वानोमां सूर्यसरखा एवा ते राजाए एम विचारीने वांछित पदार्थ देनारा ते मुनिमहाराजने विनंति करी के, ॥ ८८ ॥

**प्रभो ज्ञानप्रभाधीश धर्मोद्धरणकारणम् । अतुल्यं मातृवात्सल्यमिवादिष्टं त्वयाखिलम् ॥ ८९ ॥**

अन्वयः–(हे) प्रभो ! (हे) ज्ञान प्रभा अधीश ! त्वया आदिष्टं अखिलं धर्म उद्धरण कारणं मातृ वात्सल्यं इव अतुल्यं. ॥८९॥

अर्थः—हे ! स्वामी ! हे ! ज्ञानवडे सूर्यसरखा गुरुमहाराज ! आपे फरमावेलुं धर्मवडे उद्धार थवानुं सघळुं कारण माताना वात्सल्यनीपेठे अनुपम छे. ॥ ८९ ॥

**आनृण्यं पुण्यवाँल्लोके भजेत्प्रत्युपकारतः । भवभ्रमभिदस्तत्त्वोपदेशस्य न ते पुनः ॥ ९० ॥**

अन्वयः–लोके पुण्यवान् प्रत्युपकारतः आनृण्यं भजेत्, पुनः भव भ्रम भिदः ते तत्त्व उपदेशस्य न. ॥ ९० ॥

अर्थः—जगतमां पुण्यशाली माणस सामो उपकार करीने (अनृणी) करजमुक्त थाय छे, परंतु संसारनुं भ्रमण छेदनारा आपना

तत्त्वज्ञानना उपदेशनो (कोइ) अनृणी थइ शके नही. ॥ ९० ॥

**आतपोत्तापितस्येव सुधाधाराभिषेचनम् । दारिद्र्यापद्रुतस्येव चिन्तारत्नोपलम्भनम् ॥ ९१ ॥**
**महान्धकारविवरप्रविष्टस्येव दीपिका । पयोधिमध्यनिक्षिप्तस्येव प्रवहणं वरम् ॥ ९२ ॥**
**विकटाटविकागर्भभ्रष्टस्येवेष्टसार्थपः । अस्ताघकूपपतितस्येवोद्धरणमञ्चिका ॥ ९३ ॥**
**अनन्तसंसृतिभ्रान्तिश्रान्तदान्तस्य मेऽधुना । बभूव मुक्तिसंप्राप्त्यै वाहनं तव दर्शनम् ॥ ९४ ॥**

अन्वयः—आतप उत्तापितस्य सुधा धारा अभिषेचनं इव, दारिद्र्य उपद्रुतस्य चिंता-रत्न उपलंभनं इव, ॥ ९१ ॥ महाअंधकार विवर प्रविष्टस्य दीपिका इव, पयोधि मध्य निक्षिप्तस्य वरं प्रवहणं इव, ॥ ९२ ॥ विकट अटविका गर्भ भ्रष्टस्य इष्ट सार्थपः इव, अस्ताघ कूप पतितस्य उद्धरण मंचिका इव, ॥ ९३ ॥ अनंत संसृति भ्रांति श्रांत दांतस्य मे मुक्ति संप्राप्त्यै अधुना तव दर्शनं वाहनं बभूव. ॥ ९४ ॥ चतुर्भिः कलापकं ॥

अर्थः—तापथी तपेलाने अमृतधाराना स्नाननीपेठे, निर्धनताथी पीडित थयेलाने चिंतामणिरत्ननी प्राप्तिनीपेठे, ॥ ९१ ॥ अत्यंत अंधारी गुफामां दाखल थयेलाने दीपकनीपेठे, समुद्रमां पडेलाने उत्तम नावनीपेठे, ॥ ९२ ॥ भयंकर जंगलमां भूला पडेलाने मनवांछित सार्थवाहनीपेठे, अति उंडा कूआमां पडेलाने ( बहार ) निकळवानी मांचीनीपेठे, ॥ ९३ ॥ अनंत संसारमां भमवाथी थाकीने निराश थयेला एवा मने, मोक्षमां जवामाटे आपनुं आ दर्शन वाहनरूप थयेलुं छे. ॥ ९४ ॥ चतुर्भिः कलापकं ॥

ततो विस्तारितोपज्ञश्रीसर्वज्ञप्रणीतया । मम निर्ममनाथ त्वं दीक्षयानुग्रहं कुरु ॥ ९५ ॥

अन्वयः—ततः (हे) निर्ममनाथ! विस्तारित उपज्ञ श्री सर्वज्ञ प्रणीतया दीक्षया त्वं मम अनुग्रहं कुरु? ॥ ९५ ॥

अर्थः—माटे हे मुनींद्र! विस्तीर्ण ज्ञानवाळा श्रीमान् सर्वज्ञ प्रभुए प्ररूपेली दीक्षा आपवानी आप मारापर कृपा करो? ॥ ९५ ॥

पुत्रं निवेश्य राज्येऽस्मिन्यावदायाम्यहं पुनः । सप्रसादैः प्रभोः पादैः स्थेयं तावदिहैव हि ॥ ९६ ॥

अन्वयः—अस्मिन् राज्ये पुत्रं निवेश्य यावत् अहं पुनः आयामि, तावत् हि सप्रसादैः प्रभोः पादैः इह एव स्थेयं ॥ ९६ ॥

अर्थः-आ (मारां) राज्यपर पुत्रने बेसाडीने जेटलामां हुं अहीं पाछो आवुं, त्यांसुधी खरेखर (मारापर) कृपा करीने आप साहेबे अहींज स्थिरता करवी. ॥ ९६ ॥

सद्गुरूनिति विज्ञप्य प्रविश्य नगरं नृपः । राज्ये धनोत्तरं नाम पुत्रमस्थापयन्निजे ॥ ९७ ॥

अन्वयः-इति सद्गुरून् विज्ञप्य, नगरं प्रविश्य नृपः निजे राज्ये धनोत्तरं नाम पुत्रं अस्थापयत्. ॥ ९७ ॥

अर्थः-ए रीते ते सद्गुरुने विनवीने, तथा नगरमां जइने राजाए पोताना राज्यपर धनोत्तर नामना (पोताना) पुत्रने स्थापन कर्यो

मर्त्यान्विमोच्य काराभ्यो निखिलान्भग्नशृङ्खलान् । क्रीडामृगांश्च पाशेभ्यः पञ्जरेभ्यः पतत्रिणः ॥ ९८ ॥

बन्धुवर्गं व्यवस्थाप्य कृतस्नानविलेपनः । बन्दिभिर्वर्ण्यमानोऽयं गीयमानगुणो जनैः ॥ ९९ ॥

तूर्यतारवैर्भेरीभाङ्कारैः पूरयन्नभः । चैत्येष्वभ्यर्चयन्देवान्ददानो दानमद्भुतम् ॥ २२०० ॥
भर्तृमार्गानुसारिण्यो धन्या एताः क्षिताविति । श्लाघ्याभिः स्वजनैरन्तःपुरीभिः शोभितोऽभितः ॥ १ ॥
व्रतार्थिभिर्वृतो भूपैरन्वितो नवभूभुजा । चचालोदारशृङ्गारः सारकुञ्जरवाहनः ॥ २ ॥
अस्मान्मुक्त्वा ह हा स्वामी व्रतायैवं व्रजेदिति । दुःखार्तैर्वीक्षितः पौरैः क्ष्मापः प्राप वनान्तिकम् ॥ ३ ॥

अन्वयः—निखिलान् मर्त्यान् भग्न शृंखलान् काराभ्यः विमोच्य, च पाशेभ्यः क्रीडा मृगान्, पंजरेभ्यः पतत्रिणः ॥ ९८ ॥ बंधु वर्गं व्यवस्थाप्य, कृत स्नान विलेपनः बंदिभिः वर्ण्यमानः, जनैः गीयमान गुणः अयं, ॥ ९९ ॥ तूर्य तार रवैः भेरी भांकारैः नभः पूरयन्, चैत्येषु देवान् अभ्यर्चयन्, अद्भुतं दानं ददानः, ॥ २२०० ॥ भर्तृ मार्ग अनुसारिण्यः एताः क्षितौ धन्याः, इति स्वजनैः श्लाघ्याभिः अंतःपुरीभिः अभितः शोभितः, ॥ १ ॥ व्रतार्थिभिः भूपैः वृतः, नव भूभुजा अन्वितः, उदार शृंगारः, सार कुंजर वाहनः, ॥ २ ॥ ह हा ! अस्मान् मुक्त्वा स्वामी एवं व्रताय व्रजेत्, इति दुःखार्तैः पौरैः वीक्षितः क्ष्मापः वन अंतिकं प्राप. ॥ ३ ॥

अर्थः—सघळा केदीओने (तेओनी) बेडीओ तोडवापूर्वक केदखानाओमांथी छोडीने, तथा पाशोमांथी क्रीडा करवाना हरिणोने, अने पांजरांओमांथी पक्षीओने छोडीने, ॥ ९८ ॥ स्वजनवर्गनी व्यवस्था करीने, स्नान तथा विलेपन करेलो, बंदिजनोवडे प्रशंसा करातो, लोकोवडे गवाता गुणोवाळो, ॥ ९९ ॥ वाजित्रोना मनोहर शब्दोथी, तथा भेरीओना भांकारशब्दोथी आकाशने भरतो, जिनमंदिरोमां देवोनी पूजा करतो, तथा आश्चर्यकारक दान देतो, ॥ २२०० ॥ (पोताना) स्वामिना मार्गने अनुस-

रनारी आ राणीओने पृथ्वीपर धन्य छे, एम स्वजनोथी प्रशंसा पामती राणीओवडे चोतरफथी शोभितो थयेलो, ॥ १ ॥ चारित्र लेवानी इच्छावाळा राजाओवडे घेरायेलो, (गादीपर बेसाडेला) नवा राजाथी युक्त थयेलो, मनोहर शणगारेलां शरीरवाळो, उत्तम गजराजपर बेठेलो, ॥ २ ॥ हा! हा! अमोने तजीने ( आ अमारा ) स्वामी आवी रीते चारित्र ग्रहण करवामाटे जाय छे, एम दुःखथी पीडित थयेला नगरजनोवडे जोवायेलो ते पद्मोत्तर राजा (ते) बगीचानी पासे आव्यो. ॥ ३ ॥ षड्भिः कुलकं ॥

**मुक्त्वा हस्तिपरिस्यन्दं त्यक्त्वा छत्रं सचामरम् । अनुयातां क्षरद्बाष्पां क्षमयित्वा प्रजां निजाम् ॥ ४ ॥**

**इदं तेऽङ्गं कथं वत्स व्रतकष्टं सहिष्यते । इति जल्पदतुच्छास्त्रमापृच्छ्यान्तःपुरं पितुः ॥ ५ ॥**

**अहो सत्त्वमहो सत्त्वमिति साधुगणैः स्तुतः । प्रविश्योद्यानमाकल्पममुञ्चन्निर्ममो नृपः ॥ ६ ॥**

अन्वयः—हस्ति परिस्पंदं मुक्त्वा, सचामरं छत्रं त्यक्त्वा, क्षरद् बाष्पां अनुयातां निजां प्रजां क्षमयित्वा, ॥ ४ ॥ (हे) वत्स! इदं ते अंगं व्रत कष्टं कथं सहिष्यते ? इति जल्पत्, अतुच्छ अस्त्रं पितुः अंतःपुरं आपृच्छ्य, ॥ ५ ॥ अहो ! सत्त्वं ! अहो! सत्त्वं ! इति साधु गणैः स्तुतः निर्ममः नृपः उद्यानं प्रविश्य आकल्पं अमुंचत्. ॥ ६ ॥ त्रिभिर्विशेषकं ॥

अर्थः—(पछी) हाथीपरथी नीचे उतरीने चामरसहित छत्रने तजीने, तथा आंसु झरती पाछळ आवेली पोतानी प्रजाने खमावीने, ॥ ४ ॥ (हे) वत्स! आ तारुं शरीर चारित्रनुं कष्ट केम सहन करी शकशे? एम बोलती, तथा घणा आंसुओ पाडती (पोताना) पितानी राणीओनी (मातृवर्गनी) रजा लेइने, ॥ ५ ॥ तथा अहो! हिम्मत! अहो! हिम्मत! एम साधुओना समूहोथी

स्तुति कराता ते ममतारहित राजाए (ते) बगीचामां प्रवेश करीने अलंकार आदिक पोषाकनो त्याग कर्यो. ॥६॥ त्रिभिर्विशेषकं॥

**राज्यबन्धं परित्यज्य दक्षः पक्षीव पञ्जरम् । आत्मारामाभिरामां स दीक्षाशां शिश्रिये मुदा ॥ ७ ॥**

अन्वयः–सः दक्षः पक्षी पंजरं इव राज्य बंधं परित्यज्य आत्माराम अभिरामां दीक्षा आशां मुदा शिश्रिये. ॥ ७ ॥

अर्थः—(पछी) ते चतुर राजाए, पक्षी जेम पांजरांनो त्याग करे, तेम राज्यबंधननो त्याग करीने, आत्म रमणताथी मनोहर लागती, एवी दीक्षानी आशानो (दिशानो) हर्षपूर्वक आश्रय कर्यो. ॥ ७ ॥

**कृतकेशोद्धृतिर्नत्वा वज्रनाभगुरुं तदा । छत्रीभूते गुरोः पाणौ पपाठेति क्षमापतिः ॥ ८ ॥**

अन्वयः—कृत केश उध्धृतिः क्षमापतिः तदा वज्रनाभ गुरुं नत्वा, गुरोः पाणौ छत्रीभूते इति पपाठ. ॥ ८ ॥

अर्थः—(पछी) करेल छे केशोनो लोच जेणे एवा ते राजाए ते वखते श्रीवज्रनाभ गुरुमहाराजने नमस्कार करीने, ते गुरुराजनो हाथ छत्ररूप होते छते नीचेमुजब पाठ ओचर्यो. ॥ ८ ॥

**करोमि भगवन्नेवं सामायिकमिह व्रतम् । सर्वं सावद्यकं योगं प्रत्याख्यामि ध्रुवं त्रिधा ॥ ९ ॥**

अन्वयः—(हे) भगवन् ! इह एवं सामायिकं व्रतं करोमि, सर्वं सावद्यकं योगं ध्रुवं त्रिधा प्रत्याख्यामि. ॥ ९ ॥

अर्थः—हे भगवन् ! अहीं हुं आवी रीते सामायिकव्रतनो स्वीकार करुं छुं, तथा सर्व प्रकारना सावद्य योगनां खरेखर त्रण प्रकारे (मन, वचन अने कायाथी) प्रत्याख्यान करुं छुं. ॥ ९ ॥

तदा केवलिनं राजमुनिं चानम्य भक्तितः। साश्रुनेत्रः समं राज्ञा सर्वो लोकः पुरेऽगमत् ॥ १० ॥

अन्वयः—तदा केवलिनं च राजमुनिं भक्तितः आनम्य साश्रु नेत्रः सर्वः लोकः राज्ञा समं पुरे अगमत्. ॥ १० ॥

अर्थः—(पछी) ते वखते ते केवलिभगवानने तथा ते राजर्षिने भक्तिपूर्वक नमस्कार करीने, अश्रुओसहित आंखोवाळा सर्व लोको नवा राजासहित नगरमां गया. ॥ १० ॥

लब्धसंयमसाम्राज्यो यथाकल्पमनल्पधीः। विनयी विजहारैष राजर्षिर्गुरुभिः समम् ॥ ११ ॥

अन्वयः—लब्ध संयम साम्राज्यः, अनल्पधीः, विनयी एषः राजर्षिः यथाकल्पं गुरुभिः समं विजहार. ॥ ११ ॥

अर्थः—प्राप्त करेल छे संयमरूपी साम्राज्य जेणे, तथा महाबुद्धिवान, अने विनयवान एवा ते राजर्षि विधिपूर्वक गुरुमहाराजनी साथे विहार करवा लाग्या. ॥ ११ ॥

आचाराङ्गं तथा सूत्रकृच्च स्थानाङ्गमप्यथ। समवायाङ्गं विवाहप्रज्ञप्तिर्भगवत्यसौ ॥ १२ ॥

ज्ञाताधर्मकथा तस्मादुपासकदशा तथा। अथान्तकृद्दशा चानुत्तरौपपातिका दशा ॥ १३ ॥

प्रश्नव्याकरणं चात्र विपाकश्रुतमेव च। सूत्रादर्थादपीत्येकादशाङ्गान्यथ सोऽपठत् ॥ १४ ॥

अन्वयः—असौ आचारांगं तथा सूत्रकृत्, च स्थानांगं अपि, अथ समवायांगं, विवाह प्रज्ञप्तिः, भगवती, ॥ १२ ॥ ज्ञाताधर्म-

कथा, तस्मात् उपासकदशा, तथा अथ अंतकृद्दशा, च अनुत्तरौपपातिका, दशाश्रुतस्कंध, ॥ १३ ॥ च अत्र प्रश्नव्याकरणं, च विपाकश्रुतं एव, इति एकादश अंगानि अथ सः सूत्रात् अर्थात् अपि अपठत्. ॥ १४ ॥ त्रिभिर्विशेषकं ॥

अर्थः—पछी ते राजर्षिए आचारांग, सूत्रकृतांग, स्थानांग, समवायांग, विवाहप्रज्ञप्ति (भगवती), ॥ १२ ॥ ज्ञाताधर्मकथा, पछी उपासकदशा तथा अंतकृत् दशा, तथा अनुत्तरोपपातिका, दशाश्रुतस्कंध, ॥ १३ ॥ वळी प्रश्नव्याकरण तथा विपाकसूत्र, एरीते अग्यारे अंगोनो सूत्रथी अने अर्थथी पण तेमणे अभ्यास कर्यो. ॥ १४ ॥ त्रिभिर्विशेषकं ॥

**उपवासोनोदरते वृत्त्यल्पत्वं रसोज्झनम् । संलीनता वपुःक्लेश इति बाह्यं तपश्चरन् ॥ १५ ॥**

**प्रायश्चित्तं वैयावृत्यं स्वाध्यायो विनयस्तथा । कायोत्सर्गश्च सद्ध्यानं तन्वन्नित्यान्तरं तपः ॥ १६ ॥**

**स सद्वीर्यः स्फुरद्धैर्यः सुश्लिष्टान्यपि हेलया । कर्माणि जर्जरीचक्रे काननानीव कुञ्जरः ॥ १७ ॥**

अन्वयः—उपवास, ऊनोदरते, वृत्ति अल्पत्वं, रसउज्झनं, संलीनता, वपुः क्लेशः इति बाह्यं तपः चरन्, ॥१५॥ प्रायश्चित्तं, वैयावृत्त्यं, स्वाध्यायः, तथा विनयः, तथा कायोत्सर्गः, च सध्ध्यानं, नित्य आंतरं तपः तन्वन्, ॥१६॥ सद्वीर्यः, स्फुरत् धैर्यः सः, कुंजरः काननानि इव, सुश्लिष्टानि अपि कर्माणि हेलया जर्जरीचक्रे. ॥ १७ ॥ त्रिभिर्विशेषकं ॥

अर्थः—उपवास, ऊनोदरी, वृत्तिसंक्षेप, रसत्याग, संलीनता, तथा कायक्लेश, एरीते (छ प्रकारनो) बाह्य तप करता, ॥ १५ ॥ तथा प्रायश्चित्त, वैयावच्छ, स्वाध्याय, विनय, कायोत्सर्ग, तथा उत्तम ध्यान, एरीते (छ प्रकारनो) हमेशां अंतरंग तप करता,।१६।

उत्तम पराक्रमवाळा, तथा विस्तीर्ण धैर्यवाळा, ते राजर्षिए, हाथी जेम बगीचाओने तोडी पाडे, तेम अत्यंत चीकटीबेठेलां कर्मोने पण क्रीडामात्रमां तोडी पाड्यां. ॥ १७ ॥ त्रिभिर्विशेषकं ॥

**शुद्धश्रद्धानिधिः साधुर्विंशतिस्थानकान्यथ । संस्पृशन्नर्जयामास तीर्थकृन्नामकर्म सः ॥ १८ ॥**

अन्वयः–अथ शुद्ध श्रद्धा निधिः सः साधुः विंशति स्थानकानि संस्पृशन् तीर्थकृत् नाम कर्म अर्जयामास. ॥ १८ ॥

अर्थः–पछी निर्मल श्रद्धाना भंडारसरखा ते मुनिराजे वीस स्थानकोने स्पर्श करतां थकां तीर्थंकरनामकर्म उपार्जन कर्युं. ॥ १८ ॥

**तथाहि—सर्वज्ञे सर्वजन्तूनां बन्धौ श्रेयोऽध्वदर्शिनि । नमनं स्तवनं पूजानुमोदनमसौ व्यधात् ॥१९॥**

अन्वयः—तथाहि—सर्व जंतूना बंधौ, श्रेयः अध्वदर्शिनि सर्वज्ञे असौ नमनं, स्तवनं, पूजा अनुमोदनं व्यधात्. ॥ १९ ॥

अर्थः—ते कहे छे–सर्व प्राणीओना बांधवसरखा, तथा कल्याणकारी मार्गने देखाडनारा, एवा सर्वज्ञ तीर्थंकर प्रभुप्रते नमस्कार, स्तवन, तथा पूजननी अनुमोदना तेमणे करी. ॥ १९ ॥

**क्षीणकर्मसु लोकाग्रस्थितेषु स्थिरमानसः । अयं ध्यानविधानेन सिद्धेष्वाराधनां दधौ ॥ २० ॥**

अन्वयः—क्षीण कर्मसु, लोक अग्र स्थितेषु सिद्धेषु स्थिरमानसः अयं ध्यान विधानेन आराधनां दधौ. ॥ २० ॥

अर्थः—क्षय पामेलां छे कर्मो जेमनां, तथा लोकना अग्र भागपर रहेला एवा सिद्ध भगवानोनी स्थिर चित्तवाळा एवा ते मुनिराजे ध्यान धरवापूर्वक आराधना करी. ॥ २० ॥

**श्रीसङ्घरूपे सिद्धान्तरूपे प्रवचने मुनिः । आज्ञानतिक्रमेणैष स्वशक्त्या भक्तिमानभूत् ॥ २१ ॥**

अन्वयः—एषः मुनिः श्रीसंघरूपे सिद्धांतरूपे प्रवचने आज्ञा अनतिक्रमेण स्वशक्त्या भक्तिमान् अभूत्. ॥ २१ ॥

अर्थः—वळी ते मुनिराज श्रीमान् चतुर्विध संघरूपी तथा आगमरूपी प्रवचनमां आज्ञानुं उल्लंघन नही करता थका पोतानी शक्तिमुजब भक्तिवाळा थया. ॥ २१ ॥

**अयं महाव्रताधारे शुद्धधर्मोपदेशिनि । आदेशवश्यचित्तत्वादर्चां व्यरचयद् गुरौ ॥ २२ ॥**

अन्वयः—अयं महाव्रत आधारे, शुद्ध धर्म उपदेशिनि गुरौ आदेश वश्य चित्तत्वात् अर्चां व्यरचयत्. ॥ २२ ॥

अर्थः—वळी ते मुनिराज पांच महाव्रतोने धरनारा, तथा निर्दोष धर्मनो उपदेश आपनारा गुरुप्रते, तेमनी आज्ञामुजब हृदयनुं वर्तन राखीने, तेमनी सेवा करवा लाग्या. ॥ २२ ॥

**समवायाङ्गविज्ञेषु वयोव्रतमहत्स्वपि । स्थविरेषु स्थिरामेष भक्तिं भेजे भवच्छिदे ॥ २३ ॥**

अन्वयः—एषः समवायांग विज्ञेषु, वयः व्रत महत्सु स्थविरेषु अपि भवच्छिदे स्थिरां भक्तिं भेजे. ॥ २३ ॥

अर्थः—वळी ते मुनिराज समवायांगना जाणकार, तथा वय अने व्रतथी म्होटा एवा स्थविरोनी पण संसारभ्रमण टाळवामाटे स्थिर थइने भक्ति करवा लाग्या. ॥ २३ ॥

**श्रेयान्सूत्रधरादर्थधरः सूत्रार्थभृत्ततः । इति क्रमाद्व्यधाद्भक्तिं कृती श्रुतधरेष्वसौ ॥२४॥**

अन्वयः—सूत्रधरात् अर्थधर श्रेयान्, ततः सूत्र अर्थ भृत्, इति असौ कृती क्रमात् श्रुतधरेषु भक्तिं व्यधात्. ॥ २४ ॥

अर्थः—सूत्रधरथी अर्थधरः श्रेष्ट छे, अने तेथी पण सूत्र अने अर्थ, बन्नेने धारण करनार श्रेष्ट छे, एम विचारीने ते विद्वान् मुनिराज अनुक्रमे तेवा श्रुतधरोनी भक्ति करवा लाग्या. ॥ २४ ॥

**तपस्तीव्रं वितन्वत्सु तपस्विषु तपोनिधिः । शुश्रूषामेष निःशेषां शुद्धश्रद्धाधरोऽकरोत् ॥ २५ ॥**

अन्वयः—तपोनिधिः, शुद्ध श्रद्धा धरः एषः, तीव्रं तपः वितन्वत्सु तपस्विषु निःशेषां शुश्रूषां अकरोत्. ॥ २५ ॥

अर्थः—तपना भंडारसरखा, तथा निर्मल श्रद्धाने धारण करनारा ते मुनिराज, आकरो तप करनारा तपस्वी मुनिराजोनी सर्व प्रकारनी शुश्रूषा करवा लाग्या. ॥ २५ ॥

**पठने गुणनेऽर्थे च सिद्धान्तस्य मुहुर्मुहुः । चिरं तदेकचित्तत्वादुपयोगमयं दधौ ॥ २६ ॥**

अन्वयः—अयं सिद्धांतस्य पठने, गुणने, च अर्थे चिरं तत् एक चित्तत्वात् मुहुः मुहुः उपयोगं दधौ. ॥ २६ ॥

अर्थः—वळी ते मुनिराज, आगमोना अभ्यासमां, पाठमां तथा तेनो अर्थ धारवामां घणा समयसुधी तेमांज (पोतानुं) मन राखीने वारंवार तेमां उपयोग देवा लाग्या. ॥ २६ ॥

**सर्वज्ञधर्मसर्वस्वे सिद्धिसंधिविधायिनि । अयं विरचयामास सम्यक्त्वे निश्चलं मनः ॥ २७ ॥**

अन्वयः—अयं सर्वज्ञ धर्म सर्वस्वे, सिद्धि संधि विधायिनि सम्यक्त्वे मनः निश्चलं विरचयामास. ॥ २७ ॥

अर्थः—वळी ते राजर्षि तीर्थंकर प्रभुना धर्मना सर्वसारभूत, तथा मुक्तिनो मेलाप करावनारा, एवा सम्यक्त्वनी अंदर (पोताना) मनने निश्चल करवा लाग्या. ॥ २७ ॥

**ज्ञानस्य ज्ञानपात्रस्य विनये गुणचक्रिणि । नातिचारं चकारायमन्तरायं शिवश्रियः ॥ २८ ॥**

अन्वयः–ज्ञानस्य, ज्ञान पात्रस्य, गुण चक्रिणि विनये अयं शिव श्रियः अंतरायं अतिचारं न चकार. ॥ २८ ॥

अर्थः–ज्ञाननो तथा ज्ञानना पात्ररूप ज्ञानीनो, गुणशिरोमणि एवो विनय करवामां ते राजर्षि, मोक्षलक्ष्मीने अटकावनारो (जरुर पडचे पण) अतिचार न लगाडवा लाग्या. ॥ २९ ॥

**भवाकूपारपारेषु व्यापारेषु व्रतश्रियाम् । आवश्यकेषु सोऽवश्यं नातिचारपरोऽजनि ॥ २९ ॥**

अन्वयः—भव अकूपार पारेषु, व्रत श्रियां व्यापारेषु आवश्यकेषु सः अवश्यं अतिचार परः न अजनि. ॥ २९ ॥

अर्थः—संसाररूपी महासागरना किनारासरखी, तथा व्रतलक्ष्मीनी व्यापारभूत एवी आवश्यक क्रियामां ते निश्चयपणे अतिचार रहित थया. ॥ २९ ॥

**शीले पुण्यलतामूले मूलोत्तरगुणेष्वपि । अयं दधार धर्मैकरतिर्निरतिचारताम् ॥ ३० ॥**

अन्वयः–धर्म एक रतिः अयं, पुण्य लता मूले शीले, मुल उत्तर गुणेषु अपि निरतिचारतां दधार. ॥ ३० ॥

अर्थः—वळी धर्ममांज एक प्रेम छे जेमने, एवा ते राजर्षि, पुण्यरूपी वल्लीना मूलसरखुं शील पालवामां, तेमज मूलगुणो अने

उत्तरगुणोमां पण अतिचाररहितपणुं धरवा लाग्या. ॥ ३० ॥

**अयं काले क्षणलवप्रमाणेऽप्यप्रमत्तधीः । ध्यानासेवनसंवेगभावनादीनि नामुचत् ॥ ३१ ॥**

अन्वयः-क्षण लव प्रमाणे अपि काले अप्रमत्त धीः अयं ध्यान आसेवन संवेग भावना आदीनि न अमुचत्. ॥ ३१ ॥

अर्थः—क्षण अने लवजेटला समयमां पण प्रमादरहित बुद्धिवाळा ते राजर्षि ध्यान, आसेवन, संवेग तथा भावना आदिकने तजता नही. ॥ ३१ ॥

**निक्षिप्तमङ्गमूषायां ज्वलितेन तपोऽग्निना । असौ सुवर्णमात्मानमहर्निशमशोधयत् ॥ ३२ ॥**

अन्वयः-असौ अंग मूषायां निक्षिप्तं आत्मानं सुवर्णं ज्वलितेन तपः अग्निना अहर्निशं अशोधयत्. ॥ ३२ ॥

अर्थः-वळी ते राजर्षि शरीररूपी धातु गाळवानी कुलडीमां नाखेला (पोताना) आत्मारूपी सुवर्णने जाज्वल्यमान तपरूपी अग्निवडे रातदहाडो शुद्ध करता हता. ॥ ३२ ॥

**वस्त्रपुस्तकपात्रान्नमुख्यं स मुनिशेखरः । आनीयानीय साधुभ्यः शुद्धं श्रद्धाश्रयो ददौ ॥ ३३ ॥**

अन्वयः-श्रद्धा आश्रयः सः मुनि शेखरः शुद्धं वस्त्र पुस्तक पात्र अन्न मुख्यं आनीय आनीय साधुभ्यः ददौ. ॥ ३३ ॥

अर्थः-श्रद्धाना स्थानरूप, एवा ते मुनिराज शुद्ध वस्त्र, पुस्तक, पात्र तथा आहारआदिक लावी लावीने साधुओने आपवा लाग्या.

**एष ग्लानेषु बालेषु गुरुषु स्फुरितादरः । नित्यं सर्वजनस्तुत्यं वैयावृत्यं व्यधत्त सः ॥ ३४ ॥**

अन्वयः—स एषः ग्लानेषु, बालेषु नित्यं स्फुरित आदरः सर्व जन स्तुत्यं वैयावृत्त्यं व्यधत्त. ॥ ३४ ॥
अर्थः—वळी ते राजर्षि, रोगी तथा बालसाधुओप्रते, अने गुरुमहाराजप्रते विस्तीर्ण आदरमानवाळा थया थका, सर्वलोकोने प्रशंसा करवालायक वैयावच्छ करवा लाग्या. ॥ ३४ ॥

**केनापि कारणेनोच्चैरसमाधिगतं मनः । सर्वेषां प्रापयामास समाधिमयमाधिभित् ॥ ३५ ॥**

अन्वयः—आधिभित् अयं केन अपि कारणेन उच्चैः असमाधि गतं सर्वेषां मनः समाधिं प्रापयामास. ॥ ३५ ॥
अर्थः—मननी पीडाने भेदनारा ते मुनिराज, कोइ पण कारणथी अति असंतुष्ट थयेलां सर्वना मनने संतुष्ट करवा लाग्या. ॥३५॥

**नित्यं नवनवं ज्ञानं ज्ञानावरणकर्महृत् । श्रवणाध्ययनव्याख्यानुग्रहैरयमग्रहीत् ॥ ३६ ॥**

अन्वयः—ज्ञान आवरण कर्म हृत् अयं नित्यं श्रवण अध्ययन व्याख्या अनुग्रहैः नवनवं ज्ञानं अग्रहीत्. ॥ ३६ ॥
अर्थः—ज्ञानावरणीय कर्मने हणनारा ते राजर्षि हमेशां श्रवण, अभ्यास, तथा तेना व्याख्यानद्वारा नवुं नवुं ज्ञान मेळववा लाग्या.

**आनन्दमग्नो रोमाञ्चस्तोमाञ्चिततनुश्चिरम् । श्रुते भक्त्या ददौ चित्तं लोलमौलिर्मुहुर्मुहुः ॥ ३७ ॥**

अन्वयः—आनंद मग्नः, रोमांच स्तोम अंचित तनुः, चिरं लोल मौलिः मुहुः मुहुः भक्त्या श्रुते चित्तं ददौ. ॥ ३७ ॥
अर्थः—आनंदमां मग्न थयेला, तथा रोमांचना समूहथी शोभायुक्त शरीरवाळा ते मुनिराज घणा काळसुधी मस्तकने कंपावता थका वारंवार भक्तिपूर्वक श्रुतज्ञानमां हृदय चोटाडवा लाग्या. ॥ ३७ ॥

धर्मव्याख्यान्यवादीन्द्रप्रत्याख्याकवितादिभिः । गुणैर्जज्ञे स सर्वज्ञशासनस्य प्रभावकः ॥ ३८ ॥

अन्वयः-धर्म व्याख्या, अन्यवादींद्र प्रत्याख्या, कविता आदिभिः गुणैः सः सर्वज्ञ शासनस्य प्रभावकः जज्ञे. ॥ ३८ ॥

अर्थः—धर्मदेशना, प्रतिपक्षी महान् वादीने जीतवुं, तथा काव्यरचना आदिक गुणोवडे ते मुनिराज श्रीजिनेश्वरप्रभुना शासनना प्रभावनो विस्तार करनारा प्रभावक थया. ॥ ३८ ॥

इत्युपार्जिततीर्थेशनामकर्मा समाहितः । व्रतिव्रातवृतो विश्वं बोधयन्विजहार सः ॥ ३९ ॥

अन्वयः—इति उपार्जित तीर्थेश नाम कर्मा, समाहितः, व्रति व्रात वृतः सः विश्वं बोधयन् विजहार. ॥ ३९ ॥

अर्थः—एरीते उपार्जन करेल छे तीर्थंकरनामकर्म जेमणे, तथा समतामां रहेला, अने मुनिओना समूहथी वींटायेला ते मुनिराज जगतने प्रतिबोधताथका विचरवा लाग्या. ॥ ३९ ॥

दक्षाः साक्षात्परोलक्षास्तस्यामृतकिरं गिरम् । पातुमीयुः खगोत्तंसा हंसा इव नदीं दिवः ॥ ४० ॥

अन्वयः—परोलक्षाः दक्षाः खगउत्तंसाः हंसाः नदीं इव साक्षात् तस्य अमृतकिरं गिरं पातुं दिवः ईयुः. ॥ ४० ॥

अर्थः—लाखोगमे चतुर, तथा आकाशगामीओमां शिरोमणिसरखा विद्याधरो, हंसो जेम नदीप्रते, तेम साक्षात् ते मुनिराजनी अमृत झरनारी वाणीनुं पान करवामाटे आकाशमांथी आवता हता. ॥ ४० ॥

तपोलब्धिभिराकृष्टाः सुरासुरनरोरगाः । तमसेवन्त विनयं धिषणादिगुणा इव ॥ ४१ ॥

अन्वयः—धिषणा आदि गुणाः विनयं इव, तपः लब्धिभिः आकृष्टाः सुर असुर नर उरगाः तं असेवंत. ॥ ४१ ॥

अर्थः—बुद्धि आदिक गुणो जेम विनयने सेवे छे, तेम तपथी प्राप्त थयेली लब्धिओथी खेंचाइ आवेला देवो, दानवो, मनुष्यो, तथा भुवनपतिओ ते मुनिराजने सेववा लाग्या. ॥ ४१ ॥

**एवं धात्रीं चरित्रेण पवित्रीकृत्य स व्रती । भवाभोगमहारोगभङ्गायानशनार्थ्यभूत् ॥ ४२ ॥**

अन्वयः—एवं चरित्रेण सः व्रती धात्रीं पवित्रीकृत्य भव आभोग महारोग भंगाय अनशन अर्थी अभूत्. ॥ ४२ ॥

अर्थः—ए रीते (पोताना) चरित्रवडे (विहारवडे) ते मुनिराज पृथ्वीने पवित्र करीने, संसार भ्रमणरूपी महान् रोगने टाळवामाटे अनशन करवानी इच्छावाळा थया. ॥ ४२ ॥

**विज्ञाय केवलज्ञानी वज्रनाभः प्रभुस्ततः । तत्पुण्यैस्तत्तदा स्थानं प्राप पापहरो गुरुः ॥ ४३ ॥**

अन्वयः—ततः केवलज्ञानी वज्रनाभः पापहरः गुरुः प्रभुः विज्ञाय तदा तत् पुण्यैः तत् स्थानं प्राप. ॥ ४३ ॥

अर्थः–पछी केवलज्ञानी, तथा पापोना हरनारा, भगवान् श्री वज्रनाभ गुरु (पण) ते हकीकत जाणीने, ते वखते ते राजर्षिना पुण्योथी ते स्थानके पधार्या. ॥ ४३ ॥

**तस्यानशनचित्तस्य मुदेऽभूद् गुरुदर्शनम् । यथा चन्दनसिक्तस्य मलयानिलसंगमः ॥ ४४ ॥**

अन्वयः–चंदन सिक्तस्य यथा मलय अनिल संगमः, (तथा) अनशन चित्तस्य तस्य गुरु दर्शनं मुदे अभूत्. ॥ ४४ ॥

अर्थः–चंदनथी सिंचायेला मनुष्यने जेम मलयाचलना वायुनो संगम हर्षकारक थाय छे, तेम अनशन करवानी इच्छावाळा ते मुनिराजने गुरुमहाराजनुं दर्शन आनंदकारक थयुं. ॥ ४४ ॥

**अथ हर्षोल्लसद्रोमहर्षो राजर्षिशेखरः । गुरुपादाब्जयोर्भृङ्गभङ्गीमङ्गीचकार सः ॥ ४५ ॥**

अन्वयः–अथ हर्ष उल्लसत् रोम हर्षः सः राजर्षि शेखरः गुरु पाद अब्जयोः भृंग भंगीं अंगीचकार. ॥ ४५ ॥

अर्थः–पछी हर्षथी उल्लास पामेला रोमांचवाळा ते राजर्षिशिरोमणि, ते गुरुमहाराजना चरणोरूपी कमलमां भ्रमरनी लीलाने धारण करवा लाग्या. ॥ ४५ ॥

**असावनशनं साधुराधाय गुरुसंनिधौ । चक्रे ललाटघटिताञ्जलिरालोचनामिति ॥ ४६ ॥**

अन्वयः–असौ साधुः अनशनं आधाय गुरु संनिधौ ललाट घटित अंजलिः इति आलोचनां चक्रे. ॥ ४६ ॥

अर्थः–(पछी) ते मुनिराजे अनशन करीने, गुरुमहाराजनी समीप मस्तकपर हाथ जोडीने नीचेमुजब आलोचना करवा मांडी.

**चिरमव्यवहाराख्यराशौ निवसता मया । अनन्तजन्तुसन्तानं यद्दूनं क्षमयामि तत् ॥ ४७ ॥**

अन्वयः–चिरं अव्यवहार आख्य राशौ निवसता मया, अनंत जंतु संतानं यत् दूनं, तत् क्षमयामि. ॥ ४७ ॥

अर्थः–घणा काळसुधी अव्यवहार नामनी राशिमां (निगोदमां) वसता एवा में अनंत प्राणीओना समूहने जे दुभाव्याछे, तेमाटे तेमनी हुं क्षमा मागुं छुं. ॥ ४७ ॥

**व्यवहाराख्यराशौ च पृथ्वीकायभृता मया । लोहलोष्टोपलीभूय ये दूनाः क्षमयामि तान् ॥ ४८ ॥**

अन्वयः–च व्यवहार आख्य राशौ पृथ्वीकाय भृता मया, लोह लोष्ट उपलीभूय ये दूनाः तान् क्षमयामि. ॥ ४८ ॥

अर्थः–वळी व्यवहार नामनी राशिमां पृथ्वी कायरूपे जन्मेला एवा में लोखंड, माटीना पोढां, तथा पत्थररूप थइने जे जीवोने में दूभावेला होय, तेओनी हुं क्षमा मागुं छुं. ॥ ४८ ॥

**नदीनदीशकूपेषु जलरूपेण ये मया । जन्तवः संश्रिताः केऽपि संहृताः क्षमयामि तान् ॥ ४९ ॥**

अन्वयः—नदी नदी ईश कूपेषु जलरूपेण मया ये के अपि संश्रिताः जंतवः संहृताः तान् क्षमयामि. ॥ ४९ ॥

अर्थः—नदी, महासागर तथा कूआओमां जलरूपे जन्मेला एवा में, जे कोइ आश्रित जंतुओने पीड्या होय, तेओनी पण हुं क्षमा मागुं छुं. ॥ ४९ ॥

**प्रदीपनतडिद्दावदीपप्रभृतिमूर्तिना । ये मया जघ्निरे तेजस्कायेन क्षमयामि तान् ॥ ५० ॥**

अन्वयः–प्रदीपन तडित् दाव दीप प्रभृति मूर्तिना, तेजस्कायेन मया ये जघ्निरे, तान् क्षमयामि. ॥ ५० ॥

अर्थः—अग्नि, वीजळी, दावानल तथा दीपकआदिक आकारवाळा तेजस्कायमां जन्मेला एवा में जे जीवोनो विनाश करेलो होय, ते सर्व जीवोनी हुं क्षमा मागुं छुं. ॥ ५० ॥

**महावृष्टिहिमग्रीष्मधूलिदुर्गन्धबन्धुना । ये मया वायुकायेन व्यथिताः क्षमयामि तान् ॥ ५१ ॥**

अन्वयः—महावृष्टि हिम ग्रीष्म धूलि दुर्गंध बंधुना वायुकायेन मया ये व्यथिताः तान् क्षमयामि. ॥ ५१ ॥

अर्थः-अतिवृष्टि, हिम, ग्रीष्मऋतु, धूल, तथा दुर्गंधनी साथे रहीने, वायुकायरूपे जन्मेला एवा में जे जीवोने दुभव्या होय, तेओनी हुं क्षमा मागुं छुं. ॥ ५१ ॥

**पीडिता दण्डकोदण्डकाण्डस्यन्दनताभृता । ये वनस्पतिनात्मानो मयात्र क्षमयमि तान् ॥ ५२ ॥**

अन्वयः—दंड कोदंड कांड स्यंदनता भृता वनस्पतिना मया अत्र ये पीडिताः तान् क्षमयामि. ॥ ५२ ॥

अर्थः-दंड, धनुष, बाण तथा रथआदिकनुं स्वरूप धारण करनारा, अने वनस्पतिकायमां जन्मेला एवा में अहीं जे जीवोने दुभव्या होय, तेओनी हुं क्षमा मागुं छुं. ॥ ५२ ॥

**अथ कर्मवशादाप्य त्रसतामसता मया । रागद्वेषमदान्धेन येऽर्दिताः क्षमयामि तान् ॥ ५३ ॥**

अन्वयः-अथ कर्म वशात् त्रसतां आप्य असता मया राग द्वेष मद अंधेन ये अर्दिताः तान् क्षमयामि. ॥ ५३ ॥

अर्थः—वळी कर्मवशे त्रसपणुं पामीने दुर्बुद्धि एवा में, राग, द्वेष तथा मदमां अंध थइने जे जीवोने दुभव्या होय, तेओनी पण हुं क्षमा मागुं छुं. ॥ ५३ ॥

**अपराधं क्षमन्तां मे तेऽपि सर्वत्र जन्तवः । सर्वभूतेषु मे मैत्र्यमास्तां वैरं न कुत्रचित् ॥ ५४ ॥**

अन्वयः-सर्वत्र ते जंतवः अपि मे अपराधं क्षमंतां, सर्व भूतेषु मे मैत्र्यं आस्तां, कुत्रचित् वैरं न. ॥ ५४ ॥

अर्थः—सर्व जगोए रहेला ते सर्वे प्राणीओ पण मारा अपराधनी क्षमा करजो ? सर्व प्राणीओमां मारी मित्राइ होजो ? कोइनी पण साथे (मारे) वैरभाव नथी. ॥ ५४ ॥

**महाव्रतेषु यः कश्चिदतीचारः कृतो मया । मिथ्या मे दुष्कृतं तत्र भवताद् गुरुसाक्षिकम् ॥ ५५ ॥**

अन्वयः—महाव्रतेषु यः कश्चित् अतीचारः मया कृतः, तत्र गुरुसाक्षिकं मे दुष्कृतं मिथ्या भवतात्. ॥ ५५ ॥

अर्थः—पांचे महाव्रतोनी अंदर जे कोइ अतीचार में लगाड्यो होय, ते संबंधि आ गुरुमहाराजनी साक्षीए मारुं दुष्कृत मिथ्या थाओ ?

**राशावव्यवहाराख्येऽनन्तजन्तुप्रघट्टनात् । यया मे कर्म कृत्तं तां पीडामप्यनुमोदये ॥ ५६ ॥**

अन्वयः—अव्यवहार आख्ये राशौ अनंत जंतु प्रघट्टनात् यया मे कर्म कृत्तं, तां पीडां अपि अनुमोदये. ॥ ५६ ॥

अर्थः—अव्यवहार नामनी राशिमां अनंता जीवोना संघट्टथी जे पीडावडे में मारुं कर्म खपाव्युं छे, ते पीडानी पण हुं अनुमोदना करुं छुं. ॥ ५६ ॥

**जिननां प्रतिमाचैत्यभृङ्गारमुकुटादिषु । यो मे पृथ्वीमयः कायो जज्ञे तमनुमोदये ॥ ५७ ॥**

अन्वयः—जिनानां प्रतिमा चैत्य भृंगार मुकुट आदिषु यः पृथ्वीमयः मे कायः जज्ञे, तं अनुमोदये. ॥ ५७ ॥

अर्थः—जिनेश्वरप्रभुओनी प्रतिमा, मंदिर, कळश तथा मुकुटआदिकोमां जे पृथ्वीकायनुं मारुं शरीर उपयोगमां आव्युं होय, तेना संबंधमां हुं अनुमोदना करुं छुं. ॥ ५७ ॥

जिनस्नानेषु पात्रेषु दैवादुपकृतो भवेत् । यो मे जलमयः कायः प्रायस्तमनुमोदये ॥ ५८ ॥

अन्वयः—दैवात् यः मे जलमयः कायः जिन स्नात्रेषु पात्रेषु उपकृतः भवेत्, प्रायः तं अनुमोदये. ॥ ५८ ॥

अर्थः—(वळी) दैवयोगे जे मारुं अप्कायसंबंधी शरीर, जिनेश्वरप्रभुना स्नात्रमाटे, तथा सुपात्र मुनिराजोना उपयोगमां आव्युं होय, तेनी प्रायें करीने हुं अनुमोदना करुं छुं. ॥ ५८ ॥

धूपाङ्गारे च दीपे च जिनानां पुर एव यः । मम तेजोमयः कायो जातस्तमनुमोदये ॥ ५९ ॥

अन्वयः—यः मम तेजोमयः कायः जिनानां पुरः एव धूप अंगारे च दीपे जातः, तं अनुमोदये. ॥ ५९ ॥

अर्थः—(वळी) जे मारुं तेजस्कायनुं शरीर, जिनेश्वरप्रभुनी पासेज धूपमाटेना अंगाराओमां, अने दीपकमां उपयोगी थयुं होय, ते माटे हुं अनुमोदना करुं छुं. ॥ ५९ ॥

धूपोत्क्षेपेऽर्हतां सङ्घे श्रान्ते वा तीर्थवर्त्मसु । यो मे वायुमयः कायो ववौ तमनुमोदये ॥ ६० ॥

अन्वयः—अर्हतां धूप उत्क्षेपे, वा तीर्थवर्त्मसु श्रांते संघे यः मे वायुमयः कायः ववौ, तं अनुमोदये. ॥ ६० ॥

अर्थः—अरिहंतप्रभुपासे धूपने प्रज्ज्वलित करवामां, तथा तीर्थयात्रामाटे मार्गमां चालता, अने तेथी थाकी गयेला संघनी शांतिमाटे, जे मारुं वायुकायनुं शरीर उपयोगी थयुं होय, तेनी हुं अनुमोदना करुं छुं. ॥ ६० ॥

मुनीनां पात्रदण्डेषु जिनार्चाकुसुमेषु च । मम द्रुममयः कायो योऽभूत्तमनुमोदये ॥ ६१ ॥

अन्वयः–मुनीनां पात्र दंडेषु, जिन अर्चा कुसुमेषु, यः मम द्रुममयः कायः अभूत्, तं अनुमोदये. ॥ ६१ ॥

अर्थः–मुनिओनां पात्र, तथा दंडोमां, अने जिनपूजनमाटेना पुष्पोमां जे मारी वनस्पतिमय काया उपयोगमां आवी होय, तेनी हुं अनुमोदना करुं छुं, ॥ ६१ ॥

**क्वापि सत्कर्मयोगेन जिनधर्मोपकारकः । आसीत् त्रसमयः कायो यो मे तमनुमोदये ॥ ६२ ॥**

अन्वयः–सत्कर्म योगेन यः मे त्रसमयः कायः क्व अपि जिन धर्म उपकारकः आसीत्, तं अनुमोदये. ॥ ६२ ॥

अर्थः—शुभ कर्मना योगथी जे मारुं त्रस जीवनुं शरीर क्यांयें पण जैन धर्ममाटे उपकारी थयुं होय, तेनी हुं अनुमोदना करुंछुं.

**इत्यनन्तभवोपात्तं दुष्कृतौघमगर्हत । कदाचिद्रचितं किंचित्सुकृतं चान्वमोदत ॥ ६३ ॥**

अन्वयः–इति अनंत भव उपात्तं दुष्कृत ओघं अगर्हत, च कदाचित् किंचित् सुकृतं रचितं अन्वमोदत. ॥ ६३ ॥

अर्थः–एरीते अनंता भवोमां प्राप्त करेलां पापोना समूहनी (तेणे) निंदा करी, तथा कोइ वखते कंइंक जे पुण्य कर्युं होय, तेनी अनुमोदना करी. ॥ ६३ ॥

**शरणं तीर्थकृत्सिद्धसाधुधर्मा भवन्तु मे । इत्यालापप्रथः सोऽथ चतुःशरणमाश्रितः ॥ ६४ ॥**

अन्वयः–अथ तीर्थकृत् सिद्ध साधु धर्माः मे शरणं भवंतु, इति आलापप्रथः सः चतुःशरणं आश्रितः. ॥ ६४ ॥

अर्थः—हवे श्रीजिनेश्वरप्रभु, सिद्ध, साधु तथा सर्वज्ञप्रणित धर्म, मने शरणरूप थाओ ? एम बोलताथका ते राजर्षि चारे शरणा

नो आश्रय करवा लाग्या. ॥ ६४ ॥

परित्यक्तनिदानोऽसौ मृत्युजीवितनिःस्पृहः । भवमोक्षनिराकाङ्क्षः समाधिं साधुरासदत् ॥ ६५ ॥

अन्वयः—परित्यक्त निदानः, मृत्यु जीवित निःस्पृहः, भव मोक्ष निराकांक्षः असौ साधुः समाधिं आसदत्. ॥ ६५ ॥

अर्थः—तजेल छे नियाणुं जेमणे एवा, मरण जीवननी लालच विनाना, अने संसार तथा मोक्षनी पण आकांक्षारहित एवा ते मुनिराज सामाधिने प्राप्त थया. ॥ ६५ ॥

वारं वारं नमस्कारानुच्चरन्परमेष्ठिनाम् । गतप्रमादो निस्तापः प्राप साधुरयं लयम् ॥ ६६ ॥

अन्वयः—वारंवार परमेष्ठिनां नमस्कारान् उच्चरन, गत प्रमादः, निस्तापः अयं साधुः लयं प्राप. ॥ ६६ ॥

अर्थः—वारंवार पंचपरमेष्ठिना नमस्कारोनो उच्चार करता थका, प्रमाद रहित तथा संताप विनाना ते साधु पंचत्व पाम्या. ॥६६॥

एवं समाधिलब्धस्य मृत्योर्बाधामसंविदन् । पूर्णमासोपवासोऽयं प्रपेदे प्राणतं दिवम् ॥ ६७ ॥

अन्वयः—एवं समाधि लब्धस्य मृत्योः बाधां असंविदन् पूर्ण मास उपवासः अयं प्राणतं दिवं प्रपेदे. ॥ ६७ ॥

अर्थ—एवीरीते समाधिपूर्वक प्राप्त थयेलां मरणनी पीडाने नही अनुभवता, तथा संपूर्ण एक मासना उपवासी एवा ते राजर्षि प्राणत देवलोकमां गया. ॥ ६७ ॥

सुरश्चन्द्रप्रभासाख्ये विमानेऽतिमहर्द्धिकः । अन्तर्मुहूर्तात्पर्याप्तसर्वपर्याप्तिवैभवः ॥ ६८ ॥

तलपप्रच्छादनं प्रातः संध्याकालमिवार्यमा । उत्सार्याविरभूदेष प्रभाप्राग्भारभासुरः ॥ ६९ ॥ युग्मम् ॥

अन्वयः–चंद्रप्रभास आख्ये विमाने, अति महर्द्धिकः, अंतर्मुहूर्तात् पर्याप्त सर्व पर्याप्ति वैभवः, अर्यमा प्रातः संध्याकालं इव तल्प प्रच्छादनं उत्सार्य, एषः प्रभा प्राग्भार भासुरः सुरः आविरभूत्. ॥ ६८ ॥ ६९ ॥ युग्मं ॥

अर्थः–(त्यां) चंद्रप्रभासनामना विमानमां अतिम्होटी समृद्धिवाळा, अंतर्मुहूर्तमांज मळेल छे सर्व पर्याप्तिओनो वैभव जेमने एवा, तथा सूर्य जेम प्रभातनी संध्याने दूर करीने प्रगट थाय छे, तेम शय्यानुं आवरण दूर करीने ते मुनिराज तेजना समूहथी देदीप्यमान, एवा देवपणे उत्पन्न थया. ॥ ६८ ॥ ६९ ॥ युग्मं ॥

कैः पुण्यैरियमुत्पन्ना ममर्द्धिरिति विस्मितः । अवधिज्ञानविज्ञातं प्राग्भवं सोऽन्वमोदत ॥ ७० ॥

अन्वयः—कैः पुण्यैः इयं मम ऋद्धिः उत्पन्ना? इति विस्मितः सः अवधि ज्ञान विज्ञातं प्राग्भवं अन्वमोदत. ॥ ७० ॥

अर्थः–कयां पुण्योवडे आ मारी समृद्धि उत्पन्न थइ छे? एम आश्चर्य पामेलो ते देव, अवधिज्ञानथी जाणेला (पोताना) पूर्व भवने अनुमोदवा लाग्यो. ॥ ७० ॥

तद्विमानपरीवारः सुरवारस्तदोत्सवान् । चकार तत्पुरः स्फारस्फुरज्जयजयारवः ॥ ७१ ॥

अन्वयः–तदा तत् विमान परीवारः सुरवारः स्फार स्फुरत् जय जय आरवः, तत्पुरः उत्सवान् चकार. ॥ ७१ ॥

अर्थः–ते वखते ते विमानना परीवाररूप देवोनो समूह म्होटेथी जय जय शब्द करतो थको तेनी आगळ महोत्सवो करवा लाग्यो.

नाथ नस्त्वमनाथानां नाथः पुण्यैः प्रकल्पितः । चिरं जय चिरं जीव चिरं पाह्यनुजीविनः ॥७२॥

अन्वयः—(हे) नाथ ! त्वं पुण्यैः नः अनाथानां नाथः प्रकल्पितः, चिरं जय ? चिरं जीव ? अनुजीविनः चिरं पाहि ? ॥७२॥

अर्थः—हे स्वामी ! तमो पुण्ययोगे अमो अनाथोना स्वामी तरीके उत्पन्न थया छो, ( माटे तमो ) घणा कालपर्यंत जय पामो ? चिरकाळसुधी जीवो, तथा (अमो) नोकरोनुं चिरकाल पालन करो ? ॥ ७२ ॥

इत्यादिवादी देवानां देवोनां च समुच्चयः । तं ननाम प्रतेने च पञ्चशब्दोदयं मुदा ॥ ७३ ॥

अन्वयः—इत्यादिवादी देवानां च देवीनां समुच्चयः तं ननाम, च मुदा पंच शब्द उदयं प्रतेने. ॥ ७३ ॥

अर्थः—इत्यादिक बोलतो ते देवोनो तथा देवीओनो समूह तेने नमवा लाग्यो, अने हर्षथी पांचे प्रकारना शब्दोवाळां (वाजित्रोनो) नाद करवा लाग्यो. ॥ ७३ ॥

रङ्गदुत्तुङ्गमङ्गल्यः पल्यङ्कादुत्थितस्ततः । कृतवैक्रियरूपर्द्धिः क्रीडावापीमवाप सः ॥ ७४ ॥

अन्वयः—ततः रंगत् उत्तुंग मंगल्यः सः पल्यंकात् उत्थितः, कृत वैक्रिय रूप ऋद्धिः क्रीडा वापीं अवाप. ॥ ७४ ॥

अर्थः—पछी महान् मंगलीकना विस्तारवाळो ते देव पलंगपरथी उठ्यो, तथा वैक्रिय स्वरूपनी समृद्धि विकुर्वीने ते क्रीडा करवानी वावप्रते गयो. ॥ ७४ ॥

सस्नौ स तत्र विक्षोभोल्लोलकल्लोलपाथसि । तन्मुखालोकनव्रीडामग्नहेमपयोरुहि ॥ ७५ ॥

अन्वयः–विक्षोभ उल्लोल कल्लोल पाथसि, तत् मुख आलोकन व्रीडा मग्न हेम पयोरुहि तत्र सः सस्नौ. ॥ ७५ ॥

अर्थः—(ते देवना) अचानक प्रवेशथी उछळेलां मोजांओवाळुं छे जल जेमां, तथा तेनुं मुख जोवाथी लज्जावडे डुबी गयां छे सोनेरी कमलो जेमां, एवी ते वावमां तेणे स्नान कर्युं. ॥ ७५ ॥

**दृष्ट्वा सुरविधेयानां निधानं सोऽथ पुस्तकम् । भक्त्या विमानचैत्यस्थं नित्यार्हन्तमपूजयत् ॥ ७६ ॥**

अन्वयः–अथ सुर विधेयानां निधानं पुस्तकं दृष्ट्वा सः भक्त्या विमान चैत्यस्थं नित्य अर्हंतं अपूजयत्. ॥ ७६ ॥

अर्थः—पछी देवोने करवालायक कार्योनां निधानसरखां पुस्तकमां जोइने ते देवे भक्तिपूर्वक विमानमां स्थापन करेलां जिनमंदिरमां रहेली शाश्वती जिनप्रतिमानुं पूजन कर्युं. ॥ ७६ ॥

**सिंहासनं विमानश्रीकिरीटमभिभूष्य सः । अथानन्दोर्मिमग्नाक्षो दिव्यं प्रेक्षणमैक्षत ॥ ७७ ॥**

अन्वयः–अथ विमान श्री किरीटं सिंहासनं अभिभूष्य, आनंद उर्मि मग्न अक्षः सः दिव्यं प्रेक्षणं ऐक्षत. ॥ ७७ ॥

अर्थः—पछी विमाननी शोभाना मुकुटसरखा सिंहासनपर बेसीने, आनंदना मोजांओमां लीन थयेली छे इंद्रियो जेनी एवो ते देव दिव्य नाटक जोवा लाग्यो. ॥ ७७ ॥

**कदापि केलिवापीषु कदाचिन्नन्दने वने । विललास स कान्ताभिर्विलास इव मूर्तिमान् ॥ ७८ ॥**

अन्वयः—मूर्तिमान् विलासः इव सः कदापि केलि वापीषु, कदाचित् नंदने वने कांताभिः विललास. ॥ ७८ ॥

अर्थः—जाणे देहधारी विलासज होय नही! तेम ते देव कोइ दिवसे क्रीडा करवानी वावोमां, तो कोइ दिवसे नंदनवनमां देवीओसहित विलास करवा लाग्यो. ॥ ७८ ॥

**कदाचिज्जिनयात्रासु विजहार सहामरैः। कदाचिन्निर्ममे धर्मक्षेत्रे सत्पुरुषस्तुतीः ॥ ७९ ॥**

अन्वयः—कदाचित् अमरैः सह जिनयात्रासु विजहार, कदाचित् धर्मक्षेत्रे सत्पुरुष स्तुतीः निर्ममे. ॥ ७९ ॥

अर्थः—कोइ वखते देवोनी साथे (ते देव) जैनतीर्थोनी यात्राना स्थळोमां विचरवा लाग्यो, तथा कोइक वखते धर्मक्षेत्रोमां जइ उत्तम पुरुषोनी स्तुति करवा लाग्यो. ॥ ७९ ॥

**भविष्यज्जिनभावोत्थैः वपुरंशुभिरद्भुतैः। जयन्निन्द्रानपि ययौ जिनकल्याणिकेषु सः ॥ ८० ॥**

अन्वयः—भविष्यत् जिन भाव उत्थैः, अद्भुतैः वपुः अंशुभिः इन्द्रान् अपि जयन् सः जिन कल्याणिकेषु ययौ. ॥ ८० ॥

अर्थः—भविष्यमां थनारां तीर्थंकरपणाथी उत्पन्न थयेलां, आश्चर्यकारक शरीरनां किरणोवडे इंद्रोने पण जीततो एवो ते देव जिनेश्वरप्रभुना कल्याणकमहोत्सवोमां (पण) जवा लाग्यो. ॥ ८० ॥

**इत्थं प्रतिक्षणविनिर्मितदेवकृत्यो, नित्योत्सवैः प्रविलसन्भृशमप्रमत्तः।**
**आलोलमौलिसुरमण्डलकर्णदोला—केलीसुखस्फुरितचारुचरित्रकीर्तिः ॥ ८१ ॥**

अभ्यर्णतीर्थविभुताविभवेषु लुभ्य–न्नभ्यापतच्च्यवनकालशुचाप्यचान्तः।
आह्लादनत्विषि महामहिमा विमाने, तस्मिन्नसौ रसमयं समयं निनाय ॥ ८२ ॥युग्मम्॥

अन्वयः–इत्थं प्रतिक्षण विनिर्मित देवकृत्यः, नित्य उत्सवैः प्रविलसन्, भृशं अप्रमत्तः, आलोल मौलि सुर मंडल कर्ण दोला केली सुख स्फुरित चारु चरित्र कीर्तिः. ॥ ८१ ॥ अभ्यर्ण तीर्थ विभुता विभवेषु लुभ्यन्, अभ्यापतत् च्यवन काल शुचा अपि अचांतः, महामहिमा असौ आह्लादन त्विषि तस्मिन् विमाने रसमयं समयं निनाय. ॥ ८२ ॥ युग्मं ॥

अर्थः–एरीते दरेक क्षणे करेल छे देवसंबंधि कार्य जेणे, तथा हमेशां महोत्सवोवडे आनंद पामतो, बिलकुल आळसविनानो, चपलमुकुटोवाळा देवोना समूहना कर्णोरूपी हींचोळापर झूलवाना सुखथी फेलायेली मनोहर आचरणनी कीर्तिवाळो, ॥ ८१ ॥ (भविष्यमां) नजीक आवती तीर्थंकरपणानी समृद्धिमां लालच राखतो, तथा नजीक आवता च्यवनकालना शोकनी पण जेने असर थयेली नथी एवो, तथा उत्कृष्ट महिमावाळो ते देव आनंदना तेजवाळा एवा ते विमानमां रसमय कळाने वीताडवा लाग्यो. ८२

इति दण्डाधिपतिश्रीमदाह्लादनसमभ्यर्थितश्रीविजयसिंहसूरिशिष्यश्रीवर्धमानसूरिविरचिते श्रीवासुपूज्यचरिते आह्लादनाङ्के महाकाव्ये तीर्थकरकारणलब्धिवर्णनो नाम द्वितीयः सर्गः ॥

एवीरीते दंडाधिपति श्रीमान् आह्लादने प्रार्थना करेला, तथा श्रीविजयसिंहसूरिजी नाशिष्य श्रीवर्धमानसूरिजीए रचेलां श्रीवासुपूज्यचरित्रनामना, आह्लादननाचिन्हवाळा महाकाव्यमां श्रीतीर्थंकरना कारणनी प्राप्तिना वर्णनवाळो बीजो सर्ग समाप्त थयो. ॥श्रीरस्तु॥

॥ इति श्रीवासुपूज्यचरित्रे चतुर्थो भागः समाप्तः ॥